हितोपदेशः ।

सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः ।
जाह्नवीफेनलेखेव यन्मूर्ध्नि शशिनः कला ॥१॥
श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु ।
वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥२॥
अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्म्ममाचरेत् ॥३॥
विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद् धर्मं ततः सुखम् ॥४॥
यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् ।
कथाच्छलेन बालानां नीतिस्तदिह कथ्यते ॥५॥
मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च ।
पञ्चतन्त्रात्तथान्यस्मात् ग्रन्थादाकृष्य लिख्यते ॥६॥

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरं तत्र सर्वस्वामिगुणोपेतः सुदर्शनो नाम नरपतिरासीत् । स भूपतिरेकदा केनापि पठ्यमानं श्लोकद्वयं शुश्राव ।

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥७॥
यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु तत्र चतुष्टयम् ॥८॥

इत्याकर्ण्यात्मनः पुत्राणामनधिगतशास्त्राणां नित्यमुन्मार्गगामिनां शास्त्राननुष्ठानेनोद्विग्नमनाः स राजा चिन्तयामास ।

कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्मिकः ।
काणेन चक्षुषा किं वा चक्षुः पीड़ैव केवलम् * ॥९॥
रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥१०॥

एतच्चिन्तयित्वा स राजा पण्डितसभां कारितवान् । राजोवाच, भो भोः पण्डिताः श्रूयतां मम वचनं, अस्ति कश्चित् एवम्भूतो विद्वान्, यो मम पुत्राणां नित्यमुन्मार्गगामिनामनधिगतशास्त्राणामिदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः ।

---

* अर्थागमो नित्यमरोगिता च,
प्रिया च भार्य्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या,
षड्जीवलोकेषु सुखानि राजन् ! ।
हीयते हि मतिस्तात ! हीनैः सह समागमात् ।
समैश्च समतामेति, विशिष्टैश्च विशिष्टताम् ॥

अत्रान्तरे विष्णुशर्मनामा पण्डितः सकलनीतिशास्त्रतत्त्वज्ञो बृहस्पतिरिवाब्रवीत्, देव महाकुलसम्भूता एते राजपुत्राः तन्मया नीतिं ग्राहयितुं शक्यन्ते।

अतोऽहं षण्मासाभ्यन्तरे तव पुत्रान् नीतिशास्त्राभिज्ञान् करिष्यामि। राजा सविनयं पुनरुवाच तदेतेषामस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः प्रमाणम् इत्युक्त्वा तस्य विष्णुशर्मणो बहुमानपुरःसरं पुत्रान् समर्पितवान्। अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां पुरस्तात् प्रस्तावक्रमेण स पण्डितोऽब्रवीत्।

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥११॥

तद्भवतां विनोदाय काककूर्मादीनां विचित्रां कथां कथयामि। राजपुत्रैरुक्तं कथ्यताम्। विष्णुशर्मोवाच यूयं शृणुत सम्प्रति मित्रलाभः प्रस्तूयते। यस्यायमाद्यः श्लोकः।

असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः।
साधयन्त्याशु कार्य्याणि काककूर्म्ममृगाखुवः ॥१२॥

राजपुत्रा ऊचुः कथमेतत् सोऽब्रवीत्

अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः। तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति। अथ कदाचिदवसन्नायां रात्रौ अस्ताचलचूड़ावलम्बिनि भगवति (क) चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमटन्तं व्याधमपश्यत्। तमवलोक्याचिन्तयत्

(क) कुमुदिनीनायके इति पाठान्तरम्।

अद्य प्रातरेवानिष्टदर्शनं जातं न जाने किमनभिमतं दर्शयिष्यति । इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः । अथ स व्याधस्तण्डुलकणान् विकीर्य्य जालं विस्तीर्य्य च प्रच्छन्नो भूत्वा स्थितः ।

अस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पंस्तांस्तण्डुलकणानवलोकयामास । ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान् प्रत्याह कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः । तन्निरूप्यतां तावत् । भद्रमिदं न पश्यामि । प्रायेणानेन तण्डुलकणलोभेनास्माभिरपि तथा भवितव्यम् ।

कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे ।
वृद्धव्याघ्रेण सम्प्राप्तः पथिकः संस्मृतो यथा ॥१३॥

कपोता ऊचुः कथमेतत् । सोऽब्रवीत् । अहमेकदा दक्षिणारण्ये चरन्नपश्यम् एको वृद्धः व्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते भो भोः पान्था इदं सुवर्णकङ्कणं गृह्यताम् । ततो लोभाकृष्टेन केनचित् पान्थेनालोचितं भाग्येनैतत् सम्भवति । किन्त्वस्मिन्नात्मसन्देहे प्रवृत्तिर्न विधेया । तन्निरूपयामि तावत् । प्रकाशं ब्रूते । कुत्र तव कङ्कणम् । व्याघ्रो हस्तं प्रसार्य्य दर्शयति । पान्थोऽवदत् कथं मारात्मके त्वयि विश्वासः ।

व्याघ्र उवाच शृणु रे पान्थ प्रागेव यौवनदशायामतिदुर्वृत्तोऽभूवम् । अनेकगोमानुषाणां बधान्मे पुत्रा मृता दाराश्च । वंशहीनश्चाहम् । ततः केनचिद्धार्मिकेणाहमुपदिष्टः दानधर्मादिकञ्चरतु भवान् । तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तः न कथं विश्वासभूमिः ।

मम चैतावान् लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै

कस्मैचिद्दातुमिच्छामि। तथापि व्याघ्रो मानुषं खादतीति लोकापवादो दुर्निवारः। मया च धर्मशास्त्राण्यधीतानि शृणु

प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन भूतानां दयां कुर्वन्ति साधवः ॥१४॥

त्वञ्चातीव दुर्गतस्तेन तत्तुभ्यं दातुं सयत्नोऽहम्।

तथाचोक्तम्

दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम्।
व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः ॥१५॥

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण।

ततो यावदसौ तद्वचः प्रतीतो लोभात् सरः स्नातुं प्रविशति तावत् महापङ्के निमग्नः पलायितुमक्षमः। तं पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत्, अहह महापङ्के पतितोऽसि अतस्त्वामहमुत्थापयामि। इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत्

न धर्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मनः।
स्वभाव एवात्र तथातिरिच्यते
यथा प्रकृत्यामधुरं गवां पयः ॥१६॥

अपरञ्च

सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः।
अतीत्य हि गुणान् सर्व्वान् स्वभावो मूर्द्ध्नि वर्त्तते ॥१७॥

तन्मया भद्रं न कृतं यदत्र मारात्मके विश्वासः कृतः।

इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च अतः सर्वथा अविचारितं कर्म न कर्त्तव्यमिति।

एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पमाह आः किमेवमुच्यते

वृद्धस्य (क) वचनं ग्राह्यमापत्काले ह्युपस्थिते।
सर्वत्रैवं विचारे तु भोजनेऽप्यप्रवर्त्तनम् (ख) ॥१८॥

यतः

शङ्काभिः सर्वमाक्रान्तमन्नं पानञ्च भूतले॥
प्रवृत्तिः कुत्र कर्त्तव्या जीवितव्यं कथं नु वा॥ १९॥
ईर्षी घृणी त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः।
परभाग्योपजीवी च षड़ेते दुःखभागिनः॥२०॥

अनन्तरं सर्वे तण्डुलकणलोभेन नभोमण्डलादवतीर्य्य जालनिबद्धा बभूवुः।

ततो यस्य वचनात् तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति स्म।

यतः

न गणस्याग्रतो गच्छेत् सिद्धे कार्य्ये समं फलम्।
यदि कार्य्यविपत्तिः स्यान्मुखरस्तत्र हन्यते॥२१॥

तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच नायमस्य दोषः।

यतः

आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने॥२२॥

(क) वृद्धानामिति च पाठः।

(ख) सर्वत्रैवं विचारेण भोजनेऽप्यप्रवर्त्तनम्। इति च पाठः।

विपत्काले विस्मय एव कापुरुषलक्षणं तदत्र धैर्य्यमवलम्ब्य प्रतीकारश्चिन्त्यताम् ।

यतः

विपदि धैर्य्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥२३॥

अन्यच्च

षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥२४॥

इदानीमेवं क्रियतां सर्व्वै रेकचित्तीभूय जालमादाय उड्डीयताम् ।

यतः

अल्पानामपि वस्तूनां संहतिः कार्य्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥२५॥

इति श्रुत्वा पक्षिणः सर्व्वे जालमादाय उत्पतिताः। अनन्तरं स व्याधः सुदूराज्जालापहारकांस्तानवलोक्य पश्चाद्धावितोऽचिन्तयत्

संहतास्तु हरन्तीमे जालं मम विहङ्गमाः ।
यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा ॥२६॥

ततस्तेषु चक्षुर्विषयमतिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः ।

अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता ऊचुः किमिदानीं कर्त्तुमुचितम् । चित्रग्रीव उवाच अस्माकं मित्रं हिरण्यको नाम मूषिकराजो

गण्डकीतीरे चित्रवने निवसति सोऽस्माकं पाशांश्छेत्स्यति । इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः । हिरण्यकश्च सर्वदा पापशङ्कया शतद्वारं विवरं कृत्वा निवसति । ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः ।

चित्रग्रीव उवाच सखे हिरण्यक कथमस्मान् न सम्भाषसे । ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससम्भ्रमं वहिर्निःसृत्याब्रवीत् आः पुण्यवानस्मि प्रियसुहृन्मे चित्रग्रीवः समायातः ।

यस्य मित्रेण सम्भाषो यस्य मित्रेण संस्थितिः ।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान् ॥२७॥

अथ पाशबद्धांश्चैतान् दृष्ट्वा सविस्मयः क्षणं स्थित्वा उवाच सखे किमेतत् । चित्रग्रीव उवाच सखे अस्माकं अविमृष्यकारितायाः फलमेतत् ।

रोगशोकपरीतापबन्धनव्यसनानि च ।
आत्मापराधवृक्षाणां फलान्येतानि देहिनाम् ॥२८॥

मूषिकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति । चित्रग्रीव उवाच मित्र मैवं कुरु । प्रथममस्मदाश्रितानामेतेषां तावत् पाशांश्छिन्धि मम पाशं पश्चाच्छेत्स्यसि । हिरण्यकोऽप्याह अहमल्पशक्तिर्दन्ताश्च मे कोमलास्तदेतेषां पाशांश्छेत्तुं कथमहं समर्थो भवामि । तत् यावन्मे दन्ता न त्रुट्यन्ति तावत्तव पाशं छिनद्मि । तदनन्तरमेतेषामपि बन्धनं यावच्छक्यं छेत्स्यामि । चित्रग्रीव उवाच, अस्त्येवं तथापि यथाशक्ति बन्धनमेतेषां खण्डय ।

हिरण्यकेनोक्तं आत्मपरित्यागेन यदाश्रितानां परिरक्षणंतन्न नीतिवेदिनां सम्मतम् ।

यतः

धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः ।
तान्निघ्नता किन्न हतं रक्षता किन्नरक्षितम् ॥ २९ ॥

चित्रग्रीव उवाच नीतिस्तावदीदृश्येव किन्त्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथैवासमर्थस्तेनेदं ब्रवीमि ।

अयमपरश्चासाधारणो हेतुः

जातिद्रव्यबलानाञ्च साम्यमेषां मया सह ।
मत्प्रभुत्वफलं ब्रूहि कदा किन्तद्भविष्यति ॥ ३० ॥
धनानि जीवितञ्चैव परार्थे प्राज्ञ उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ ३१ ॥
यदि नित्यमनित्येन निर्मलं मलवाहिना ।
यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किम् ॥ ३२ ॥
शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरम् ।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ॥ ३३ ॥

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन्नब्रवीत् साधु मित्र साधु अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते एवमुक्त्वा तेन सर्वेषां बन्धनानि छिन्नानि । ततो हिरण्यकः सर्वान् सादरं सम्पूज्याह सखे चित्रग्रीव सर्वथा अत्र जालबन्धनविधौ सति दोषमाशङ्क्य आत्मन्यवज्ञा न कर्त्तव्या । इति प्रबोध्यातिथ्यं कृत्वालिङ्ग्य च संप्रेषितश्चित्रग्रीवः सपरिवारो यथेष्टदेशान् ययौ हिरण्यकोऽपि स्वविवरं प्रविष्टः ।

अथ लघुपतनकनामा वायसः सर्ववृत्तान्तदर्शी साश्चर्यमिदमाह

अहो हिरण्यक श्लाघ्योऽसि । अतोऽहमपि त्वया सह मैत्रीमिच्छामि । त्वं मां मैत्र्येणानुग्रहीतुमर्हसि । एतच्छ्रुत्वा हिरण्यको विवराभ्यन्तरादाह कस्त्वं स ब्रूते लघुपतनकनामा वायसोऽहम् । हिरण्यको विहस्य आह आः का त्वया सह मैत्री ।

यतः

यद्येन युज्यते लोके बुधस्तत्तेन योजयेत् ।
अहमन्नं भवान् भोक्ता कथं प्रीतिर्भविष्यति ॥ ३४ ॥

अपरञ्च

भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं मतम् ।
शृगालात् पाशबद्धोऽसौ मृगः काकेन रक्षितः ॥ ३५ ॥

वायसोऽब्रवीत् कथमेतत् हिरण्यकः कथयति ।

अस्ति मगधदेशे चम्पकवती नामारण्यानी तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचित् शृगालेनावलोकितः । तं दृष्ट्वा शृगालोऽचिन्तयत् आः कथमेतन्मांसं सुललितं भक्षयामि । भवतु विश्वासं तावदुत्पादयामि । इत्यालोच्योपसृत्याब्रवीत् मित्र कुशलं ते । मृगेण उक्तं कस्त्वम् । स ब्रूते क्षुद्रबुद्धिनामा जम्बुकोऽहम् । अत्रारण्ये बन्धुहीनो मृतवन्निवसामि । इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि । अधुना तवानुचरेण मया सर्वथा भवितव्यमिति । मृगेणोक्तम् एवमस्तु ।

ततः पश्चादस्तङ्गते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ । तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति । तौ दृष्ट्वा काकोऽवदत् सखे कोऽयं द्वितीयः ।

मृगो ब्रूते जम्बुकोऽयमस्मत्सख्यमिच्छन्नागतः। काको ब्रूते मित्र अकस्मादागन्तुना सह मैत्री न युक्ता।

तथाचोक्तम्

अज्ञातकुलशीलस्य वासो देयो न कस्यचित्।
मार्ज्जारस्य हि दोषेण हतो गृध्रो जरद्गवः॥ ३६॥

तावाहतुः कथमेतत् काकः कथयति अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः। तस्य कोटरे जरद्गवनामा वृद्धो गृध्रः प्रतिवसति। अथकृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चिदुद्धृत्य ददति तेनासौ जीवति। (क) अथ कदाचिद्दीर्घकर्णनामा मार्ज्जारः पक्षिशावकान् भक्षितुं तत्रागतः। ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्त्तैः कोलाहलः कृतः। तं श्रुत्वा जरद्गवेनोक्तं कोऽयमायाति। दीर्घकर्णो गृध्रमवलोक्य सभयमाह हा हतोऽस्मि।

अथवा

तावद्भयस्य भेतव्यं यावद्भयमनागतम्।
आगतन्तु भयं वीक्ष्य प्रतिकुर्य्याद् यथोचितम्॥ ३७॥

अधुना सन्निधाने पलायितुमक्षमः। भवतु तावद्विश्वासमुत्पाद्यास्य समीपमुपगच्छामि। इत्यालोच्य तमुपसृत्याब्रवीत् आर्य्य त्वामभिवन्दे। गृध्रोऽवदत् कस्त्वम्। सोऽवदत् मार्जारोऽहम्। गृध्रो ब्रूते दूरमपसर नोचेद्धन्तव्योऽसि मया। मार्जारोऽवदत् श्रूयतां तावदस्मद्वचनम् ततो यद्यहं बध्यस्तदा हन्तव्यः।

(क) शावकरक्षां करोति च इति क्वचित् पाठः।

जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत् ॥ ३८ ॥

गृध्रोब्रूते ब्रूहि किमर्थमागतोऽसि ।

सोऽवदत् अहमत्र गङ्गातीरे नित्यस्नायी निरामिषाशी ब्रह्मचारी चान्द्रायणव्रतमाचरंस्तिष्ठामि । युष्मान् धर्मज्ञानरतान् विश्वासभूमय इति पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति । अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः । भवन्तश्चैतादृशा धर्मज्ञाः यन्मामतिथिं हन्तुमुद्यताः । गृहस्थधर्मश्चैषः

अरावप्युचितं कार्य्यमातिथ्यं गृहमागते ।
छेत्तुः पार्श्वगताच्छायां नोपसंहरतिद्रुमः ॥ ३९ ॥

यदि वा धनं नास्ति तदा प्रीतिवचसाऽप्यतिथिः पूज्यत एव ।

यतः

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥ ४० ॥

अन्यच्च

उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः ।
पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः ॥ ४१ ॥

गृध्रोऽवदत् मार्ज्जारा हि मांसरुचयः पक्षिशावकाश्चात्र निवसन्ति तेनैवं ब्रवीमि । तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति ब्रूते च मया धर्मशास्त्रं श्रुत्वा वीतरागेण इदं दुष्करं व्रतं चान्द्रायण-

मध्यवसितम्। यतः परस्परं विवदमानानामपि धर्मशास्त्राणाम् [१] अहिंसा परमो धर्म इत्यत्रैकमत्यम्।

सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये।
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः॥ ४२॥
एकएव सुहृद्धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्वमन्यत्तु गच्छति॥ ४३॥
योऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरम्।
एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते॥ ४४॥
स्वच्छन्दवनजातेन शाकेनापि प्रपूर्य्यते।
अस्य दग्धोदरस्यार्थे कः कुर्य्यात् पातकं महत्॥ ४५॥

एवं विश्वास्य स मार्जारः तरुकोटरे स्थितः।

ततोऽसौ दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति। येषामपत्यानि खादितानि तैः शोकार्त्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा। तत् परिज्ञाय मार्जारः कोटरान्निःसृत्य बहिः पलायितः। पश्चात् पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि। अनन्तरं अनेनैव जरद्गवेनास्माकं शावकाः खादिता इति सर्वैः पक्षिभिर्निश्चित्य गृध्रो व्यापादितः।

इत्याकर्ण्य जम्बुकः सकोपमाह मृगस्य प्रथमदर्शनदिने भवानप्यज्ञातकुलशील एवासीत्। तत् कथं भवता सह एतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्द्धते।

---

[१] धर्मशास्त्राणां नास्तिकास्तिकाध्यात्मशास्त्राणाम्।

अथवा

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते॥ ४६॥
अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानान्तु वसुधैव कुटुम्बकम्॥ ४७॥

यथायं मृगो मम बन्धुस्तथा भवानपि। मृगोऽब्रवीत् किमनेनोत्तरेण सर्वैरेकत्र विश्रम्भालापैः सुखमनुभवद्भिः स्थीयताम्।

यतः

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा॥ ४८॥

काकेनोक्तमेवमस्तु।

एकदा निभृतं शृगालो ब्रूते। सखे मृग एतस्मिन्नेव वनैकदेशे शस्यपूर्णं क्षेत्रमस्ति। तदहं त्वां तत्र नीत्वा दर्शयामि। तथाकृते सति मृगः प्रत्यहं तत्र गत्वा शस्यं खादति। अथ क्षेत्रपतिना क्षेत्रं दृष्ट्वा पाशो योजितः। अनन्तरं पुनरागतो मृगः पाशैर्बद्धोऽचिन्तयत् को मामितः कालपाशादिव व्याधपाशात्त्रातुं मित्रादन्यः समर्थः। अनन्तरं जम्बुकस्तत्रागत्य उपस्थितोऽचिन्तयत् फलिता तावदस्माकं कपटप्रबन्धेन मनोरथसिद्धिः। एतस्योत्कृत्यमानस्य मांसासृग्लिप्तानि अस्थीनि मयावश्यं प्राप्तव्यानि। तानिच बाहुल्येन भोजनानि भविष्यन्ति। मृगस्तं दृष्ट्वोल्लासितो ब्रूते सखे छिन्धि तावन्मम बन्धनं सत्वरं त्रायस्व माम्।

यतः

उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः॥४९॥

जम्बुकः पाशं विलोक्याचिन्तयत् दृढ़ स्तावदयं बन्धः ब्रूते च सखे स्नायुनिर्मिताः पाशास्तदद्य भट्टारकवारे कथमेतान् दन्तैः स्पृशामि मित्र यदि चित्ते नान्यथा मन्यसे तदा प्रभाते यत्त्वया वक्तव्यं तत् कर्त्तव्यमिति ।

अनन्तरं स काकः प्रदोषकाले मृगमनागतमवलोक्य इतस्ततोऽन्विष्यन् तथाविधं दृष्ट्वोवाच सखे किमेतत् मृगेणोक्तं अवधीरितसुहृद्वाक्यस्य फलमेतत् ।

तथाचोक्तम्

सुहृदां हितकामानां यः शृणोति न भाषितम् ।
विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः ॥५०॥

काको ब्रूते स वञ्चकः क्वास्ते । मृगेणोक्तं मन्मांसार्थी तिष्ठत्यत्रैव । काको ब्रूते उक्तमेव मया पूर्वम् ।

अपराधो न मेऽस्तीति नैतद्विश्वासकारणम् ।
विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ॥५१॥

परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेद्यत्नतो वन्धं विषकुम्भं पयोमुखम् ॥ ५२ ॥

ततः काको दीर्घं निश्वस्य प्राह अरे वञ्चक किं त्वया पापकर्म्मणा कृतम् ।

उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम् ।
तं जनमसत्यसन्धं भगवति वसुधे कथं वहसि ॥ ५३ ॥

अथ प्रभाते क्षेत्रपतिर्लगुड़हस्तस्तं प्रदेशं गच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तम् सखे मृग त्वमात्मानं मृतवत् सन्दर्श्य

वातेनोदरं पूरयित्वा पादांस्तब्धीकृत्य तिष्ठ । अहं तव चक्षुषी चञ्च्वा विलिखामि । यदाहं शब्दं करोमि त्वमुत्थाय सत्वरं पलायिष्यसे । मृगस्तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृगः आलोकितः । अथासौ आः स्वयं मृतोऽसि इत्युक्त्वा मृगं बन्धनान्मोचयित्वा पाशान् ग्रहीतुं सत्वरो बभूव । ततः काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः । तमुद्दिश्य तेन क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालो व्यापादितः ।

एतच्छ्रुत्वा लघुपतनकः पुनराह ।

भक्षितेनापि भवता नाहारो मम पुष्कलः ।
त्वयि जीवति जीवामि चित्रग्रीव इवानघ ॥ ५४

हिरण्यको ब्रूते चपलस्त्वं चपलेन सह स्नेहः सर्वथा न कर्त्तव्यः । किञ्चान्यत् शत्रुपक्षो भवानस्माकम् ।

उक्तञ्चैतत् ।

शत्रुणा न हि सन्दध्यात् सुश्लिष्टेनापि सन्धिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ॥ ५५ ॥

दुर्ज्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ ५६ ॥

लघुपतनको ब्रूते श्रुतं मया सर्वं तथापि ममैतावानेव सङ्कल्पः यत्त्वया सह सौहृद्यमवश्यं करणीयमिति नो चेदनाहारेणात्मनं तव द्वारि व्यापादयिष्यामि ।

एतद्वचनमाकर्ण्य हिरण्यको बहिर्निःसृत्याह आप्यायितोऽहं भवतामनेन वचनामृतेन ।

किञ्च

रहस्यभेदो याच्ञा च नैष्ठुर्य्यं चलचित्तता ।
क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम् ॥ ५७ ॥

एतद्वचनोक्तमेकमपि दूषणं त्वयि न लक्ष्यते । तद्भवतु भवतोऽभिमतमेव । इत्युक्त्वा हिरण्यको मैत्रं विधाय भोजनविशेषैर्वायसं सन्तोष्य विवरं प्रविष्टः । वायसोऽपि स्वस्थानं गतः । ततः प्रभृति तयोरन्योऽन्याहारप्रदानेन कुशलप्रश्नैर्विश्रम्भालापैश्च कालोऽतिवर्तते ।

एकदा लघुपतनको हिरण्यकमाह सखे वायसस्य कष्टलभ्याहारमिदं स्थानं । तदेतत् परित्यज्य स्थानान्तरं गन्तुमिच्छामि । हिरण्यको ब्रूते मित्र क्व गन्तव्यम् वायसो ब्रूते अस्ति सुनिरूपितं स्थानम् । हिरण्यकोऽवदत् किन्तत् । वायसो ब्रूते अस्ति दण्डकारण्ये कर्पूरगौराभिधानं सरः । तत्र चिरकालोपार्जितः प्रियसुहृन्मे मन्थराभिधानः कूर्मः सहजधार्मिकः प्रतिवसति । स च भोजनविशेषैर्मां संवर्द्धयिष्यति । हिरण्यकोऽप्याह तत् किमत्रावस्थाय मया कर्त्तव्यम् मामपि तत्र नय ।

अथ वायसस्तेन मित्रेण सह चित्रालापसुखेन तस्य सरसः समीपं ययौ । ततो मन्थरो दूरादेव लघुपतनकमवलोक्य उत्थाय यथोचितमातिथ्यं विधाय मूषिकस्याप्यतिथिसत्कारं चकार । वायसोऽवदत् सखे मन्थर सविशेषपूजामस्मै विधेहि यतोऽयं पुण्यकर्मणां धुरीणः कारुण्यरत्नाकरो हिरण्यको नाम मूषिकराजः । एतस्य गुणस्तुतिं जिह्वासहस्रेण यदि सर्पराजः कदाचित् कर्तुं समर्थः स्यादित्युक्त्वा चित्रग्रीवोपाख्यानं वर्णितवान् । ततो मन्थरः सादरं हिरण्यकं संपूज्याह भद्र आत्मनो निर्ज्जनवनागमनकारणमाख्यातुमर्हसि । हिरण्यकोऽवदत् कथयामि श्रूयताम् ।

अस्ति चम्पकाभिधानायां नगर्यां परिव्राजकावसथः। तत्र चूडाकर्णो नाम परिव्राजकः प्रतिवसति। स च भोजनावशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्तकेऽवस्थाप्य स्वपिति। अहञ्च तदन्नमुत्प्लुत्य प्रत्यहं भक्षयामि। एकदा तस्य प्रियसुहृत् वीणाकर्णो नाम परिव्राजकः समायातः। तेन सह कथाप्रसङ्गावस्थितो मम त्रासार्थं जर्जरवंशखण्डेन चूडाकर्णो भूमिमताडयत्। वीणाकर्ण उवाच सखे किमिति मम कथाविरक्तोऽन्यासक्तो भवान्। चूडाकर्णेन उक्तं मित्र नाहं विरक्तः किन्तु पश्यायं मूषिको ममापकारी सदा पात्रस्थं भिक्षान्नमुत्प्लुत्य भक्षयति। वीणाकर्णो नागदन्तकमवलोक्याह कथं मूषिकः स्वल्पबलोऽप्येतावद्दूरमुत्पतति। तदत्र केनापि कारणेन भवितव्यम्। क्षणं विचिन्त्य परिव्राजकेनोक्तं कारणञ्चात्र धनवाहुल्यमेव प्रतिभाति।

यतः

धनवान् बलवान् लोके सर्वः सर्वत्र सर्वदा।
प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ॥ ५८ ॥

ततः खनित्रमादाय तेन विवरं खनित्वा चिरसञ्चितं मम धनं गृहीतम्। ततः प्रभृत्यहं निजशक्तिहीनः सत्त्वोत्साहरहितः स्वाहारमप्युत्पादयितुमक्षमः सत्रासं मन्दं मन्दमुपसर्पन् चूडाकर्णेनावलोकितोऽहं। ततस्तेनोक्तम्

अर्थेन बलवान् सर्वः अर्थाद्भवति पण्डितः।
पश्याऽयं मूषिकः पापः स्वजातिसमतां गतः ॥ ५९ ॥

एतत् आकर्ण्य मयाऽलोचितं ममात्रावस्थानमयुक्तमिदानीं यच्चान्यस्मै एतद्वृत्तान्तकथनं तदप्यनुचितम् यच्च याच्ञया जीवनं तदप्य-

तीव गर्हितम् । तत् किमहं परपिण्डेनात्मानं पोषयामि । कष्टं भोः तदपि द्वितीयं मृत्युद्वारम् ।

यतः

रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥ ६० ॥

इत्यालोच्यापि लोभात् पुनरपि तदीयमन्नं ग्रहीतुं ग्रहमकरवम् ।

लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्त्तो दुःखमाप्नोति परत्रेह च मानवः ॥ ६१ ॥

ततोऽहं मन्दं मन्दमुपसर्पंस्तेन वीणाकर्णेन जर्जरवंशखण्डेन ताडितो ऽचिन्तयम् लुब्धो ह्यसन्तुष्टो नियतमात्मद्रोही भवति ।

सर्वा एवापदस्तस्य यस्य तुष्टं न मानसम् ।
सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानसम् ॥ ६२ ॥
सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम् ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥ ६३ ॥
असेवितेश्वरद्वारमदृष्टविरहव्यथम् ।
अनुक्तक्लीववचनं धन्यं कस्यापि जीवनम् ॥ ६४ ॥
न योजनशतं दूरं वाह्यमानस्य तृष्णया ।
सन्तुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः ॥ ६५ ॥

तदत्रावस्थोचितकार्य्यपरिच्छेदः श्रेयान् । इत्यालोच्याहं निर्जनवनमागतः । ततोऽस्मत्पुण्योदयादनेन मित्रेणाहं स्नेहानुवृत्त्यानुगृहीतः । अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्ग एव मया प्राप्तः ।

एवं ते स्वेच्छाहारविहारं कुर्वाणाः सन्तुष्टाः सुखं निवसन्ति स्म ।

अथ कदाचिच्चित्राङ्गनामा मृगः केनापि त्रासितस्तत्रागत्य मिलितः । ततः पश्चादायान्तं भयहेतुं सम्भाव्य मन्थरो जलं प्रविष्टः मूषिकश्च विवरं गतः । काकोऽपि उड्डीय वृक्षमारूढः । ततो लघुपतनकेन सुदूरं निरूप्य भयहेतुर्न कोऽप्यवलोकितः । पश्चात्तद्वचनादागत्य पुनः सर्वे मिलित्वा तत्रैवोपविष्टाः । मन्थरेणोक्तम् भद्र मृग कुशलं ते । स्वेच्छया उदकाद्याहारोऽनुभूयताम् । अत्रावस्थानेन वनमिदं सनाथीक्रियताम् ।

चित्राङ्गो ब्रूते लुब्धकत्रासितोऽहं भवतां शरणमागतः भवद्भिः सह मित्रत्वमिच्छामि । हिरण्यकोऽवदत् मित्रत्वं तावदस्माभिः सह अयत्नेनैव निष्पन्नं भवतः तदत्र भवता स्वगृहनिर्विशेषेण स्थीयताम् । तच्छ्रुत्वा मृगः सानन्दः कृतस्वेच्छाहारः पानीयं पीत्वा जलासन्नतरुच्छायायामुपविष्टः ।

अथ मन्थरेणोक्तं सखे मृग केन त्रासितोऽसि । अस्मिन् निर्जने वने कदाचित् किं व्याधाः सञ्चरन्ति । मृगेणोक्तम् अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नृपतिः । स च दिग्विजयव्यापारक्रमेणागत्य चन्द्रभागानदीतीरे समावासितकटको वर्त्तते । प्रातश्च तेनात्रागत्य कर्पूरसरःसमीपे भवितव्यमिति व्याधानां मुखात् किंवदन्ती श्रूयते । तदत्रापि प्रातरवस्थानं भयहेतुरित्यालोच्य यथा कार्य्यं तथारभ्यताम् । तच्छ्रुत्वा कूर्मः सभयमाह मित्र जलाशयान्तरं गच्छामि । काकमृगावपि उक्तवन्तौ मित्र एवमस्तु । हिरण्यको विमृश्याह पुनर्जलाशये प्राप्ते मन्थरस्य कुशलम् स्थले गच्छतोऽस्य कः प्रकारः ।

तद्धितस्य वचनमाकर्ण्य महता भयेन विमुग्धइव तं जलाशयमुत्सृज्य

मन्थरः चलितः। तेऽपि हिरण्यकादयः स्नेहादनिष्टं शङ्कमानाः मन्थरमनुजग्मुः ततः स्थले गच्छन् केनापि व्याधेन वनं पर्य्यटता स मन्थरः प्राप्तः। स च तं गृहीत्वा उत्थाप्य धनुषि बद्धा धन्योऽस्मीत्यभिधाय स्वगृहाभिमुखं चलितः।

अथ ते मृगवायसमूषिकाः परं विषादमुपगतास्तमनुगच्छन्ति स्म। ततो हिरण्यको विलपति—

एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य।
तावद्द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति॥ ६६ ॥

स्वभावजं तु यन्मित्रं भाग्येनैवाभिजायते।
तदकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति॥ ६७ ॥

न मातरि न दारेषु न सोदर्य्ये न चात्मजे।
विश्वासस्तादृशः पुंसां यादृङ्मित्रे स्वभावजे॥ ६८ ॥

इति मुहुर्विचिन्त्य प्राह अहो मे दुर्दैवं अथवा इत्यमेवैतत्।

कायः सन्निहितापायः सम्पदः पदमापदाम्।
समागमाः सापगमाः सर्वमुत्पादि भङ्गुरम्॥ ६९ ॥

एवं बहु विलप्य हिरण्यकश्चित्राङ्गलघुपतनकावाह यावदयं व्याधो वनान्न निःसरति तावन्मन्थरं मोचयितुं यत्नः क्रियताम्। तावूचतुः सत्वरं यथाकार्य्यमुपदिश। हिरण्यको ब्रूते चित्राङ्गो जलसमीपं गत्वा मृतमिव आत्मानं निश्चेष्टं दर्शयतु। लघुपतनकश्च तस्योपरि स्थित्वा चञ्चा किमपि विलिखतु। नूनमनेन लुब्धकेन मृगमांसार्थिना कच्छपं परित्यज्य सत्वरं तत्र गन्तव्यम्। ततोऽहं मन्थरस्य बन्धनं छेत्स्यामि। सन्निहिते लुब्धके भवद्भ्यां पलायितव्यम्।

ततश्चित्राङ्गलघुपतनकाभ्यां शीघ्रं गत्वा तथानुष्ठिते सति स व्याधः परिश्रान्तः पानीयं पीत्वा तरोरधस्तादुपविष्टः तथाविधं मृगमवलोक्य कच्छपं जलसमीपे निधाय कर्त्तरिकामादाय प्रहृष्टमना मृगान्तिकं चलितः। अत्रान्तरे हिरण्यकेनागत्य छिन्नबन्धनः स कूर्मः सत्वरं जलाशयं प्रविष्टः। स च मृग आसन्नं तं व्याधं विलोक्य उत्थाय द्रुतं पलायितः।

उक्तञ्च

यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि॥ ७०॥

ततोऽसौ निराशः कटकं प्रविष्टः। मन्थरादयश्च सर्वे मुक्तापदः स्वस्थानं गत्वा यथासुखमास्थिताः। अथ राजपुत्त्रैः सानन्दमुक्तं सर्वं श्रुतवन्तः सुखिनो वयं सिद्धं नः समीहितम्। विष्णुशर्मोवाच एतावद्भवतामभिलषितं सम्पन्नं अपरमपीदमस्तु।

मित्रं प्राप्नुत सज्जना जनपदैर्लक्ष्मीः समालभ्यताम्
भूपालाः परिपालयन्तु वसुधां शश्वत् स्वधर्म स्थिताः।
आस्तां मानसतुष्टये सुकृतिनां नीतिर्नवोढेव वः
कल्याणं कुरुतां जनस्य भगवांश्चन्द्रार्द्धचूड़ामणिः॥ ७१॥

इति विष्णुशर्मसंगृहीते हितोपदेशे मित्रलाभो नाम प्रथमः कथासंग्रहः।

सुहृद्भेदः।

अथ राजपुत्रा ऊचुः। आर्य्य मित्रलाभः श्रुतस्तावदस्माभिः। इदानीं सुहृद्भेदं श्रोतुमिच्छामो वयम्। विष्णुशर्मोवाच सुहृद्भेदं शृणुत यस्यायमाद्यः श्लोकः

वर्द्धमानो महास्नेहो मृगेन्द्रवृषयोर्वने।
पिशुनेनातिलुब्धेन जम्बुकेन विनाशितः॥ १॥

राजपुत्रैरुक्तम् कथमेतत् विष्णुशर्मा कथयति।

अस्ति दक्षिणापथे सुवर्णवती नाम नगरी। तत्र वर्द्धमानो नाम वाणिजो महाधनः प्रतिवसति। तस्य प्रभूतेऽपि वित्तेऽपरान् बन्धूनतिसमृद्धान् विलोक्य पुनरर्थवृद्धिः करणीयेति मतिर्बभूव।

यतः

अधोऽधः पश्यतः कस्य महिमा नोपचीयते।
उपर्य्युपरि पश्यन्तः सर्व्व एव दरिद्रति॥ २॥

अपरञ्च

ब्रह्महाऽपि नरः पूज्यो यस्यास्ति विपुलं धनम्।
शशिनस्तुल्यवंशोऽपि निर्धनः परिभूयते॥ ३॥

सम्पदा सुस्थितम्मन्यो भवति स्वल्पयापि यः।
कृतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य ताम्॥ ४॥

अपरञ्च

निरुत्साहं निरानन्दं निर्वीर्य्यमरिनन्दनम्।
मास्म सीमन्तिनी काचित् जनयेत् पुत्रमीदृशम्॥ ५॥

तथा चोक्तम्

अलब्धं चैव लिप्सेत लब्धं रक्षेदवक्षयात् ।
रक्षितं वर्द्धयेत् सम्यक् वृद्धं तीर्थेषु निक्षिपेत् ॥ ६ ॥ *

अवर्द्धमानश्चार्थः कालेन स्वल्पव्ययेऽप्यञ्जनवत् क्षयमेति । अनुपभुज्यमानश्च निष्प्रयोजन एव । इति सञ्चिन्त्य वर्द्धमानः सञ्जीवकनन्दकनामानौ द्वौ वृषभौ धुरि नियोज्य शकटं नानाविधद्रव्यपूर्णं कृत्वा वाणिज्येन काश्मीरं प्रति चलितः ।

यतः

कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥ ७ ॥

अथ गच्छतस्तस्य दुर्गनाम्नि महारण्ये भग्नजानुः सञ्जीवको निपतितः । एतदालोक्य वर्द्धमानोऽचिन्तयत्

करोतु नाम नीतिज्ञो व्यवसायमितस्ततः ।
फलं पुनस्तदेव स्याद् यद्विधेर्मनसि स्थितम् ॥ ८ ॥

किन्तु

विस्मयः सर्वथा हेयः प्रत्यूहः सर्वकर्म्मणाम् ।
तस्माद्विस्मयमुत्सृज्य साध्यसिद्धिर्विधीयते ॥ ९ ॥

इति सञ्चिन्त्य सञ्जीवकं तत्र परित्यज्य वर्द्धमानश्चलितः । सञ्जीवकोऽपि कथं कथमपि खुरत्रये भरं कुर्वंस्तत्रैव वने स्थितः । ततो दिनेषु

---

* अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य च सञ्चयम् ।
अवन्ध्यं दिवसं कुर्य्यात् दानाध्ययनकर्म्मभिः ॥
जलबिन्दुनिपातेन क्रमशः पूर्य्यते घटः ।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥

गच्छतु सञ्जीवकः स्वेच्छाहारादिलाभेन तामरण्यानीं परिभ्रमन् हृष्ट-पुष्टाङ्गो बलवन्ननाद। तस्मिन् वने पिङ्गलकनामा सिंहः स्वभुजोपार्जितराज्यसुखमनुभवन्नास्ते। स चैकदा पिपासाकुलितः पानीयं पातुं यमुनाकच्छमगमत्। तेन च तत्र सिंहेनाननुभूतपूर्वकं प्रलयघनगर्जितमिव सञ्जीवकनर्दितमश्रावि। तच्छ्रुत्वासौ पानीयमपीत्वा सचकितं परिवृत्य स्वस्थानमागत्य किमिदमित्यालोच्य तूष्णीं स्थितः। स च तथाविधः करटकदमनकाभ्यां तन्मन्त्रिपुत्राभ्यां शृगालाभ्यां दृष्टः। तं तथाविधं दृष्ट्वा दमनकः करटकमाह सखे करटक किमित्ययमुदकार्थी स्वामी पानीयमपीत्वा मन्दं मन्दमवतिष्ठते। करटको ब्रूते मित्र दमनक अस्मन्मतेनास्य सेवैव न क्रियते तत् किमस्य चेष्टानिरूपणेन। यतस्तानेन राज्ञा विनाऽपराधेन चिरंदिवसमवधीरिताभ्यामावाभ्यां महद्दुःखमनुभूतम्।

10 सेवया धनमिच्छद्भिः सेवकैः पश्य यत् कृतम्।
स्वातन्त्र्यं यच्छरीरस्य मूढैस्तदपि हारितम्॥ १०॥

11 एतावज्जन्मसाफल्यं यदनायत्तवृत्तिता।
ये पराधीनतां यातास्ते वै जीवन्ति के मृताः॥ ११॥

दमनकोऽब्रवीत् मित्र सर्वथा मनसापि नैतत् कर्त्तव्यम्।

12 कथं नाम न सेव्यन्ते यत्नतः परमेश्वराः।
अचिरेणैव ये तुष्टाः पूरयन्ति मनोरथान्॥ १२॥

करटको ब्रूते यः सर्व्वाधिकारे नियुक्तः प्रधानमन्त्री स करोतु। यतोऽनुजीविना पराधिकारचर्चा न कर्त्तव्या।

परादिकारचर्च्चां यः कुर्य्यात् स्वामिहितेच्छया ।
स विषीदति चीत्कारात् ताड़ितो गर्दभो यथा ॥ १३ ॥

दमनकः पृच्छति कथमेतत् करटकः कथयति । अस्ति वाराणस्यां कर्पूरपटो नाम रजकः । स चैकदा निर्भरं प्रसुप्तः । तदनन्तरं द्रव्याणि हर्त्तुं तद्गृहं चौरः प्रविष्टः । तस्य पश्चाद्भागे गर्दभो बद्धस्तिष्ठति कुक्कुरश्चोपविष्टः । तं चौरमवलोक्य गर्दभः श्वानमाह भवतोऽयं व्यापारः तत् किमिति त्वमुच्चैः शब्दं कृत्वा स्वामिनं न जागरयसि । कुक्कुरो ब्रूते नियोगस्यास्य चिन्ता त्वया न कार्य्या । त्वमेव जानासि यथाऽहमस्य गृहरक्षां करोमि । यतोऽयं चिरान्निर्वृतो ममोपयोगं न जानाति तेनाधुना ममाहारदानेऽपि मन्दादरः । विना विधुरदर्शनं स्वामिनोऽनुजीविषु मन्दादरा भवन्ति । गर्दभो ब्रूते शृणु रे वर्व्वर

याचते कार्य्यकाले यः स किं भृत्यः स किं सुहृत् ।

कुक्कुरो ब्रूते

भृत्यान् सम्भावयेद्यस्तु कार्य्यकाले स किं प्रभुः ॥

ततो गर्दभः सकोपमाह अः पापीयांस्त्वं यः स्वामिकार्य्योपेक्षां करोषि । भवतु यथा स्वामी जागर्त्ति तथा मया कर्त्तव्यम् । इत्युक्त्वा स अतीव चीत्कारं कृतवान् । ततः स रजकस्तेन चीत्कारेण प्रबुद्धो निद्राविमर्दकोपादुत्थाय गर्दभं लगुड़ेन ताड़यामास । ततस्तेन ताड़नेन गर्दभः पञ्चत्वं गतः । अतोऽहं ब्रवीमि पराधिकारचर्च्चामित्यादि ।

पश्य पशूनामन्वेषणमस्माकं नियोगः । अतः स्वनियोगस्यैव चर्च्चा क्रियताम् । विमृश्य किन्त्वद्य तयापि चर्च्चया न प्रयोजनम् । यतः आवयोर्भक्षितशेषाहारः प्रचुरस्तिष्ठति । दमनकः सरोषमाह कथमाहारमात्रार्थी भवान् नृपं सेवते । सेवकेन एतदयुक्तमुक्तम् ।

यतः

सुहृदामुपकारकारणात् द्विषतामप्यपकारकारणात्।
नृपसंश्रय इष्यते बुधैर्जठरं को न बिभर्त्ति केवलम्॥१४॥*

करटको ब्रूते। आवां तावदप्रधानौ तदावयोः किमनया विचारणया। दमनकः पुनराह कियता कालेनामात्यः प्रधानतामप्रधानतां वा लभेत।

यतः

न कस्यचित् कश्चिदिह स्वभावाद्भवत्युदारोऽभिमतः खलो वा।
लोके गुरुत्वं विपरीततां-वा स्वचेष्टितान्येव नरं नयन्ति॥१५॥

किञ्च

आरोप्यते शिला शैले यत्नेन महता यथा।
निपात्यते क्षणेनाधस्तथात्मा गुणदोषयोः॥१६॥

तद्भद्र स्वयत्नायत्तो ह्यात्मा सर्वस्य।

यात्यधोऽधो व्रजत्युच्चैर्नरः स्वैरेव कर्मभिः।
कूपस्य खनिता यद्वत् प्राकारस्येव कारकः॥१७॥

---

* मनुष्यजातौ तुल्यायां भृत्यत्वमतिगर्हितम्।
प्रथमो यो न तत्रापि सोऽपि जीवन्मृतः गण्यते॥
अहितहितविचारशून्यबुद्धेः
श्रुतिविषयैर्बहुभिर्बहिष्कृतस्य।
उदरभरणमात्रकेवलेच्छोः
पुरुषपशोश्च पशोश्च को विशेषः॥

करटको वदति अथ भवान् किं ब्रवीति । दमनक आह अयं तावत् स्वामी पिङ्गलकः पानीयमपीत्वा कुतोऽपि भयात् सचकितं परिवृत्तप्रो-पविष्टः । करटको ब्रूते किं तच्च त्वं जानासि । दमनको वदति किं प्रज्ञावतामविदितमस्ति ।

उदीरितोऽर्थः पशुनाऽपि गृह्यते
हयाश्च नागाश्च वहन्ति देशिताः ।
अनुक्तमप्यूहति पण्डितो जनः
परेङ्गितज्ञानफला हि बुद्धयः ॥ १८ ॥

अपि च

आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च ।
नेत्रवक्त्रविकारेण लक्ष्यतेऽन्तर्गतं मनः ॥ १९ ॥

तदत्र भयप्रस्तावेऽहमेनं प्रज्ञाबलेनात्मीयं करिष्यामि । करटको वदति सखे त्वं सेवानभिज्ञः । दमनको ब्रूते भद्र कथमहं सेवान-भिज्ञः । करटको ब्रूते कदाचित् स्वामनवसरप्रवेशादवमन्यते स्वामी । दमनक आह अस्त्वेवम् । तथाप्यनुजीविना सान्निध्यमवश्यं करणीयम् ।

यतः

दोषभीतेरनारम्भः कापुरुषस्य लक्षणम् ।
कैरजीर्णभयाद्भ्रातः भोजनं परिहीयते ॥ २० ॥

करटको ब्रूते अथ तत्र गत्वा किं वक्ष्यसि । दमनक आह शृणु किमनुरक्तो विरक्तो वा मयि स्वामीति ज्ञास्यते तावत् । करटको ब्रूते किं तज्ज्ञानलक्षणम् । दमनको ब्रूते शृणु ।

दूरादवेक्षणं हासः सम्प्रश्ने चादरो भृशम् ।
परोक्षेऽपि गुणश्लाघा स्मरणं प्रियवस्तुषु ॥ २१ ॥

एतज्ज्ञात्वा यथा चायं ममायत्तो भविष्यति तद्वच्यामि । करटको ब्रूते तथाप्यप्राप्ते प्रस्तावे न वक्तुमर्हसि ।

यतः

अप्राप्तकालवचनं वृहस्पतिरपि ब्रुवन् ।
प्राप्नुयाद् बुद्ध्यवज्ञानमपमानं च शाश्वतम् ॥ २२ ॥

दमनकोऽब्रवीत् मित्र मा भैषीः । नाहमप्राप्तावसरवचनं वच्यामि ।

यतः

आपद्युन्मार्गगमने कार्य्यकालात्ययेषु च ।
अपृष्टेनापि वक्तव्यं भृत्येन हितमिच्छता ॥ २३ ॥

यदि च प्राप्तावसरोऽपि मन्त्रो मया न वक्तव्यस्तदा मन्त्रित्वमेव ममानुपपन्नम् । तद्भद्रानुजानीहि पिङ्गलकसमीपमहं गच्छामि । करटको ब्रूते शुभमस्तु यथाभिप्रेतमनुष्ठीयताम् । ततो दमनको विस्मित इव पिङ्गलकसमीपं गतः ।

अथ दूरादेव राज्ञा दृष्टः सादरं प्रवेशित स्तं साष्टाङ्गं प्रणम्योपविष्टः । राजाह चिराद्दृष्टोऽसि । दमनको ब्रूते यद्यपि मया सेवकेन श्रीमद्देवपादानां न किञ्चित् प्रयोजनमस्ति तथापि प्राप्तकालेऽनुजीविना सान्निध्यमवश्यं कर्त्तव्यमित्यागतोऽस्मि । यद्यपि स्वामिना चिरावधीरि

तस्य मे बुद्धिविनाशः शङ्क्यते तदपि न *। पिङ्गलको ब्रूते भद्र दमनक किमेतत् त्वमस्माकं प्रधानामात्यपुत्रः सुधीरियत्कालं नीत्वा कुतोऽपि पिशुनवचनान्नागतोऽसि। इदानीं यथाभिमतं ब्रूहि। दमनको ब्रूते देव पृच्छामि किञ्चिदुच्यताम्। उदकार्थी स्वामी पानीयमपीत्वा किमिति विस्मित इवावतिष्ठते। पिङ्गलकोऽवदत् भद्रमुक्तं त्वया किन्तु एतद्रहस्यं वक्तुमस्माकं विश्वासभूमिरस्ति न कोऽपि त्वं तु तद्विधस्ततः शृणु कथयामि। सम्प्रति वनमिदमपूर्वसत्त्वाधिष्ठितम् अतोऽस्माकं त्याज्यम्। तथा च श्रुतस्त्वयाप्यपूर्वः शब्दो महान्। शब्दानुरूपेण च तस्य प्राणिनो बलेनापि सुमहता भवितव्यम्। दमनको ब्रूते देव अस्ति तावदयं महान् भयहेतुः शब्दोऽस्माभिरप्याकर्णितः। किन्तु स किं मन्त्री यः प्रथमं मन्त्राभावेन भूपतिं परित्यागं युद्धोद्योगं वोपदिशति। अपरं च देव अस्मिन् कार्य्यसन्देहे भृत्यानामुपयोग एव ज्ञातव्यः।

यतः

बन्धुस्त्रीभृत्यवर्गस्य बुद्धेः सत्त्वस्य चात्मनः।
आपन्निकषपाषाणे नरो जानाति सारताम्॥ २४॥

सिंहो ब्रूते भद्र महती शङ्का मां बाधते। दमनकः स्वगतमाह अन्यथा राज्यसुखं परित्यज्य स्थानान्तरं गन्तुं कथं मां सम्भाषसे। प्रकाशं ब्रूते देव यावदहं जीवामि तावद्भयं न कर्तव्यम्। किन्तु करटकादयोऽपि आश्वास्यन्ताम्। यस्मादापत्प्रतीकाराय दुर्लभः पुरुषसमवायः।

---

* मणिर्लुठति पादेषु काचः शिरसि धार्यते।
क्रयविक्रयवेलायां काचः काचो मणिर्मणिः॥

बालादपि ग्रहीतव्यं युक्तमुक्तं मनीषिभिः।
रवेरविषये किं न प्रदीपस्य प्रकाशनम्॥

ततस्तौ दमनककरटकौ राज्ञा महाप्रसादेन पूजितौ भयप्रतीकारं प्रतिज्ञाय चलितौ। करटको गच्छन् दमनकमाह सखे किं शक्यप्रतीकारोऽयं भयहेतुरशक्यप्रतीकारो वेति न ज्ञात्वा भयोपशमं प्रतिज्ञाय कथमयं महाप्रसादो गृहीतः। यतोऽनुपकुर्वाणो न कस्यापि उपायनं गृह्णीयात् विशेषतो राज्ञः। दमनको विहस्याह मित्र तूष्णीमास्यतां ज्ञातं मया भयकारणम्। बलिवर्द्दन नर्द्दितम्। वृषभास्त्वास्माकं भक्ष्याः किं पुनः सिंहस्य। करटको ब्रूते यद्येवं तदा स्वामित्रासस्तत्रैव किं नापनीतः। दमनकोऽवदत् यदि स्वामित्रासस्तत्रैव मुच्यते तदा कथमयं महाप्रसादलाभः स्यात्।

निरपेक्षो न कर्त्तव्यो भृत्यैः स्वामी कदाचन।
निरपेक्षं प्रभुं कृत्वा भृत्यः स्याद्दधिकर्णवत्॥ २५॥

करटकः पृच्छति कथमेतत् दमनकः कथयति अस्त्युत्तरापथे अर्बुदशिखरनाम्नि पर्वते महाविक्रमो नाम सिंहः तस्य पर्वतकन्दरमधिशयानस्य केशराग्रं मूषिकः कश्चित् छिनत्ति। स सिंहः केशराग्रं लूनं बुद्धा कुपितो विवरान्तर्गतं मूषिकमलभमानोऽचिन्तयत् किं विधेयमत्र। भवत्वेवं श्रूयते

क्षुद्रशत्रुर्भवेद्यस्तु विक्रमान्नैव लभ्यते।
तमाहर्त्तुं पुरस्कार्य्यः सदृशस्तस्य सैनिकः॥ २६॥

इत्यालोच्य तेन ग्रामं गत्वा दधिकर्णनामा विडालो मांसाद्याहारेण सन्तोष्य प्रयत्नादानीय स्वकन्दरे धृतः। ततस्तद्भयान्मूषिको बहिर्न निःसरति। तेनासौ सिंहोऽक्षतकेशरः सुखं स्वपिति। मूषिकशब्दं यदा यदा शृणोति तदा तदा सविशेषं तं विडालं मांसाहारदानेन संवर्द्धयति।

अथैकदा स मूषिकः क्षुधापीड़ितो बहिः सञ्चरंस्तेन मार्जारेण प्राप्तो व्यापादितः खादितश्च। अनन्तरं स सिंहो यदा कदाचिदपि मूषिक-शब्दं न शुश्राव तदोपयोगाभावात् तस्य विड़ालस्याहारदाने मन्दादरो बभूव। अतोऽहं ब्रवीमि निरपेक्षो न कर्त्तव्य इत्यादि।

ततो दमनककरटकौ सञ्जीवकसमीपं गतौ। तत्र करटकस्तरुतले साटोपमुपविष्टः। दमनकः सञ्जीवकसमीपं गत्वाऽब्रवीत्। अरे वृषभ एषोऽहं राज्ञा पिङ्गलकेनारण्यरक्षार्थं नियुक्तः। सेनापतिः करटकः समाज्ञापयति सत्वर मागच्छ नो चेदस्मादरण्याद्दूरमपसर। अन्यथा ते विरुद्धं फलं भविष्यति। न जाने क्रुद्धः स्वामी किं विधास्यति। ततो देशव्यवहारानभिज्ञः सञ्जीवकः सभयमुपसृत्य साष्टाङ्गपातं करटकं प्रणतवान्।

अथ सञ्जीवकः सशङ्कमाह। सेनापते किं मया कर्त्तव्यं तदभिधीयताम्। करटको ब्रूते वृषभ यद्यत्र कानने स्थातुमिच्छा वर्त्तते तदा देवपादारविन्दं गत्वा प्रणम। सञ्जीवको वदति तदभयवाचं प्रयच्छ आगच्छामि। करटकेनोक्तम् शृणु रे बलीवर्द्द अलमनया शङ्कया।

तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः।
समुच्छ्रितानेव तरून् प्रबाधते
महान् महत्येव करोति विक्रमम्॥ २७॥

ततस्तौ सञ्जीवकं नातिदूरे संस्थाप्य पिङ्गलकसमीपं गतौ। ततो राज्ञा सादरमालोकितौ प्रणम्योपविष्टौ। राजाह त्वं दृष्टः दमनको ब्रूते देव दृष्टः। यद्देवेनाकर्णितं तत्तथैव। महाबलोऽसौ देवं द्रष्टुमिच्छति। सज्जीभूयोपविश्यताम्। किन्तु शब्दमात्रान्न भेतव्यम्।

तथा चोक्तम्

शब्दमात्रान्न भेतव्यमज्ञात्वा शब्दकारणम्।
शब्दहेतुं परिज्ञाय कराला गौरवं गता ॥ २८ ॥

राजाह कथमेतत्‌ दमनकः कथयति। अस्ति श्रीपर्वतमध्ये ब्रह्मपुराख्यं नगरम्। तत्र शैलशिखरे घण्टाकर्णो नाम राक्षसः प्रतिवसतीति जनप्रवादः श्रूयते। एकदा घण्टामादाय पलायमानः कश्चिच्चौरो व्याघ्रेण व्यापादितः। तत्पाणिपतिता घण्टा वानरैः प्राप्ता। ते वानरास्तां घण्टामनुक्षणं वादयन्ति। ततो नगरजनैर्मनुष्यः खादितो दृष्टः प्रतिक्षणं घण्टारावश्च श्रूयते। अनन्तरं घण्टाकर्णः कुपितो मनुष्यान्‌ खादति घण्टां च वादयति इत्युक्त्वा जनाः सर्वे नगरात्‌ पलायिताः। ततः करालया नाम कयाचित्‌ वृद्धया मर्कटाः घण्टां वादयन्ति इति विमृश्य स्वयं विज्ञाय च राजा विज्ञापितः देव यदि कियद्धनोपक्षयः क्रियते तदाहमेनं घण्टाकर्णं साधयामि। ततो राज्ञा तुष्टेन तस्यै धनं दत्तम्। तया च मण्डलं कृत्वा तत्र गणेशादिगौरवं दर्शयित्वा स्वयं वानरप्रियफलान्यादाय वनं प्रविश्य च फलान्याकीर्णानि। ततो घण्टां परित्यज्य वानराः फलासक्ता बभूवुः। सा च घण्टां गृहीत्वा नगरमागता सकललोकपूज्याऽभवत्। अतोऽहं ब्रवीमि शब्दमात्रान्न भेतव्यमिति।

ततः सञ्जीवकमानीय दर्शनं कारितवन्तौ। पश्चात्‌ तत्रैव वने चिरमतिप्रियेण वसति। अथ कदाचित्‌ तस्य सिंहस्य भ्राता स्तब्धकर्णो नाम सिंहः समागतः। तस्यातिथ्यं कृत्वोपवेश्य पिङ्गलकस्तदाहाराय पशून्‌ हन्तुं चलितः। अत्रान्तरे सञ्जीवको वदति। देव अद्य हतमृगाणां मांसानि क्व। राजाह दमनककरटकौ जानीतः। सञ्जीवको

ब्रूते ज्ञायतां किमस्ति नास्ति वा। सिंहो विहस्याह नास्त्येव तत्। सञ्जीवको ब्रूते कथमेतावन्मांसं ताभ्यां खादितम्। राजाह खादितं व्ययितं अवधीरितञ्च प्रत्यह मेष क्रमः। सञ्जीवको ब्रूते कथं श्रीमद्देवपादानामगोचरेणैव क्रियते। राजाह मदीयागोचरेणैव क्रियते। सञ्जीवको ब्रूते नैतदुचितम्।

यतः

क्षिप्रमायमनालोच्य व्ययमानः स्ववाञ्छया।
अमणायत एवासौ धनी वैश्रवणोपमः॥ २८॥

तदाकर्ण्य स्तब्धकर्णो ब्रूते शृणु भ्रातः चिराश्रिता वेतौ दमनककरटकौ। सन्धिविग्रहकार्य्याधिकारिणौ। कार्य्याधिकारी न धनाधिकारे नियोक्तव्यः। पिङ्गलको ब्रूते अस्ति तावदेवं किन्तु एतौ सर्वथा न मम वचनकारौ। स्तब्धकर्णो ब्रूते एतत् सर्वथाऽनुचितम्। * तत् भ्रातः सर्वथा मद्वचनं क्रियताम्। अयं शस्यभक्षकः सञ्जीवको भोजनाधिकारे नियुज्यताम्। एतद्वचनात् तथानुष्ठिते सति पिङ्गलकसञ्जीवकयोः सर्वबन्धुपरित्यागेन महता स्नेहेन कालोऽतिवर्त्तते। ततोऽनुजीविनामप्याहारदाने शैथिल्यदर्शनात् दमनककरटकावन्योऽन्यं चिन्तयतः। तदाह दमनकः। किमत्र विधेयम् आत्मकृतोऽयं दोषः। स्वयं

*स्तब्धस्य नश्यति यशो विषमस्य मैत्री
नष्टेन्द्रियस्य कुलमर्थपरस्य धर्मः।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं
राज्यं प्रमत्तसचिवस्य नराधिपस्य॥

कृतेऽपि दोषे परिदेवनमप्यनुचितम्। त्वयां विमृश्य। मित्र सहसैव यथा अनयोः सौहार्द्दं मया कारितं तथा भेदोऽपि कार्य्यः।

यतः

अतथ्यान्यपि तथ्यानि दर्शयन्ति हि पेशलाः।
समे निम्नोन्नतानीव चित्रकर्म्मविदो जनाः॥ ३०॥

करटको ब्रूते अस्त्वेवं किन्त्वनयोर्महान् नैसर्गिकः स्नेहः कथं भेदयितुं शक्यः। दमनक आह परश्चिन्तनीयः।

तथा चोक्तम्

उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः।
काकी कनकसूत्रेण कृष्णसर्पमघातयत्॥ ३१॥

करटकः पृच्छति कथमेतत् दमनकः कथयति। कस्मिंश्चित् तरौ वायसदम्पती निवसतः। तयोश्चापत्यानि तरुकोटरावस्थितकृष्णसर्पेण खादितानि। ततः पुनर्गर्भवती वायसी ब्रूते स्वामिन् त्यज्यतामयं तरुः। अत्र यावत् कृष्णसर्पस्तावदावयोः सन्ततिः कदाचिदपि न भविष्यति।

यतः

दुष्टा भार्य्या शठं मित्रं भृत्यश्चोत्तरदायकः।
ससर्पे च गृहे वासो मृत्युरेव न संशयः॥ ३२॥

वायसो ब्रूते प्रिये न भेतव्यम्। वारं वारं मयैतस्य महापराधः सोढ़ः। इदानीं पुन र्न क्षन्तव्यः। वायस्याह कथमनेन बलवता कृष्णसर्पेण सार्द्धं भवान् विग्रहीतुं समर्थः। वायसो ब्रूते अलमनया चिन्तया।

यतः

बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम् ।
पश्य सिंहो मदोन्मत्तः शशकेन निपातितः ॥ ३३ ॥

वायस्याह कथमेतत् । वायसः कथयति । अस्ति मन्दरनाम्नि पर्वते दुर्दान्तो नाम सिंहः । स च सर्वदा पशूनां वधं विदधान एवास्ते । ततः सर्वैः पशुभिर्मिलित्वा स सिंहो विज्ञप्तः । देव किमर्थं सर्वपशुवधः क्रियते । वयमेव भवदाहारार्थं प्रत्यहमेकैकं पशुमुपढौकयामः । सिंहेनोक्तम् यद्येतदभिमतं भवतां तर्हि भवतु । ततः प्रभृति प्रत्यहमेकैकं पशुमुपकल्पितं भक्षयन्नास्ते । अथ कदाचित् कस्यापि वृद्धशशकस्य वारः प्राप्तः । ततः सोऽचिन्तयत् ।

त्रासहेतोर्विनीतिस्तु क्रियते जीविताशया ।
पञ्चत्वं चेद्गमिष्यामि किं सिंहानुनयेन मे ॥ ३४ ॥

तन्मन्दं मन्दमुपगच्छामि । ततः सिंहोपि क्षुधा पीड़ितः कोपात् तमुवाच कुतस्त्वं विलम्बादागतोऽसि । शशकोऽब्रवीत् नाहमपराद्धः । पथि सिंहान्तरेण बलाद्धृतः । तस्याग्रे पुनरागमनाय शपथं कृत्वा स्वामिनं निवेदयितुमत्रागतोऽस्मि । सिंहः सकोपमाह सत्वरं गत्वा मां दर्शय क्वासौ दुरात्मा तिष्ठति ततः शशकस्तं गृहीत्वा गम्भीरकूपसमीपमागतः । अत्रागत्य पश्यतु स्वामी इत्युक्त्वा तस्मिन् कूपजले तस्यैव प्रतिबिम्बं दर्शितवान् । ततोऽसौ दर्पाध्मातस्तस्योपरि आत्मानं निक्षिप्य पञ्चत्वं गतः । अतोऽहं ब्रवीमि बुद्धिर्यस्य इत्यादि ।

वायसी ब्रूते श्रुतं मया कर्त्तव्यतां ब्रूहि । वायसोऽवदत् प्रिये आसन्ने सरसि राजपुत्रः प्रतिदिनमागत्य स्नाति । तस्मिन् सोपानप्रस्तरे तदङ्गादवतारितं कनकसूत्रं चञ्च्वाधृत्वा आनीयास्मिन् कोटरेधार-

यिष्यसि। अथ कदाचित् कनकसूत्रं हृषदि संस्थाप्य स्नातुं प्रविष्टे राज पुत्त्रे वायस्या तदनुष्ठितम्। ततः कनकसूत्रानुसरणप्रवृत्तैः राजपुरुषैः कोटरे निरूप्यमाणः कृष्णसर्पो व्यापादितः। अतोऽहं ब्रवीमि उपायेन हि यच्छक्यमित्यादि।

करटक आह यद्येवं तर्हि गच्छ पन्थानः सन्तु ते शिवाः। ततो दमनकः पिङ्गलकसमीपं गत्वा प्रणम्योवाच। देव अत्यावश्यिकं मन्यमानो निवेदयितुमागतः।

भोगस्य भाजनं राजा मन्त्री कार्य्यस्य भाजनम्।
राजकार्य्यपरिध्वंसी मन्त्री दोषेण लिप्यते॥ २५॥

अमात्यानामेष क्रमः

वरं प्राणपरित्यागः शिरसो वापि कर्त्तनम्।
न तु स्वामिपदावाप्तिपातकेच्छोरुपेक्षणम्॥ २६॥

पिङ्गलकः सादरं ब्रूते अथ भवान् किं वक्तुमिच्छति। दमनक आह अयं तावत् सञ्जीवकस्तवोपरि असदृशव्यवहारी लक्ष्यते। तथा चास्मत्सन्निधाने स्वामिनः शक्तित्रयनिन्दां कृत्वा राज्यमेवाभिलषति। एतच्छ्रुत्वा पिङ्गलकः सभयं साश्चर्य्यं तूष्णीं स्थितः। दमनकः पुनराह देव सर्व्वामात्यपरित्यागं कृत्वा त्वयैवायं सकलकार्य्याधिकारे नियुक्तः। अयं च महान् दोषः।

यः कुर्य्यात् सचिवायत्तां श्रियं तद्व्यसने सति।
सोऽन्धवज्जगतीपालः सीदेत् सञ्चारकैर्विना॥ २७॥

स च सर्वकार्य्येषु स्वेच्छातः प्रवर्त्तते। तदत्र स्वामी प्रमाणम्। सिंहो विमृश्याह भद्र यद्यपि एवं तथापि सञ्जीवकेन सह मम महान् स्नेहः।

पश्य

कुर्व्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः ।
अशेषदोषदुष्टोऽपि कायः कस्य न वल्लभः ॥ ३८ ॥

दमनको वदति देव स एव दोषः । त्वया च मूलभृत्यानपास्य अयमागन्तुकः पुरस्कृतः । एतच्चानुचितं कृतम् । सिंहो ब्रूते महदाश्चर्य्यम् । यन्मयाऽयमभयवाचं दत्त्वानीतः संवर्द्धितश्च तत् कथं द्रुह्यति । दमनको वदति । देव

वर्द्धनं चाथ सम्मानं खलानां प्रीतये कुतः ।
फलन्त्यमृतसेकेऽपि न पथ्यानि विषद्रुमाः ॥ ३९ ॥

यदि सञ्जीवकव्यसनार्दितो विज्ञापितोऽपि स्वामी न निवर्त्तते तदा भृत्यस्य न दोषः ।

पिङ्गलकः स्वगतम्

न परस्यापवादेन परेषां दण्डमाचरेत् ।
आत्मनावगमं कृत्वा बध्नीयात् पूजयेत वा ॥ ४० ॥

प्रकाशं ब्रूते तदा सञ्जीवकः किं प्रत्यादिश्यताम् । दमनकः ससम्भ्रममाह देव मा मैवं तावत् । मन्त्रभेदो जायते । तदवश्यं समारम्भं महता प्रयत्नेन सम्पादनीयम् । यदि असौ दृष्टदोषोऽपि दोषान्निवर्त्तेत सन्धातव्यस्तदतीवानुचितम् ।

यतः

सकृद्दुष्टं यो नु मित्रं पुनः सन्धातुमिच्छति ।
स मृत्युमेव गृह्णाति गर्भमश्वतरी यथा ॥ ४१ ॥

सिंहो ब्रूते ज्ञायतां तावत् किमस्माकमसौ कर्तुं समर्थः । दमनक आह देव

अङ्गाङ्गिभावमज्ञात्वा कथं सामर्थ्यनिर्णयः।
पश्य टिट्टिभमात्रेण समुद्रो व्याकुलीकृतः॥ ४२॥

सिंहः पृच्छति कथमेतत् दमनकः कथयति। समुद्रतीरे टिट्टिभदम्पती निवसतः। अथ टिट्टिभी आसन्नप्रसवा भर्त्तारमाह नाथ प्रसवयोग्यस्थानं अन्विष्यताम्। टिट्टिभोऽवदत् नन्विदमेवस्थानंप्रसूतियोग्यम्। सा ब्रूते समुद्रवेलया प्लाव्यते स्थानमेतत्। सोऽब्रवीत् भद्रे किमहं निर्बलः? मम गृहावस्थितान्यण्डानि समुद्रेणापहर्त्तव्यानि। टिट्टिभी विहस्याह नाथ त्वया समुद्रेण च महदन्तरम्

अनुचितकर्मारम्भः स्वजनविरोधो बलीयसा स्पर्द्धा।
प्रमदाजनविश्वासो मृत्योर्द्वाराणि चत्वारि॥ ४३॥

ततः स्वामिवचनात् तत्रैव प्रसूता सा। एतत् सर्वं श्रुत्वा समुद्रेणापि तच्छक्तिज्ञानार्थिना तदण्डान्यपहृतानि। ततस्तु टिट्टिभी शोकार्त्ता भर्त्तारमाह नाथ कष्टमापतितम् अण्डानि मे नष्टानि। टिट्टिभोऽवदत् प्रिये मा भैषीः। इत्युक्त्वा पक्षिणां मेलकं कृत्वा पक्षिस्वामिनो गरुड़स्य समीपं गतः निजाण्डानां विनाशकथां निवेदयमास। ततस्तेन गरुत्मता तद्वचनमाकर्ण्य प्रभुर्भगवान नारायणः सृष्टिस्थितिप्रलयहेतुर्विज्ञप्तः। ततो भगवदाज्ञां मौलौ निधाय समुद्रसमीपं गतः। ततस्तद्वचनमाकर्ण्य समुद्रस्तान्यण्डानि समर्पितवान्। अतोऽहं ब्रवीमि अङ्गाङ्गिभावमज्ञात्वा इत्यादि।

राजाह कथममौ ज्ञातव्यो द्रोहबुद्धिरिति। दमनकः पुनराह यदासौ श्रृङ्गाग्रप्रहरणाभिमुखश्चकित इवागच्छति, तदा ज्ञास्यति स्वामी। एवमुक्त्वा सञ्जीवकसमीपं गतः। तत्र गतश्च मन्दं मन्दमुपसर्पन्

विस्मितमिवात्मानमदर्शयत् । ततः स सञ्जीवकेन सादरमुक्तः भद्र दमनक कुशलं ते दमनको ब्रूते अनुजीविनां कुतः कुशलम् । *

यतः

सम्पत्तयः पराधीनाः सदा चित्तमनिर्वृतम् ।
स्वजीवितेऽप्यविश्वासस्तेषां ये राजसंश्रयाः ॥ ४४ ॥

सञ्जीवकेनोक्तम् सखे ब्रूहि किमेतत् । दमनक आह किं ब्रवीमि मन्दभाग्यः ।

यथा समुद्रे निमग्नो लब्ध्वा सर्पावलम्बनम् ।
न मुञ्चति न चाधत्ते तथा मुग्धोऽस्मि सम्प्रति ॥ ४५ ॥
एकत्र राजविश्वासो नश्यत्यन्यत्र बान्धवः ।
किं करोमि क्व गच्छामि पतितो दुःखसागरे ॥ ४६ ॥

इत्युक्त्वा दीर्घं निश्वस्योपविष्टः । सञ्जीवको ब्रूते तथापि सुविस्तरं मनोगतं मित्र कथ्यताम् । दमनकः सुनिभृतमाह यद्यपि राजविश्वासोऽन्यस्मै न कथनीयस्तथापि भवानस्मदीयप्रत्ययादागतः स्थितश्च । तन्मया परलोकार्थिनाऽवश्यं तव हितमाख्येयम् । शृणु स्वामी तवोपरि विकृतबुद्धी रहस्येवमुक्तवान् । सञ्जीवकमेव हत्वा स्वपरिवारं तर्पयामि । एतच्छ्रुत्वा सञ्जीवकः परं विषादमगमत् । दमनकः पुनराह अलं विषा-

* कोऽर्थान् प्राप्य न गर्वितो विषयिणः कस्यापदोऽस्तङ्गताः
स्त्रीभिः कस्य न खण्डितं भुवि मनः को वास्ति राज्ञां प्रियः ।
कः कालस्य भुजान्तरं न च गतः कोऽर्थी गतो गौरवम्
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ॥

देन प्राप्तकालकार्य्यमनुष्ठीयताम्। सञ्जीवकः स्वगतं विमृश्याह कष्टं किमिदमापतितम्। तदयमशक्यार्थः प्रयत्नः।

यतः

आराध्यमानो नृपतिः प्रयत्नान्न तोषमायाति किमत्र चित्रम्।
अयं त्वपूर्वः प्रतिमाविशेषो यः सेव्यमानो रिपुतामुपैति ॥ ४७ ॥
निमित्तमुद्दिश्य हि यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रसीदति।
अकारणद्वेषि मनस्तु यस्य वै कथं जनस्तं परितोषयिष्यति ॥४८॥

किं मयापकृतं राज्ञः अथवा निर्निमित्तापकारिणो हि राजानः। * दमनको ब्रूते अयं तावत् स्वामी वाङ्मधुरः विषहृदयो मया ज्ञायते। सञ्जीवकः स्वगतम्। कष्टं भोः कथमहं शस्यभक्षकः सिंहेन व्यापादयितव्यः। पुनर्विचिन्त्याह केनायं राजा ममोपरि विकारितः। भेदमुपगता द्राज्ञः सदा भेतव्यम्। तत्संग्रामे मृत्युरेवाश्रीयताम्। इदानीं तदाज्ञानुवर्त्तनमयुक्तम्। एतच्चिन्तयित्वा सञ्जीवक आह भो मित्र कथमसौ मां जिघांसुरिति ज्ञातव्यः। दमनको ब्रूते यदासौ स्तब्धकर्णः समुद्धतलाङ्गूलः उन्नतचरणो विवृतास्यस्त्वां पश्यति तदा त्वमपि स्वविक्रमं दर्शयिष्यसि।

यतः

बलवानपि निस्तेजाः कस्य नाभिभवास्पदम्।
निःशङ्कं दीयते लोकैः पश्य भस्मचये पदम् ॥ ४९ ॥

* कृतशतमसत्सु नष्टं सुभाषितं च नष्टमबुधेषु।
वचनशतमवचनकरे बुद्धिशतमचेतने नष्टम् ॥

किन्तु सर्वमेतत् सुगममनुष्ठातव्यं नो चेन्न त्वं नाहमित्युक्त्वा दमनकः करटकसमीपं गतः। करटकेनोक्तम् किं निष्पन्नम्। दमनक उवाच निष्पन्नः अनयोरन्योऽन्यभेदः। करटकेनोक्तं कोऽत्र सन्देहः।

बन्धुः को नाम दुष्टानां कुप्येत् को नातियाचितः।
को न दृप्यति वित्तेन कुकृत्ये को न पण्डितः॥ ५० ॥

ततो दमनकः पिङ्गलकसमीपं गत्वा देव समागतोऽसौ पापाशयस्तत् सज्जीभूय स्थीयतामित्युक्त्वा पूर्वोक्ताकारं कारयामास। सञ्जीवकोऽप्यागत्य तथाविधं विकृताकारं सिंहं दृष्ट्वा स्वानुरूपं विक्रमं चकार। ततस्तयोः प्रवृत्ते महाहवे सञ्जीवकः सिंहेन व्यापादितः। अथ पिङ्गलकः सञ्जीवकं सेवकं व्यापाद्य विश्रान्तः सशोक इवासीनः ब्रूते किं मया दारुणं कर्म कृतम्।

यतः

परैः सम्भुज्यते राज्यं स्वयं पापस्य भाजनम्।
धर्मातिक्रमतो राजा सिंहो हस्तिवधादिव॥ ॥ ५१ ॥

दमनको ब्रूते स्वामिन् कोऽयं नूतनो न्यायः। यदरातिं हत्वा सन्तापः क्रियते। यतः

धर्मार्थकामतत्त्वज्ञो नैकान्तकरुणो भवेत्।
न हि हस्तस्थमप्यर्थं क्षमावान् रक्षितुं क्षमः॥ ५२ ॥

किञ्च

क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम्।
अपराधिषु सत्त्वेषु नृपाणां सैव दूषणम्॥ ५३ ॥

इति कपटवचनेन सन्तोषितः स्वां प्रकृतिमापन्नः पिङ्गलकः सिंहासने समुपविष्टः । दमनकः प्रहृष्टमना भूत्वा राजानमाह विजयतां महाराजः शुभमस्तु सर्व्वजगतामित्युक्त्वा यथासुखमवस्थितः ।

विष्णुशर्मोवाच सुहृद्भेदः श्रुतः । राजपुत्रा ऊचुः सुखिनो वयम् । विष्णुशर्माऽब्रवीत् । अपरमपीदमस्तु ।

सुहृद्भेदस्तावद्भवतु भवतां शत्रुनिलये
खलः कालाकृष्टः प्रलयमुपसर्पत्वहरहः ।
जनो नित्यं भूयात् सकलसुखसम्पत्तिवसतिः
कथारामे रम्ये सततमिह बालोऽपि रमताम् ॥ ५४॥

इति विष्णुशर्मसंगृहीते हितोपदेशे सुहृद्भेदो नाम

द्वितीयः कथासंग्रहः ।

विग्रहः ।

पुनः कथारम्भकाले राजपुत्रैरुक्तम् आर्य्य राजपुत्रा वयं तद्विग्रहं श्रोतुं नः कुतूहलमस्ति । विष्णुशर्म्मोवाच यदेव भवद्भ्यो रोचते तत्कथयामि । विग्रहः श्रूयतां यस्यायमाद्यः श्लोकः

हंसैः सह मयूराणां विग्रहे तुल्यविक्रमे ।
विश्वास्य वञ्चिता हंसाः काकैः स्थित्वारिमन्दिरे ॥ १ ॥

राजपुत्रा ऊचुः कथमेतत् । विष्णुशर्मा कथयति । अस्ति कर्पूरद्वीपे पद्मकेलिनामधेयं सरः । तत्र हिरण्यगर्भो नाम राजहंसः प्रतिवसति । स च सर्व्वैर्जलचरैः पक्षिभिर्मिलित्वा पक्षिराज्ये ऽभिषिक्तः ।

यतः

यदि न स्यान्नरपतिः सम्यङ् नेता ततः प्रजा ।
अकर्णधारा जलधौ विप्लवेतेह नौरिव ॥ २ ॥

एकदासौ राजहंसः सुविस्तीर्णकमलपर्य्यङ्के सुखासीनः परिवार-परिवृतस्तिष्ठति । ततः कुतोऽपि देशादागत्य दीर्घमुखो नाम बकः प्रणम्योपविष्टः । राजोवाच दीर्घमुख देशान्तरादागतोऽसि वार्त्तां कथय । स ब्रूते देव अस्ति महती वार्त्ता । तामाख्यातुकाम एव सत्वरमागतोऽहम् श्रूयताम् ।

अस्ति जम्बुद्वीपे विन्ध्यो नाम गिरिः । तत्र चित्रवर्णो नाम मयूरः पक्षिराजो निवसति । तस्यानुचरैरहं दग्धारण्यमध्ये चरन्नवलोकितः

एहस्व कस्त्वं कुतः समागतोऽसि। ततो मयोक्तम् अहं कर्पूरद्वीपस्य राज्ञो हिरण्यगर्भस्यानुचरः। कौतुकाद्देशान्तरं द्रष्टुमागतोऽस्मि। तच्छ्रुत्वा पक्षिभिरुक्तम् अनयोः कीदृशो देशः भद्रतरो राजा वा। ततो मयोक्तम् आः किमेवमुच्यते महदन्तरम्। यतः कर्पूरद्वीपः स्वर्गैकदेशः राजा च द्वितीयस्वर्गपतिः कथं वर्णयितुं शक्यते। अत्र मरुस्थले पतिता यूयं किं कुरुथ। आगच्छतास्मद्देशे गम्यताम्। ततस्तद्वचनमाकर्ण्य पक्षिणः सकोपा बभूवुः।

तथाचोक्तम्

पयःपानं भुजङ्गानां केवलं विषवर्द्धनम्।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये॥ ३॥

अन्यच्च

विद्वानेवोपदेष्टव्यो नाविद्वांस्तु कदाचन।
वानरानुपदिश्याज्ञान् स्थानभ्रष्टा ययुः खगाः॥ ४॥

राजोवाच कथमेतत्। दीर्घमुखः कथयति। अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मलीतरुः। तत्र निर्मितेषु नीड़ेषु पक्षिणः सुखेन वर्षास्वपि निवसन्ति। अथ नीलपटैरिव जलधरपटलैरावृते नभस्तले धारासारैर्महती वृष्टिर्बभूव। ततो वानरांस्तरुतलेऽवस्थितान् शीतार्त्तान् कम्पमानानवलोक्य पक्षिभिरुक्तम् भो भो वानराः श्रूयताम्।

अस्माभिर्निर्म्मिता नीड़ाश्चञ्चुमात्राहृतैस्तृणैः।
हस्तपादादिसंयुक्ता यूयं किमवसीदथ॥ ५॥

तच्छ्रुत्वा वानरैर्जातामर्षैरालोचितम्। अहो निर्वातनीड़गर्भावस्थिताः सुखिनः पक्षिणोऽस्मान् निन्दन्ति। तद्भवतु तावद्वृष्टेरुप-

श्रमः। अनन्तरं श्रान्ते पानीयवर्षे तैर्वानरैर्वृक्षमारुह्य सर्वे नीड़ा भग्नाः। तेषां पक्षिणामण्डानि चाधःपातितानि। अतोऽहं ब्रवीमि विद्वानेवोपदेष्टव्य इत्यादि।

राजोवाच तदा पक्षिभिः किमुक्तम्। दीर्घमुखः कथयति ततः पक्षिभिः कोपादुक्तम्। केनासौ राजहंसः कृतो राजा। ततो मयो पजातकोपेनोक्तम् अयं ते मयूरः केन राजा कृतः। तच्छ्रुत्वा ते पक्षिणो मां हन्तुमुद्यताः ततो मयापि सुविक्रमो दर्शितः।

राजा विहस्याह

आत्मनश्च परेषाञ्च यः समीक्ष्य बलाबलम्।
अन्तरं नैव जानाति स तिरस्क्रियतेऽरिभिः॥ ६॥

अन्यच्च

सुचिरं हि चरन्नित्यं क्षेत्रे शस्यमबुद्धिमान्।
द्वीपिचर्मपरिच्छन्नो वाग्दोषाद्गर्दभो हतः॥ ७॥

बकः पृच्छति कथमेतत् राजा कथयति। अस्ति हस्तिनापुरे विलासो नाम रजकः। तस्य गर्द्दभोऽतिभारवाहनाद्दुर्बलो मुमूर्षुरभवत्। ततस्तेन रजकेनासौ व्याघ्रचर्मणा प्रच्छाद्यारण्यसमीपे शस्यक्षेत्रे मोचितः। ततो दूरादवलोक्य व्याघ्रबुद्ध्या क्षेत्रपतयः सत्वरं पलायन्ते। अथ केनापि शस्यरक्षकेण धूसरकम्बलकृततनुत्राणेन धनुष्काण्डं सज्जीकृत्यावनतकायेन एकान्ते स्थितम्। ततस्तं च दूरे दृष्ट्वा गर्द्दभः पुष्टाङ्गो गर्दभोऽयमिति मत्वा शब्दं कुर्वाणस्तदभिमुखं धावितः। ततस्तेन शस्यरक्षकेण गर्द्दभोऽयमिति ज्ञात्वा लीलयैव व्यापादितः। अतोऽहं ब्रवीमि सुचिरं हि चरन्नित्यमित्यादि।

दीर्घमुखो ब्रूते पश्चात् तैः पक्षिभिरुक्तम् । अरे पाप दुष्ट बक अस्माकं भूमौ चरन्नस्माकं स्वामिनमधिक्षिपसि । तन्न क्षन्तव्यमिदानीम् । इत्युक्त्वा सर्वे मां चञ्चुभिर्हत्वा सकोपा ऊचुः पश्य रे मूर्ख स हंस स्तव राजा सर्वथा मृदुस्तस्य राज्याधिकारो नास्ति । यतः एकान्ततो मृदुः करतलगतमप्यर्थं रक्षितुमक्षमः । कथं स पृथिवीं शास्ति राज्यं वा तस्य किम् । त्वं च कूपमण्डूकस्तेन तदाश्रयमुपदिशसि ।

शृणु

सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
यदि दैवात् फलं नास्ति छाया केन निवार्य्यते ॥८॥
हीनसेवा न कर्त्तव्या कर्त्तव्यो महदाश्रयः ।
पयोऽपि शौण्डिकी हस्ते वारुणीत्यभिधीयते ॥ ९ ॥
व्यपदेशेऽपि सिद्धिः स्यादतिशक्ते नराधिपे ।
शशिनो व्यपदेशेन वसन्ति शशकाः सुखम् ॥ १० ॥

मयोक्तम् कथमेतत् पक्षिणः कथयन्ति । कदाचिद्वर्षास्वपि वृष्टेरभावात् तृषार्त्तो गजयूथो यूथपतिमाह नाथ कोऽप्युपायोऽस्माकं जीवनाय । नास्ति क्षुद्रजन्तूनां निमज्जनस्थानं । वयं च निमज्जनाभावा दन्धा इव क्व यामः किं वा कुर्मः । ततो हस्तिराजो नातिदूरं गत्वा निर्मलं ह्रदं दर्शितवान् । अनन्तरं तत्तीरस्थिताः शशकाः गजयूथपादाहतिभिश्चूर्णिताः । अनन्तरं शिलीमुखो नाम शशकश्चिन्तयामास अनेन गजयूथेन पिपासाकुलितेन प्रत्यहमत्रागन्तव्यम् । अतो विनष्टमस्मत्कुलम् । ततो विजयो नाम वृद्धशशकोऽवदत् । मा विषीदत प्रतीकारो मया कर्त्तव्यः इति प्रतिज्ञाय चलितः । गच्छता च तेना-

लोचितम् । कथं मया गजयूथपनिकटे गत्वा वक्तव्यम् । अतोऽहं पर्वतशिखरमारुह्य यूथनाथमभिवादयामि । तथानुष्ठिते सति यूथनाथ उवाच कस्त्वं कुतः समायातः । स ब्रूते दूतोऽहं भगवता चन्द्रेण प्रेषितः । यूथपतिराह कार्य्यमुच्यताम् । विजयो वदति

उद्यतेष्वपि शस्त्रेषु दूतो वदति नान्यथा ।
सदैवावध्यभावेन यथार्थस्य हि वाचकः ॥ ११ ॥

तदहं तदाज्ञया ब्रवीमि शृणु । यदेते शशकाश्चन्द्रसरोरक्षकास्त्वया निःसारितास्तन्न युक्तं कृतम् । यतो रक्षकास्ते शशकाः मदीयाः । अतएव मे शशाङ्क इति प्रसिद्धिः । एवमुक्तवति दूते यूथपतिर्भयादिदमाह देव इदमज्ञानतः कृतम् पुनर्न गमिष्यामि । दूत उवाच तदत्र सरसि भगवन्तं चन्द्रमसं कोपात् प्रकम्पमानं प्रणम्य प्रसाद्य च गच्छ । ततस्तेन रात्रौ नीत्वा तत्र जले चञ्चलं चन्द्रप्रतिबिम्बं दर्शयित्वा स यूथपतिः प्रणामं कारितः । देव अनेनाज्ञानेनापराधः कृतः । तत् क्षम्यतामित्युक्त्वा तेन शशकेन स यूथपतिः प्रस्थापितः । अतोऽहं ब्रवीमि व्यपदेशेऽपि सिद्धिः स्यादित्यादि ।

ततो मयोक्तम् । स एवास्मत्प्रभुर्महाप्रतापऽति समर्थः त्रैलोक्यस्यापि प्रभुत्वं तत्र युज्यते किम्पुनाराज्यमिति । तदाहं तैः पक्षिभिः दुष्ट कथमस्मद्भूमौ चरसि इत्यभिधाय चित्रवर्णस्य राज्ञः समीपं नीतः । ततो राज्ञः पुरतो मां प्रदर्श्य तैः प्रणम्योक्तम् । देव अवधीयताम् । एष दुष्टबकोऽस्मद्देशे चरन्नपि देवपादानधिक्षिपति । राजाह कोऽयं कुतः समायातः त ऊचुः हिरण्यगर्भनाम्नो राजहंसस्यानुचरः कर्पूरद्वीपादागतः । अथाहं गृध्रेण मन्त्रिणा पृष्टः कस्तत्र मुख्यो

मन्त्रीति। मयोक्तम् सर्वशास्त्रार्थपारगः सर्वज्ञो नाम चक्रवाकः। गृध्रो ब्रूते युज्यते स्वदेशजोऽसौ।

यतः

स्वदेशजं कुलाचारं विशुद्धमुपधाशुचिम्
शास्त्रज्ञमव्यसनिनं व्यभिचारविवर्जितम्।
अधीतव्यवहारज्ञं ख्यातं मौलं विपश्चितम्।
अर्थस्योत्पादकं सम्यङ् निदध्यात् मन्त्रिणं नृपः॥ १२ ॥

अत्रान्तरे शुकेनोक्तम् देव कर्पूरद्वीपादयो लघुद्वीपा जम्बुद्वीपान्तर्गता एव तत्रापि देवपादानामाधिपत्यम्। ततो राज्ञाप्युक्तम् एवमेव। मयोक्तम् यदि वचसैव तत्रापि श्रीमद्देवपादानामाधिपत्यं सिध्यति तदा जम्बुद्वीपेऽप्यस्मत्प्रभोर्हिरण्यगर्भस्य स्वाम्यमस्ति। शुक उवाच कथमत्र निर्णयः। मयोक्तम् संग्राम एव। राज्ञा विहस्योक्तं स्वस्वामिनं गत्वा सज्जीकुरु। तदा मयोक्तम् स्वदूतोऽपि प्रस्थाप्यताम्। राजाह कः प्रयातु दौत्येन। गृध्रो वदति सन्त्येव बहवः किन्तु ब्राह्मण एव दूतः कर्त्तव्यः। राजाह ततः शुक एव व्रजतु। शुक त्वमेवानेन सह तत्र गत्वा अस्मदभिलषितं ब्रूहि। शुकोऽवदत्। यथाज्ञापयति देवः किन्त्वयं दुर्जनो बकः। दुर्जनेन सह न व्रजामि।

न स्थातव्यं न गन्तव्यं दुर्जनेन समं क्वचित्।
काकसङ्गाद्धतो हंसस्तिष्ठन् गच्छंश्च वर्त्तकः॥ १३ ॥

राजोवाच कथमेतत् शुकः कथयति। अस्त्युज्जयिनीवर्त्मनि प्रान्तरे महान् पिप्पलवृक्षः। तत्र हंसकाकौ निवसतः। कदाचित्

ग्रीष्मसमये परिश्रान्तः कश्चित् पथिकस्तत्र तरुतले धनुष्काण्डं निधाय सुप्तः । ततः क्षणान्तरं तन्मुखात् वृक्षच्छायाऽपगता । अनन्तरं सूर्य्य-तेजसा तन्मुखं व्याप्तमवलोक्य कृपया पुण्यात्मना तत्पिप्पलवृक्षस्थितेन हंसराजेन पक्षौ प्रसार्य्य पुनस्तन्मुखे छाया कृता । ततो निर्भरं निद्रासुखिना पथि भ्रमणाकुलेन परिश्रान्तेन पान्थेन मुखव्यादानं कृतम् । अनन्तरं स्वभावदौर्जन्येन परसुखमसहिष्णुः स काकस्तस्य मुखे पुरीषोत्सर्गं कृत्वा पलायितः । ततो यावदसावुत्थाय ऊर्द्धं निरीक्षते तावत् तेनावलोकितो हंसः काण्डेन हतः । अतोऽहं ब्रवीमि न स्थातव्यमित्यादि ।

उक्तञ्च

त्यज दुर्जनसंसर्गं भज साधुसमागमं ।
कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम् ॥ १४ ॥

दव वर्त्तकवार्त्तामपि कथयामि । एका कथा स्थितेरियम् द्वितीया गमनस्य कथा । एकः काको वृक्षशाखायां स्वपिति वर्त्तक श्चाधस्ताद्भूमौ निवसति । एकदा सर्वे पक्षिणो भगवतो गरुड़स्य यात्राप्रसङ्गेन समुद्रतीरं प्रचलिताः । तत्र काकेन सह वर्त्तकश्चलितः । अथ गच्छतो गोपालस्य मस्तकावस्थितभाण्डात् दधि वारं वारं तेन काकेन खाद्यते । ततो यावदसौ दधिभाण्डं भूमौ निधाय ऊर्द्ध-मवलोकते तावत् काकवर्त्तकौ दृष्टौ । ततस्तेन दृष्टः काकः पलायितः वर्त्तको मन्दगतिस्तेन प्राप्तो व्यापादितः । अतोऽहं ब्रवीमि न गन्तव्यमित्यादि ।

ततो मयोक्तम्। भातः शुक किमेवं ब्रवीषि मां प्रति यथा श्रीमद्देवपादास्तथा भवानपि। शुको ब्रूते अस्त्येवम् किन्तु

दुर्जनैरुच्यमानानि सस्मितानि प्रियाण्यपि।
अकालकुसुमानीव भयं सञ्जनयन्ति मे ॥ १५ ॥

दुर्जनत्वं च तव वाग्व्यापारादेव प्रत्यक्षीकृतम्। यतः तयोर्भूपालयो विग्रहे भवद्वचनमेव निदानम्। ततोऽहं तेन राज्ञा यथाव्यवहारं सम्पूज्य प्रस्थापितः। शुकोऽपि मम पश्चादागच्छन्नास्ते। एतत् सर्वं ज्ञात्वा यथाकार्य्यमनुसन्धीयताम्। चक्रवाको विहस्याह देव बकेनैतावद्देशान्तरं गत्वा यथाशक्ति राजकार्य्यमनुष्ठितम्। किन्तु स्वभाव एष मूर्खाणाम्।

शतं दद्यान्न विवदेदिति विज्ञस्य सम्मतम्।
विना हेतुमपि द्वन्द्वमिति मूर्खस्य लक्षणम् ॥ १६ ॥

राजाह अलमनेनातीतोपालम्भेन। प्रस्तुतमनुसन्धीयताम्। चक्रवाको ब्रूते देव विजने ब्रवीमि। ततो राजा मन्त्री च स्थितौ तत्र अन्येऽन्यत्र गताः। चक्रवाको ब्रूते देव अहमेवं जानामि कस्याप्यस्मन्नियोगिनः प्रेरणया बकेनेदमनुष्ठितम्।

यतः

वैद्यानामातुरः श्रेयान् व्यसनी यो नियोगिनाम्।
विदुषां जीवनं मूर्खः सद्वर्णो नृपतेर्जनः ॥ १७ ॥

राजाब्रवीत् भवतु कारणमत्र पश्चान्निरूपणीयम्। सम्प्रति यत् कर्त्तव्यं तद् ब्रूहि। चक्रवाको ब्रूते देव प्रणिधिस्तावत् तत्र यातु ततस्तदनुष्ठानं बलाबलं च जानीमः।

भवेत् स्वपरराष्ट्राणां कार्य्याकार्य्यावलोकने ॥
चारश्चक्षुर्महीभर्त्तुर्यस्य नास्त्यन्ध एव सः ॥ १८ ॥

स च द्वितीयं विश्वासपात्रं गृहीत्वा यातु । तेनासौ स्वयं तत्रावस्थाय द्वितीयं तत्रत्यमन्त्रकार्य्यं सुनिभृतं निश्चित्य निगद्य च प्रस्थापयतु । गूढ़चारश्च यो जले स्थले चरति । ततोऽसावेव बको नियुज्यताम् । एतादृश एव कश्चिद् बको द्वितीयत्वेन प्रयातु तद्गृहलोकाश्च राजद्वारे तिष्ठन्तु । किन्तु देव एतदपि सुगुप्तमनुष्ठातव्यम् ।

यतः

षट्कर्णो भिद्यते मन्त्रस्तथा प्राप्तश्च वार्त्तया ।
इत्यात्मना द्वितीयेन मन्त्रः कार्य्यो महीभृता ॥ १९ ॥

राजा विमृश्योवाच प्राप्तस्तावन्मया प्रणिधिः । मन्त्री ब्रूते देव संग्रामे जयोऽपि प्राप्तः । अत्रान्तरे प्रतीहारः प्रविश्य प्रणम्योवाच देव जम्बुद्वीपादागतो द्वारि शुकस्तिष्ठति । राजा चक्रवाकमालोकते । चक्रवाकेनोक्तम् । कृतावासे गत्वा तावद्भवतु पश्चादानीय द्रष्टव्यः । यथाज्ञापयति देवः इत्यभिधाय प्रतीहारः शुकं गृहीत्वा गतः । राजाह विग्रहस्तावदुपस्थितः । चक्रवाको ब्रूते देव तथापि सहसा विग्रहो न विधिः ।

साम्ना दानेन भेदेन समस्तैरथ वा पृथक् ।
साधितुं प्रयतेतारीन् न युद्धेन कदाचन ॥ २० ॥
सर्व एव जनः शूरो ह्यनासादितविग्रहः ।
अदृष्टपरसामर्थ्यः सदर्पः को भवेन्न हि ॥ २१ ॥

किन्तु विग्रहमुपस्थितं विलोक्य व्यवक्रियताम्। * विशेषतश्च देव महाबलोऽसौ राजा चित्रवर्णः।

कौर्म्मं सङ्कोचमास्थाय प्रहारमपि मर्षयेत्।
प्राप्तकालस्तु नीतिज्ञ उत्तिष्ठेत् क्रूरसर्पवत्॥ २२॥

अतो दूतोऽयं सुक्तोऽत्राश्वास्य तावद्ध्रियतां यावद्दुर्गं सज्जीक्रियते। राजाह दुर्गानुसन्धाने को नियुज्यताम्। चक्रवाको ब्रूते

यो यत्र कुशलः कार्य्ये तं तत्र विनियोजयेत्।
कार्य्येष्वदृष्टकर्म्मा यो शास्त्रज्ञोऽपि विमुह्यति॥ २३॥

तदाहूयतां सारसः। तथानुष्ठिते सति समागतं सारसमालोक्य राजोवाच सारस त्वं सत्वरं दुर्गमनुसन्धेहि। सारसः प्रणम्योवाच देव दुर्गं तावदिदमेव चिरात् सुनिरूपितमास्ते महत् सरः। किन्त्वेतन्मध्यद्वीपे भक्ष्यवस्तूनां संग्रहः क्रियताम्। राजाह सत्वरं गत्वा सर्वमनुष्ठीयताम्। पुनः प्रविश्य प्रतीहारो ब्रूते देव सिंहलद्वीपादागतो मेघवर्णो नाम वायसराजो द्वारि वर्त्तते। स च परिवारस्तत्तः प्रणमति देवपादान् द्रष्टुमिच्छति च। राजाह काकः प्राज्ञः बहुदृश्वा च तद्भवति स संग्राह्यः। चक्रवाको ब्रूते देव अस्त्वेवं किन्त्वसद्विपक्षः काकः स्थलचरः तेनास्मद्विपक्षे नियुक्तः कथं सङ्गृह्यते।

---

* यथा कालकृतोद्योगात् कृषिः फलवती भवेत्।
तद्वन्नीतिरियं देव चिरात् फलति न क्षणात्॥

तथा चोक्तम्

आत्मपक्षपरित्यागात् परपक्षे च यो रतः।
स परैर्हन्यते मूढो नीलवर्णशृगालवत् ॥ २४ ॥

राजोवाच कथमेतत्। मन्त्री कथयति। अस्ति शृगालः कश्चित् स्वेच्छया नगरोपान्ते भ्रमन् नीलसन्धानभाण्डे निपतितः। पश्चादुत्थातुमसमर्थः प्रातरात्मानं मृतवत् सन्दर्श्य स्थितः। अथ नीलीभाण्डस्वामिनाऽसावुत्थाप्य दूरे नीत्वा परित्यक्तः। ततोऽसौ वनं गत्वा आत्मानं नीलवर्णमवलोक्याचिन्तयत्। अहमिदानीं उत्तमवर्णस्तदात्मनः किमुत्कर्षं न साधयामि। इत्युक्त्वा शृगालानाहूय तेनोक्तम्। अहं भगवत्या वनदेवतया स्वहस्तेनारण्यराज्ये सर्वौषधिरसेनाभिषिक्तः। पश्यन्तु मम वर्णम्। तदद्यारभ्य अस्मदाज्ञयाऽस्मिन्नरण्ये व्यवहारः कार्यः। शृगालाश्च तं विशिष्टवर्णमवलोक्य साष्टाङ्गपातं प्रणम्योचुः यथाज्ञापयति देवः। इत्यनेन क्रमेण सर्वेष्वरण्यवासिष्वाधिपत्यं तस्य बभूव। ततस्तेन स्वज्ञातिभिरावृतेनाधिक्यं साधितम्। ततस्तेन सिंहव्याघ्रादीनुत्तमपरिजनान् प्राप्य शृगालानवलोक्य लज्जमानेनावज्ञाय दूरीकृताः स्वज्ञातयः। ततो विषण्णान् शृगालानवलोक्य केनचित् वृद्धशृगालेन प्रतिज्ञातम्। मा विषदत यदनेनानीतिज्ञेन वयं मर्मज्ञाः परिभूताः। तद्यथाऽयं नश्यति तन्मया विधेयम्। यतोऽत्र व्याघ्रादयो वर्णमात्रविप्रलब्धाः शृगालमज्ञात्वा राजानममुं मन्यन्ते। तद्यथायं परिचीयते तत्कुरुत। तत्रैवमनुष्ठेयं यथा वदामि। सर्वे सन्ध्यासमये तत्सन्निधाने महारावमेकदा करिष्यथ। ततस्तं शब्दमाकर्ण्य स्वभावात्

तेनापि शुद्धः कर्त्तव्यः। अतः शब्दार्थिज्ञाय व्याघ्रेण हन्तव्यः। तथाऽनुष्ठिते सति तत् वृत्तम्। तथाचोक्तम्

छिद्रं मर्म्म च वीर्य्यं च सर्वं वेत्ति निजो रिपुः।
दहत्यन्तर्गतश्चैव शुष्कवृक्षमिवानलः॥ २५॥

अतोऽहं ब्रवीमि। आत्मपक्षपरित्यागादित्यादि।

राजाह। यद्यप्येवं तथापि दृश्यतां तावत्। अयं दूरादागतः। तत्संग्रहे विचारः कर्त्तव्यः। चक्रवाको ब्रूते। देव प्रणिधिः प्रहितो दुर्गं च सज्जीकृतम्। अतः शुकोऽप्यालोक्य प्रस्थाप्यताम्। ततः सभां कृत्वाहूतः शुकः काकोऽपि। शुकः किञ्चिदुन्नतशिराः दत्तासने उपविश्य ब्रूते भो हिरण्यगर्भ त्वां राजाधिराजः श्रीमच्चित्रवर्णः समाज्ञापयति। यदि जीवितेन श्रिया वा प्रयोजनमस्ति तदा सत्वरतागत्यास्मच्चरणौ प्रणम नो चेदवस्थातुं स्थानान्तरं परिचिन्तय। एतच्छ्रुत्वा राजा सकोपमाह आः सभायामस्माकं न कोऽपि विद्यते य एनं गलहस्तयति। ततः उत्थाय मेघवर्णो ब्रूते। देव ममाज्ञां कुरु हन्मि चैनं दुष्टशुकम्। मन्त्री ब्रूते भद्र मैवम्। शृणु तावत्

न सा सभा यत्र न सन्ति वृद्धाः
वृद्धा न ते ये न वदन्ति धर्म्मम्।
धर्म्मः स नो यत्र न सत्यमस्ति
सत्यं न तद् यद् भयमभ्युपैति॥ २६॥
स्वापकर्षं परोत्कर्षं दूतोक्तैर्मन्यते तु कः।
सदैवावध्यभावेन दूतः सर्वं हि जल्पति॥ २७॥

ततो राजा काकस्य प्रकृतिमापन्नः । शुकोऽप्युत्थाय चलितः । पश्चाच्च शुकेनानीय प्रबोध्य कनकालङ्कारादिकं दत्त्वा सम्प्रेषितः स्वदेशं ययौ । ततो विन्ध्याचलं गत्वा स्वस्य राजानं चित्रवर्णं प्रणतवान् । तमालोक्य राजाह शुक का वार्त्ता कीदृशोऽसौ देशः । शुको ब्रूते । देव सङ्क्षेपादियं वार्त्ता । सम्प्रति युद्धोद्योगः क्रियताम् । देशश्चासौ कर्पूरद्वीपः स्वर्गैकदेशः कथं वर्णयितुं शक्यते । राजा सर्व्वान् शिष्टानाहूय मन्त्रयितुमुपविष्टः । आह च तान् सम्प्रति यत् कर्त्तव्यं तद् ब्रूत विग्रहः पुनरवश्यं कर्त्तव्यः । दूरदर्शी नाम गृध्रो मन्त्री ब्रूते देव व्यसनितया विग्रहो न विधिः ।

यतः

भूमिर्म्मित्रं हिरण्यञ्च विग्रहस्य फलं त्रयम् ।
यदैतन्निश्चितं भावि कर्त्तव्यो विग्रहस्तदा ॥ २८ ॥

राजाह मम बलानि तावदवलोकयतु मन्त्री । तदैतेषामुपयोगो ज्ञायताम् । आहूयतां मौहूर्तिकः शुभलग्नं यात्रार्थं विदधातु । मन्त्री वदति देव तथापि सहसा यात्राकरणमयुक्तम् । राजाह मन्त्रिन् ममोत्साहभङ्गं सर्वथा मा कृथाः । विजिगीषुर्यथा परभूमिमाक्रामति तथोपदिश । गृध्रोऽब्रवीत् । देव तत् कथयामि । किन्तु तदनुष्ठितमेव फलप्रदम् ।

तथा ह्युक्तम्

किं मन्त्रेणाननुष्ठाने शास्त्रवत् पृथिवीपतेः ।
न ह्यौषधपरिज्ञानाद्व्याधेः शान्तिः क्वचिद्भवेत् ॥ २९ ॥

राजादेशस्थानतिक्रमणीय इति यथा श्रुतं निवेदयामि । शृणु देव

नद्यद्रिवनदुर्गेषु यत्र यत्र भयं नृप ।
तत्र तत्र च सेनानीर्यायाद् व्यूहीकृतैर्बलैः ॥ ३० ॥

तत उत्थाय राजा मौहूर्त्तिकावेदितलग्ने प्रस्थितः । अथ प्रणिधि-प्रहितश्चरो हिरण्यगर्भसमीपमागतय प्रणम्योवाच देव समागतप्रायो राजा चित्रवर्णः । सम्प्रति मलयपर्वतोपत्यकायां समावासितकटको वर्त्तते । दुर्गशोधनं प्रतिक्षणमनुसन्धातव्यम् । यतोऽसौ गृध्रो महामन्त्री । किञ्च केनचित् सह तस्य विश्वासकथाप्रसङ्गेन एत-दिङ्गितमवगतं मया यदनेन प्रागेव कोऽप्यस्मद्दुर्गे नियुक्तः । चक्रवाको ब्रूते देव काक एवासौ सम्भवति । राजाह न कदाचिदेतत् । यद्येवं तदा कथं तेन शुकस्याभिभवायोद्योगः कृतः । अपरञ्च शुकस्यागमनात् तस्य विग्रहोत्साहः । स च चिरादत्रास्ते । मन्त्री वदति । तथाप्यागन्तुकः शङ्कनीयः । राजाह आगन्तुका अपि प्रत्युपकारिणो दृश्यन्ते । शृणु

परोऽपि हितवान् बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥ ३१ ॥

अपरञ्च

आसीद्वीरवरो नाम शूद्रकस्य महीपतेः ।
सेवकः स्वल्पकालेन स ददौ सुतमात्मनः ॥ ३२ ॥

चक्रवाकः पृच्छति कथमेतत् । राजा कथयति । अहं पुरा शूद्रकस्य राज्ञः क्रीड़ासरसि कर्पूरकेलिनाम्नो राजहंसस्य पुत्र्यां कर्पूर-

मञ्जर्यां महानुरागवान् अभूवम् । तत्र वीरवरो नाम राजपुत्रः कुतश्चिद्देशादागत्य राजद्वारि प्रतीहारमुपगम्य उवाच अहं वर्त्तनार्थी राजपुत्रो मां राजदर्शनं कारय । ततस्तेनासौ राजदर्शनं कारितो ब्रूते देव यदि मया सेवकेन प्रयोजनमस्ति तदास्मद्वर्त्तनं क्रियताम् । शूद्रक उवाच किं ते वर्त्तनम् । वीरवरेणोक्तम् प्रत्यहं सुवर्णशत-चतुष्टयम् । राजाह का ते सामग्री । वीरवरो ब्रूते द्वौ बाहू तृतीयश्च खड्गः । राजाह नैतच्छक्यम् । तच्छ्रुत्वा वीरवरः प्रणम्य चलितः । अथ मन्त्रिभिरुक्तम् । देव दिनचतुष्टयस्य वर्त्तनं दत्त्वा ज्ञायतामस्य स्वरूपं किमुपयुक्तोऽयं एतावद्वर्त्तनं गृह्णात्यनुपयुक्तो वेति । ततो मन्त्रिवचना-दाहूय ताम्बूलं दत्त्वा तद्वर्त्तनं दत्तवान् । वर्त्तनविनियोगश्च राज्ञा सुनिभृतं निरूपितः । तदर्द्धं वीरवरेण देवेभ्यः ब्राह्मणेभ्यश्च दत्तं । स्थितस्यार्द्धं दुःखितेभ्यः तदवशिष्टं भोज्यव्ययविलासव्ययेन । एतत्सर्वं नित्यकृत्यं कृत्वा राजद्वारमहर्निशं खड्गपाणिः सेवते । यदा च राजा स्वयं समादिशति तदा स्वगृहमेव याति ।

अथ कृष्णचतुर्द्दश्यां रात्रौ सकरुणक्रन्दनध्वनिं स राजा शुश्राव । तच्छ्रुत्वा राजा ब्रूते कः कोऽत्र द्वारि तिष्ठति । तदा तेनोक्तम् देव अहं वीरवरः । राजोवाच क्रन्दनानुसरणं क्रियताम् । वीरवरोऽपि यथाज्ञापयति देवः इत्युक्त्वा चलितः । राज्ञा चिन्तितम् अयमेकाकी राजपुत्रो मया सूचीभेद्ये तमसि प्रहितः तदनुचितम् । अहमपि गत्वा निरूपयामि किमेतदिति । ततो राजाऽपि खड्गमादाय अनुसरणक्रमेण नगरद्वारात् बहिर्निर्जगाम । ततो गत्वा वीरवरेण रुदती रूपयौवनसम्पन्ना सर्वालङ्कारभूषिता काचित् स्त्री दृष्टा पृष्टा च

का त्वं किमर्थं रोदिषीति । स्त्रियोक्तम् अहमेतस्य शूद्रकस्य राज्ञो लक्ष्मी श्चिरादेतस्य भुजच्छायायां महता सुखेन विश्रान्ता देव्या अपराधेन तृतीयदिवसे राजा पञ्चत्वं यास्यति अहमनाथा भविष्यामि इदानीं न स्थास्यामि इति रोदिमि। वीरवरो ब्रूते कथं पुनरिहावासो भगवत्या भवति । लक्ष्मीरुवाच यदि त्वमात्मनः पुत्रस्य शक्तिधरस्य द्वात्रिंशल्लक्षणोपेतस्य मस्तकं स्वहस्तेन छित्त्वा भगवत्याः सर्वमङ्गलाया उपहारं करोषि तदा राजा शतायुर्भविष्यति अहमपि सुखं निवसामि । इत्युक्त्वाऽदृश्याऽभवत् । ततो वीरवरेण स्वगृहं गत्वा निद्रालसा वधूः प्रबोधिता पुत्रश्च । तौ निद्रां परित्यज्योपविष्टौ । वीरवरस्त-त्सर्वं लक्ष्मीवचनमुक्तवान् । तच्छ्रुत्वा शक्तिधरः सानन्दं ब्रूते धन्योऽहं एवम्भूतः स्वामिराज्यरक्षार्थं यस्योपयोगः । तात कोऽधुना विलम्बः । यतः कदापि तावदेवंविधे कर्मणि एतस्य देहस्य विनियोगः श्लाघ्यः । शक्तिधरस्य माता ब्रूते अस्मत्कुलोचितम् । यद्येवं न कर्त्तव्यं तदा गृहीतराजवर्तनस्य निस्तारः कथं भवति । इत्यालोच्य सर्वे सर्वमङ्गला-यतनं गताः । तत्र सर्वमङ्गलां सम्पूज्य वीरवरो ब्रूते देवि प्रसीद विजयतां शूद्रको महाराजः गृह्यतामयमुपहारः । इत्युक्त्वा पुत्रस्य शिरश्चिच्छेद । ततो वीरवरश्चिन्तयामास गृहीतराजवर्तनस्य निस्तारः कृतः । अधुना निष्पुत्रजीवनं विडम्बनम् । इत्यालोच्यात्मनश्च शिर-श्चिच्छेद । ततः स्त्रियाऽपि स्वामिनः पुत्रस्य च शोकार्तया तद-नुष्ठितम् । एतत्सर्वं श्रुत्वा दृष्ट्वा च राजा साश्चर्यं चिन्तयामास ।

जीवन्ति च म्रियन्ते च मद्विधाः क्षुद्रजन्तवः ।
अनेन सदृशो लोके न भूतो न भविष्यति ॥ ६३ ॥

एतत्परित्यक्तेन राज्येनापि किं प्रयोजनम् । ततः स्वशिरश्छेत्तुमुल्लसितः खड्गः शूद्रकेनापि । अथ भगवतया सर्वमङ्गलया प्रत्यक्षभूतया राजा करे धृतः । पुत्र अलं साहसेन । इदानीं ते राज्यभङ्गो नास्ति । राजा साष्टाङ्गं प्रणम्योवाच देवि न मे राज्येन जीवितेन श्रिया वा प्रयोजनमस्ति । यदि ममानुकम्पा क्रियते तदा ममायुःशेषेणाप्ययं सदारपुत्रो राजपुत्रो जीवतु । अन्यथाऽहं यथाप्राप्तां गतिं गच्छामि । भगवत्युवाच अनेन ते सत्वोत्कर्षेण भृत्यवात्सल्येन च सर्वथा सन्तुष्टाऽस्मि । गच्छ विजयी भव । अयमपि सपरिवारो राजपुत्रो जीवतु । ततो वीरवरः सपुत्रदारः प्राप्तजीवनः स्वगृहं गतः । राजा तैरलक्षितः प्रासादपृष्ठं गत्वा तथैव सुप्तः । अथ वीरवरो द्वारस्थः पुनर्भूपालेन पृष्टः सन्नुवाच देव सा रुदती स्त्री मामवलोक्याऽदृश्याऽभवत् । न काऽप्यन्या वार्त्ता विद्यते । तद्वचनमाकर्ण्य सन्तुष्टो राजा साश्चर्यं चिन्तयामास । कथमयं श्लाघ्यतां महासत्त्वः ।

यतः

प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः ।
दाता सत्पात्रवर्षी स्यात् प्रगल्भः स्यादनिष्ठुरः ॥ ३४ ॥

एतन्महापुरुषलक्षणम् एतस्मिन् सर्वमस्ति । ततः स राजा प्रातः शिष्टसभां कृत्वा सर्ववृत्तान्तं प्रस्तुत्य प्रसादात् तस्मै कर्णाटराज्यं ददौ । तत् किमागन्तुरेव विरुद्धः । तत्रापि उत्तमाधममध्यमाः सम्भवन्ति । चक्रवाको ब्रूते ।

शृणु देव

पुण्याल्लब्धं यदेकेन तन्ममापि भविष्यति ।
हत्वा भिक्षुं यतो मोहान्निध्यर्थी नापितो मृतः ॥ ३५ ॥

राजा पृच्छति कथमेतत् मन्त्री कथयति अस्त्ययोध्यायां पुरि चूडामणिर्नाम क्षत्रियः । तेन धनार्थिना कायक्लेशेन भगवांश्चन्द्रार्द्ध-चूडामणिश्चिरमाराधितः । ततः क्षीणपापोऽसौ स्वप्ने दर्शनं लब्ध्वा भगवतः प्रसादाद्यक्षेश्वरेणादिष्टः त्वमद्य प्रातरेव क्षौरं कारयित्वा लगुडहस्तः सन् स्वगृहद्वारि निभृतं स्थास्यसि ततो यमेवागतं भिक्षुकं प्राङ्गणे पश्यसि तं निर्दयं लगुडप्रहारेण हनिष्यसि । ततोऽसौ भिक्षुकः तत्क्षणात् सुवर्णपूर्णकलशो भविष्यति । तेन त्वं यावज्जीवं सुखी भविष्यसि । तदनन्तरं तथानुष्ठिते सति तद्वृत्तम् । ततः क्षौरकरणायानीतेन नापितेन तत्सर्वमालोक्य चिन्तितम् । अहो निधि-प्राप्तेरयमुपायः । तदहमप्येवं किं न करोमि । ततः प्रभृति स नापितः प्रतिदिनं तथाविधलगुडहस्तः भिक्षुकागमनमपेक्षते । एकदा तेन तथा प्राप्तो भिक्षुको लगुडेन हत्वा व्यापादितः । तेनापराधेन सोऽपि नापितो राजपुरुषैस्ताड़ितः पञ्चत्वं गतः । अतोऽहं ब्रवीमि पुण्याल्लब्धं यदेकेन इत्यादि ।

राजाह यातु यातु प्रस्तुतमनुष्ठीयताम् । मलयाधित्यकायां समावासितकटको वर्त्तते चित्रवर्णो नाम राजा । तदधुना किं विधेयम् । मन्त्री वदति । देव आगतप्रणिधिमुखाच्छ्रुतम् यन्महामन्त्रिणो गृध्रस्योपदेशे चित्रवर्णेनानादरः कृतः । अतोऽसौ मूढ़ो जेतुं शक्यः ।

तथाचोक्तम्

लुब्धः क्रूरोऽवशोऽसत्यः प्रमादी भीरुरस्थिरः ।
मूढो योधावमन्ता च सुखच्छेद्यो रिपुः स्मृतः ॥ ३६ ॥

ततोऽसौ यावदस्मद्दुर्गावरोधं न विदधाति तावन्नद्यद्रिवनवर्त्मसु तद्बलानि हन्तुं सारसादयो नियुज्यन्तां सेनापतयः । तस्य प्रमादिनो बलं गत्वा यथावकाशं दिवानिशं च निघ्नन्तु । तथानुष्ठिते सैनिकाश्चित्रवर्णस्य बहवः सेनापतयश्च निहताः । ततश्चित्रवर्णो विषस्मः स्वमन्त्रिणं दूरदर्शिनमाह तात किमिति त्वयास्मदुपेक्षा क्रियते । किं वा क्वाप्यस्माकमविनयोऽस्ति ।

न श्रियमधिगच्छति पथ्याशी कल्यतां सुखमरोगी ।
उद्योगी विद्यान्तं धर्मार्थयशांसि च विनीतः ॥ ३७ ॥

गृध्रोऽवदत् । देव श्रूयताम् त्वया स्वबलोत्साहमवलोक्य साहसैकरसिकेन मयोपन्यस्तेष्वपि मन्त्रेष्वनवधानं वाक्पारुष्यं च कृतम् । अतो दुर्नीतेः फलमिदमनुभूयते । * इत्युक्तं । तेनालोचितम् । प्रज्ञाहीनोऽयं नो चेत् कथं नीतिशास्त्रकथाकौमुदीं वागुल्काभिस्तिमिरयति ।

---

* दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः
सन्तापयन्ति कमपथ्यभुजं न रोगाः ।
कं श्रीर्न दर्पयति कं न निहन्ति मृत्युः
कं स्त्रीकृता न विषयाः परितापयन्ति ॥

यतः

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ ३८ ॥

इत्यालोच्य तूष्णीं स्थितः अथ राजा बद्धाञ्जलिराह तात अस्त्ययं ममापराधः । इदानीं यथाऽहमवशिष्टबलसहितः प्रत्यावृत्त्य विन्ध्याचलं गच्छामि तथोपदिश । गृध्रः स्वगतं चिन्तयति । कर्त्तव्योऽत्र प्रतीकारः । ब्रूते च विहस्य देव मा भैषीः समाश्वसिहि । शृणु देव ।

मन्त्रिणां भिन्नसन्धाने भिषजां सन्निपातके ।
कर्म्मणा व्यज्यते प्रज्ञा सुस्थे को वा न पण्डितः ॥ ३९ ॥

देव तव प्रतापादेव दुर्गं भङ्क्त्वा कीर्तिप्रतापसहितं त्वामचिरेणैव कालेन विन्ध्याद्रिं नयामि । राजाह कथमधुना स्वल्पबलेन तत्सम्पद्यते । गृध्रो वदति देव सर्वं भविष्यति । यतः विजिगीषोरदीर्घसूत्रता विजयसिद्धेरवश्यंभावः । तदस्य दुर्गद्वारावरोधो विधीयताम् ।

अथ प्रणिधिना बकेनागत्य हिरण्यगर्भस्य कथितम् । देव स्वल्पबल एवायं राजा चित्रवर्णो गृध्रस्य वचनोपष्टम्भादागत्य दुर्गद्वारावरोधनं करिष्यति । राजहंसो ब्रूते भोः सर्वज्ञ किमधुना विधेयम् । चक्रवाको वक्ति स्वबले सारासारविचारः क्रियताम् । ज्ञात्वा सुवर्णवस्त्रादि यथार्हं प्रसाददानं च क्रियताम् । मन्त्री ब्रूते देव कार्पण्यं परित्यज्य स्वसुभटाः दानमानाभ्यां पुरस्क्रियन्ताम् ।

अथागत्य प्रणम्य मेघवर्णो ब्रूते देव दृष्टिप्रसादं कुरु । एष युद्धार्थी विपक्षो दुर्गद्वारि तिष्ठति । तद्देवपादादेशाद्बहिर्निःसृत्य

स्वविक्रमं दर्शयामि । तेन देवप्रसादस्यानृण्यमुपगच्छामि । चक्रोवाको ब्रूते मैवम् यदि बहिर्निःसृत्य योद्धव्यम् तदा दुर्गाश्रयणं निष्प्रयोजनम् । वायसो ब्रूते स्वयं गत्वा युद्धं दृश्यताम् ।

अनन्तरं ते सर्वे दुर्गद्वारं गत्वा महाहवं कृतवन्तः । परेद्यु श्चित्रवर्णो नाम राजा गृध्रमुवाच तात स्वप्रतिज्ञातमधुना विधीयताम् । गृध्रो ब्रूते यथाशक्ति क्रियते यत्नः । चित्रवर्णः कथयतेएवमेव । तत अनुदिते भास्करे प्रातःकाले चतुर्ष्वपि द्वारेषु युद्धे प्रवृत्ते दुर्गाभ्यन्तरे गृहे गृहे काकैरेकदा अग्निर्निक्षिप्तः । ततो गृहीतं दुर्गमिति कोलाहलं श्रुत्वा अनेकगृहेषु च पावकं प्रदीप्तं प्रत्यक्षेणावलोक्य राजहंसस्य सैनिका बहवो दुर्गनिवासिनः सत्वरं ह्रदं प्रविष्टाः । राजहंसस्य सुखिस्वभावात् मन्दगतिः सारसद्वितीयः चित्रवर्णस्य सेनापतिना कुक्कुटेनागतय वेष्टितः । हिरण्यगर्भो राजाह सेनापते सारस ममानुरोधादात्मानं न व्यापादयिष्यसि । अधुनाऽहं गन्तुमसमर्थः । त्वं गन्तुमधुनाऽपि समर्थः । तद्गत्वा जलं प्रविश । मत्पुत्रं चूडामणिनामानं सर्वज्ञस्य सम्मतया राजानं करिष्यसि । सारसो ब्रूते देव न वक्तव्यमेवं दुःसहं वचः । यावत् चन्द्रार्कौ दिवि तिष्ठेते तावद्विजयतां देवः । अहं देव दुर्गाधिकारी तन्मम मांसासृग्विलिप्तेन द्वारवर्त्मना तावत् प्रविशतु शत्रुः ।

यदि समरमपास्य नास्ति मृत्यो-
र्भयमिति युक्तमितोऽन्यतः प्रयातुम् ।
अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिनं यशः क्रियेत ॥ ४० ॥

अथ कुक्कुटेनागत्य राजहंसस्य शरीरे खरतरनखराघातः कृतः। ततः सत्वरमुपसृत्य सारसेन स्वदेहान्तरितो राजा। अनन्तरं कुक्कुटेन नखमुखप्रहारैर्जर्जरीकृतेन सारसेन स्वाङ्गेनाच्छाद्य राजा जले प्रक्षिप्तः। कुक्कुटोऽपि सेनापतिना तेन सारसेन चञ्चुप्रहारेण व्यापादितः। पश्चात् सारसोऽपि बहुभिः पक्षिभिः सम्भूय व्यापादितः। अथ चित्रवर्णो दुर्गं प्रविश्य दुर्गावस्थितं द्रव्यं ग्राहयित्वा वन्दिभिर्जयशब्देनानन्दितः स्कन्धावारं जगाम।

राजपुत्रैरुक्तम् तस्मिन् राजहंसबले पुण्यवान् सारस एव येन स्वदेहदानेन स्वामी रक्षितः।

यतः

जनयन्ति सुतान् गावः सर्वा एव गवाकृतीन्।
विषाणोल्लिखितस्कन्धं कश्चिदेव गवाम्पतिम्॥ ४१॥

विष्णुशर्मणोक्तम्। स तावत् सत्त्वक्रीतानक्षयलोकान् विद्याधरीपरिजनोऽनुभवतु महासत्त्वः। विग्रहः श्रुतो भवद्भिः। राजपुत्रैरुक्तम् श्रुत्वा सुखिनो वयम्। विष्णुशर्माऽब्रवीत्। अपरमप्येवमस्तु

विग्रहः करितुरङ्गपत्तिभि-
र्नो कदापि भवतां महीभृताम्।
नीतिमन्त्रपवनैः समाहताः
संश्रयन्तु गिरिगह्वरं द्विषः॥ ४२॥

इति विष्णुशर्मसंग्रहिते हितोपदेशे विग्रहो नाम
तृतीयः कथासंग्रहः।

सन्धिः ।

पुनः कथारम्भकाले राजपुत्रैरुक्तम् । आर्य्य विग्रहः श्रुतोऽस्माभिः सन्धिरधुनाभिधीयताम् । विष्णुशर्म्मणोक्तम् । श्रूयताम् सन्धिमपि कथयामि यस्यायमाद्य श्लोकः ।

वृत्ते महति सङ्ग्रामे राज्ञोर्निहतसेनयोः ।
स्थेयाभ्यां गृध्रचक्राभ्यां वाचा सन्धिः कृतः क्षणात् ॥१॥

राजपुत्रा ऊचुः कथमेतत् । विष्णुशर्म्मा कथयति ततस्तेन राजहंसेनोक्तम् केनास्मद्दुर्गे निक्षिप्तोऽग्निः । किं वा पारक्येण अथवास्मद्दुर्गवासिना केनचिद्विपक्षप्रयुक्तेन । चक्रवाको वदति देव भवतो निष्कारणबन्धुरसौ मेघवर्णः सपरिवारो नात्रावलोक्यते तन्मन्ये तस्य विचेष्टितमिदम् । राजा क्षणं विचिन्त्याह अस्ति तावदेवं । मम दुर्भाग्यमेतत् । तथाचोक्तम्

अपराधः स दैवस्य न पुनर्मन्त्रिणामयम् ।
कार्य्यं सुघटितं यत्नात् दैवयोगाद्विनश्यति ॥ २ ॥

मन्त्री ब्रूते उक्तमेवैतत् ।

विषमां हि दशां प्राप्य दैवं गर्हयते नरः ।
आत्मनः कर्म्मदोषांस्तु नैव जानात्यपण्डितः ॥ ३ ॥

अपरञ्च

सुहृदां हितकामानां यो वाक्यं नाभिनन्दति ।
स कूर्म्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥ ४ ॥

राजाह कथमेतत् । मन्त्री कथयति । अस्ति मगधदेशे फुल्लोत्पलाभिधानं सरः । तत्र चिरात् सङ्कटविकटनामानौ हंसौ निवसतः । तयोर्मित्रं कम्बुग्रीवनामा कूर्म्मः प्रतिवसति । अथैकदा धीवरैरागत्य तत्रोक्तम् यदत्रास्माभिरद्योषित्वा प्रातर्मत्स्यकूर्म्मादयो व्यापादयितव्याः । तदाकर्ण्य कूर्म्मो हंसावाह सुहृदौ श्रुतोऽयं धीवरालापः । अधुना किं मया कर्त्तव्यम् । हंसावाहतुः ज्ञायतां तावत् पश्चाद्यदुचितं तत्कर्त्तव्यम् । कूर्म्मो ब्रूते मैवम् । यतो दृष्टव्यतिकरोऽहमत्र ।

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा ।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥ ५ ॥

तावाहतुः कथमेतत् कूर्म्मः कथयति । पुरा एतस्मिन्नेव सरसि एवंविधेष्वेव धीवरेषूपस्थितेषु मत्स्यत्रयेणालोचितम् । तत्रानागतविधाता नामैको मत्स्यः तेनोक्तम् अहं तावत् जलाशयान्तरं गच्छामि इत्युक्त्वा स ह्रदान्तरं गतः । अपरेण प्रत्युत्पन्नमतिनाम्ना मत्स्येनाभिहितम् । भविष्यदर्थे प्रमाणाभावात् कुत्र मया गन्तव्यम् । तदुत्पन्ने कार्य्ये यथाकार्य्यमनुष्ठेयम् । ततो यद्भविष्येणोक्तम् ।

यदभावि न तद् भावि भावि चेन्न तदन्यथा ।
इति चिन्ताविषघ्नोऽयमगदः किं न पीयते ॥ ६ ॥

ततः प्रातर्जालेन बद्धः प्रत्युत्पन्नमतिर्मृतवदात्मानं सन्दर्श्य स्थितः । ततो जालादपसारितः स्थलादुत्प्लुत्य गम्भीरं नीरं प्रविष्टः । यद्भविष्यश्च धीवरैः प्राप्तो व्यापादितः । अतोऽहं ब्रवीमि अनागतविधातेत्यादि ।

तद्यथाहमन्यह्रदं प्राप्नोमि तदद्य विधीयताम्। हंसावाहतुः जलाशयान्तरे प्राप्ते तव कुशलं स्थले गच्छतस्ते को विधिः। कूर्मो ब्रूते यथाहं भवद्भ्यां सह आकाशवर्त्मना यामि स उपायो विधीयताम्। हंसौ ब्रूतः कथमुपायः सम्भवति। कच्छपो वदति युवाभ्यां चञ्चुधृतं काष्ठमेकं मया मुखेनावलम्बितव्यम् ततो भवतोः पक्षबलेन मयापि सुखेन गन्तव्यम्। हंसौ ब्रूतः। सम्भवत्येष उपायः।

किन्तु

उपायं चिन्तयन् प्राज्ञस्त्वपायमपि चिन्तयेत्।
पश्यतो वकमूर्खस्य नकुलैर्भक्षिताः सुताः॥ ७॥

कूर्मः पृच्छति कथमेतत् हंसौ कथयतः। अस्त्युत्तरापथे गृध्रकूटो नाम पर्वतः। तत्रैव रेवातीरे न्यग्रोधपादपे वका निवसन्ति। तस्य वटस्याधस्ताद्विवरे सर्पस्तिष्ठति। स च वकानां बालापत्यानि खादति। ततः शोकार्त्तानां वकानां प्रलापं श्रुत्वा केनचिद्वृद्धवकेनोक्तम्। भो एवं कुरुत यूयम्। मत्स्यानानीय नकुलविवरादारभ्य सर्पविवरं यावत् पङ्क्तिक्रमेण एकैकशो मत्स्यान् विकीर्य्य धरिष्यथ। ततस्तदाहारवर्त्मना नकुलेनागत्य द्रष्टव्यः स्वभावद्वेषाद्व्यापादयितव्यः सर्पः। तथानुष्ठिते सति तद् वृत्तम्। अथ नकुलैर्वृक्षोपरि पक्षिशावकानां रावः श्रुतः। पश्चात् तेन नकुलेन वकशावकाः खादिताः। अत आवां ब्रूवः उपायं चिन्तयन्नित्यादि।

आवाभ्यां नीयमानं त्वां दृष्ट्वा लोकैः किञ्चिद्वक्तव्यमेव। तदाकर्ण्य यदि त्वमुत्तरं ददासि तदा तव मरणं भविष्यति। तत् सर्वथात्रैव स्थीयताम्। कूर्मो वदति तत् किमहमज्ञः। न किमपि मया वक्तव्यम्।

तत एवानुष्ठिते सति आकाशे नीयमानं तं कूर्ममालोक्य सर्वे गोरक्षाः पश्चाद्धावन्ति वदन्ति च । अहो महदाश्चर्यं पक्षिभ्यां कूर्मः समुह्यते । तत्र कश्चिदाह यद्ययं कूर्मः पतति तदात्रैव पक्त्वा खादितव्यः । कोऽपि निगदति गृहं नेतव्यः । कश्चिद्वदति सरसः समीपे पक्त्वा भक्षितव्यः । तत् परुषवचनमाकर्ण्य कूर्मः क्रोधाविस्मृतसंस्कारोऽवदत । युष्माभिर्भस्म भक्षितव्यमिति वदन्नेव काष्ठात् पतितो गोरक्षैर्व्यापादितः । अतोऽहं ब्रवीमि सुहृदां हितकामानामित्यादि ।

अथ प्रणिधिर्बकस्तत्रागतश्चोवाच देव प्रागेव मया निवेदितम् । दुर्गशोधनं प्रतिक्षणं कर्त्तव्यमिति । तच्च युष्माभिर्न कृतम् । अतस्तदनवधानस्य फलमिदमनुभूतम् । दुर्गदाहश्चायं मेघवर्णनाम्ना वायसेन गृध्रप्रयुक्तेन कृतः । राजा निःश्वस्याह

प्रणयादुपकाराद्वा यो विश्वसिति शत्रुषु ।
स सुप्त इव वृक्षाग्रात् पतितः प्रतिबुध्यते ॥ ८ ॥

अथ प्रणिधिरुवाच इतो दुर्गदाहं विधाय यदा गतो मेघवर्णस्तदा चित्रवर्णेन प्रसादितेनोक्तम् अयं मेघवर्णोऽत्र कर्पूरद्वीपराज्येऽभिषिच्यताम् । चक्रवाको ब्रूते देव श्रुतं यत् प्रणिधिः कथयति । राजाह ततस्ततः । प्रणिधिरुवाच ततः प्रधानमन्त्रिणा गृध्रेणोक्तम देव नेदमुचितम् । प्रसादान्तरं किमपि क्रियताम् * महतामास्पदे नीचः कदापि न कर्त्तव्यः ।

---

* अधिकारेण यो युक्तः कथं तस्यास्ति खण्डनम् ।
नीचेद्रूपकृतं राजन् बालुकास्विव मुद्रितम् ॥

तथा चोक्तम्

नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥ ९ ॥

चित्रवर्णः पृच्छति कथमेतत् । गृध्रः कथयति अस्ति गौतमारण्ये महातपा नाम मुनिः । तेनाश्रमसन्निधाने मूषिकशावकः काकमुखाद् भ्रष्टो दृष्टः । ततो दयायुक्तेन तेन मुनिना नीवारकणैः संवर्द्धितः । तं च मूषिकं खादितुमनुधावन् विड़ालो मुनिना दृष्टः । पश्चात् तपःप्रभावात् तेन मुनिना मूषिको बलिष्ठो विड़ालः कृतः । स विड़ालः कुक्कुराद्बिभेति । ततोऽसौ कुक्कुरः कृतः । कुक्कुरस्य व्याघ्रान्महद्भयम् । तदनन्तरं स व्याघ्रःकृतः । अथ व्याघ्रमपि तं मूषिकनिर्विशेषं पश्यति मुनिः । अतः सर्वे तत्रत्या जनास्तं व्याघ्रं दृष्ट्वा वदन्ति अनेन मुनिना मूषिकोऽयं व्याघ्रतां नीतः । एतच्छ्रुत्वा स व्याघ्रः सव्यथोऽचिन्तयत् । यावदनेन मुनिना जीवितव्यं तावदिदं मम स्वरूपाख्यानमकीर्त्तिकरं न पलायिष्यते । इति समालोच्य मुनिं हन्तुं समुद्यतः । मुनिस्तस्य चिकीर्षितं ज्ञात्वा पुनर्मूषिको भव इत्युक्त्वा मूषिक एव कृतः । अतोऽहं ब्रवीमि । नीचः श्लाघ्यपदं प्राप्येत्यादि ।

अपरं च देव सुकरमिदमिति न मन्तव्यम् ।

भक्षयित्वा बहून् मत्स्यानुत्तमाधममध्यमान् ।
अतिलौल्याद्बको मूर्खो मृतः कर्कटसङ्ग्रहात् ॥ १० ॥

चित्रवर्णः पृच्छति कथमेतत् मन्त्री कथयति । अस्ति मालवविषये पद्मगर्भाभिधानं सरः । तत्रैको वृद्धबकः सामर्थ्यहीनस्तयोद्विग्नमिवा-

त्मानं दर्शयित्वा स्थितः। स च केनचित् कुलीरेण दूरादेव पृष्टः। किमिति भवानत्राहारपरित्यागेन तिष्ठति। बकेनोक्तम् मत्स्या मम जीवनहेतवः। मत्स्यास्वात्रावश्यमेव कैवर्त्तैर्व्यापादयितव्या इति नगरोपान्ते कैवर्त्तालापः आकर्णितः। तदितो वर्त्तनाभावादस्मन्मरणमुपस्थितमिति ज्ञात्वा आहारस्यापि निरादरः कृतः। ततः सर्वैर्मत्स्यैरालोचितम्। इह समये तावदुपकारक एवायमुपलक्ष्यतेऽस्माकम्। तदयमेव यथाकर्त्तव्यं पृच्छ्यताम्। मत्स्या ऊचुः भो बक अस्माकं कुत्र रक्षणोपायः। बको ब्रूते अस्ति रक्षणहेतुर्जलाशयान्तरम्। तत्राहमेकैकशो युष्मान् नयामि। मत्स्यैरपि भयाद्रुक्तमेवमस्तु। ततोऽसौ दुष्टबकस्तान् मत्स्यानेकैकान् नीत्वा कस्मिंश्चिद्देशे खादित्वा पुनरागत्य वदति। ते मया जलाशयान्तरे स्थापिताः। अनन्तरं कुलीरस्तमुवाच। भो बक मामपि तत्र नय। ततो बकोऽप्यपूर्व्वकुलीरमांसार्थी सादरं तं नीत्वा स्थले धृतवान्। कुलीरोऽपि मत्स्यकण्टकाकीर्णां भूमिं दृष्ट्वाऽचिन्तयत् हा हतोऽस्मि मन्दभाग्यः। भवतु इदानीं समयोचितं व्यवहरामि। इत्यालोच्य स कुलीरस्तस्य बकस्य ग्रीवां चिच्छेद। स बकः पञ्चत्वं गतः। अतोऽहं ब्रवीमि। भक्षयित्वा बहून् मत्स्यानित्यादि।

ततः पुनरपि राजा स चित्रवर्णोऽब्रवीत्। शृणु तावन्महामन्त्रिन् मयैतदालोचितम्। तदत्रावस्थितेनानेन मेघवर्णेन राज्ञा यावन्ति कर्पूरद्वीपस्योत्तमवस्तूनि तावन्त्यस्माकमपनेतव्यानि। तेन महता विलासेनास्माभिर्विन्ध्याचले स्थातव्यम्। दूरदर्शी विहस्याह देव

अनागतवतीं चिन्तां कृत्वा यस्तु प्रहृष्यति।
स तिरस्कारमाप्नोति भग्नभाण्डो द्विजो यथा॥ ११ ॥

राजाह कथमेतत्। दूरदर्शी कथयति अस्ति देवकोट्टनगरे देवशर्मा नाम ब्राह्मणः। तेन विषुवत्संक्रान्तौ शक्तुपूर्णशरावः प्राप्तः। ततस्तमादायासौ भाण्डपूर्णकुम्भकारमण्डपिकायां रौद्रेणाकुलितः सुप्तः। ततः शक्तुरक्षार्थं हस्ते दण्डमादायाचिन्तयत्। यद्यहमिमं शक्तुशरावं विक्रीय दश कपर्दकान् प्राप्नोमि तदा तैरिह समये कपर्दकैर्घटशरावादिकमुपक्रीय अनेकधा वृद्धैस्तैर्धनैः पुनः पुनः पूग-वस्त्रादिकमुपक्रीय विक्रीय वाणिज्यं कृत्वा लक्षसङ्ख्यकधनान्युत्पाद्य विवाहचतुष्टयं करोमि। ततस्तासु पत्नीषु या रूपयौवनवती तस्या-मधिकानुरागं करोमि। तदनन्तरं सञ्जातेर्ष्यास्ताः सपत्न्यः अन्योऽन्यं यदा द्वन्द्वं करिष्यन्ति तदाऽहं कोपाकुलः सर्वाः सपत्नीर्लगुडेन ताड़यिष्यामि। इत्यभिधाय तेन लगुड़ः प्रक्षिप्तः। शक्तुशरावश्चूर्णितो भाण्डानि च भग्नानि। ततो भग्नभाण्डश्रवणादागतः कुम्भकारेण गले हस्तं दत्त्वा मण्डपिकाया वहिष्कृतः। अतोऽहं ब्रवीमि अनागतवतीं चिन्तामित्यादि।

ततो राजा रहसि गृध्रं मन्त्रिणं पप्रच्छ। तात यथा कर्त्तव्यं तथोपदिश। गृध्रो वदति

मदोद्धतस्य नृपतेः प्रकीर्णस्येव दन्तिनः।

गच्छन्त्युन्मार्गगा ये तस्य नेतारः खलु वाच्यताम्॥ १२॥

शृणु तावद्देव किमस्माभिर्बलदर्पाद्दुर्गं भग्नं। नो वा भवतः प्रतापा-धिष्ठितेनोपायेन। राजाह भवतामुपायेन। गृध्रो ब्रूते यद्यस्मद्वचनं क्रियते तदा स्वदेशे गम्यताम्। अन्यथासन्ने वर्षाकाले तुल्यबलेन सह पुनर्विग्रहे सत्यस्माकं परभूमिष्ठानां स्वदेशगमनमपि दुर्लभं भविष्यति।

सुखशोभार्थं सन्धाय गम्यताम्। दुर्गं भग्नं कीर्त्तिश्च लब्धैव। मम सम्मतं तावदेतत्।

युद्धे विनाशो भवति कदाचिदुभयोरपि।
सुन्दोपसुन्दावन्योऽन्यं समवीर्य्यौ हतौ न किम्॥ १३॥

राजोवाच कथमेतत् मन्त्री कथयति। पुरा दैत्यौ सहोदरौ सुन्दोपसुन्दनामानौ महता कायक्लेशेन त्रैलोक्यराज्यकामनया चिराच्चन्द्रशेखरमाराधितवन्तौ। ततस्तयोर्भगवान् परितुष्टः सन् वरं वरयतम् इत्युवाच। अनन्तरं तयोः समधिष्ठितया सरस्वत्या तावन्यद्वक्तुकामावन्यदभिहितौ। यद्यावयोर्भगवान् परितुष्टस्तदा स्वप्रियां पार्वतीं परमेश्वरीं ददातु। अथ भगवता क्रुद्धेन वरदानस्यावश्यकतया मूढयोः तयोः पार्वती प्रदत्ता। ततस्तस्या रूपलावण्यलुब्धाभ्यां जगद्घातिभ्यां मनसोत्सुकाभ्यां पापतिमिराभ्यां ममेत्यन्योऽन्यकलहाभ्यां प्रमाणपुरुषः कश्चित् पृच्छ्यतामिति मतौ कृतायां स भट्टारको वृद्धद्विजरूपी समागत्य तत्रोपस्थितः। अनन्तरम् आवाभ्यामियं स्वबललब्धा कस्येयमावयोर्भवतीति ब्राह्मणमपृच्छताम्। ब्राह्मणो ब्रूते युवां क्षत्त्रियधर्माणौ युद्ध एव युवयोर्नियमः। इत्यभिहिते सति साधूक्तमनेनेति कृत्वा अन्योऽन्यतुल्यवीर्य्यौ समकालेऽन्योन्यघातेन विनाशमुपगतौ। अतोऽहं ब्रवीमि युद्धे विनाश इत्यादि।

राजाह तत् किं प्रागेव नेदमुपदिष्टम्। मन्त्री वदति तदा किं मम वचनमवसानपर्य्यन्तं श्रुतं भवद्भिः। तदापि मम सम्मत्या नायं

विग्रहारम्भः । यतः सन्धेयगुणयुक्तोऽयं (१) हिरण्यगर्भो न विग्राह्यः । तदत्र बहुभिर्गुणैरुपेतः सन्धेयोऽयं राजहंसः । चक्रवाकोऽवदत् प्रणिधे सर्वमवगतम् । व्रज पुनरागमिष्यसि । राजानं प्रति किन्तु देव यद्यपि महामन्त्रिणा गृध्रेण सन्धानमुपन्यस्तं तथापि तेन राज्ञा सम्प्रति भूतजयदर्पान्न मन्तव्यम् । तदेवं क्रियताम् । अस्मन्मित्रं महाबलो नाम सिंहलद्वीपस्य सारसो राजा जम्बुद्वीपे कोपं जनयतु । राजाह एवमस्तु । इत्युक्त्वा विचित्रो नाम बकः सुगूढलेखं दत्त्वा सिंहलद्वीपं प्रस्थापितः । अथ प्रणिधिः पुनरागत्य उक्तवान् देव श्रूयतां तावत् तत्रत्यप्रस्तावः । एवं तत्र गृध्रेणोक्तम् देव मेघवर्णस्तत्र चिरमुषितः स वेत्ति किं सन्धेयगुणयुक्तो हिरण्यगर्भो राजा न वेति । ततोऽसौ मेघवर्णश्चित्रवर्णेन राज्ञा समाहूय पृष्टः । वायस कीदृशोऽसौ हिरण्यगर्भो राजा चक्रवाको मन्त्री वा कीदृशः । मेघवर्णो ब्रूते देव स हिरण्यगर्भो राजा युधिष्ठिरसमो महाशयः सत्यवाक् । चक्रवाकसदृशो मन्त्री न क्वाप्यवलोक्यते । राजाह यद्येवं तदा कथमसौ त्वया वञ्चितः । मेघवर्णो विहस्य ब्रूते देव ।

विश्वासप्रतिपन्नानां वञ्चने का विदग्धता ।
अङ्कमारुह्य सुप्तं हि हत्वा किं नाम पौरुषम् ॥ १५ ॥

शृणु देव तेन मन्त्रिणाहं प्रथमदर्शन एव विज्ञातः । किन्तु महाशयोऽसौ राजा तेन मया विप्रलब्धः ।

(१) सत्यार्य्यौ धार्म्मिकोऽनार्य्यो भ्रातृसङ्घातवान् बली ।
अनेकयुद्धविजयी सन्धेयाः सप्त कीर्त्तिताः ॥

आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनम् ।
स एव वञ्चितस्तेन ब्राह्मणश्छागतो यथा ॥ १५ ॥

राजाह कथमेतत्। मेघवर्णः कथयति अस्ति गौतमारण्ये प्रस्तुतयज्ञः कश्चिद्ब्राह्मणः । स ग्रामान्तरं गत्वा छागमुपक्रीय स्कन्धे धृत्वा गच्छन् धूर्तत्रयेणावलोकितः । ततस्ते धूर्ताः यद्येष छागः केनाप्युपायेन लभ्यते तदा मतिप्रकर्षो भवति । इत्यालोच्य प्रान्तरवृक्षत्रयतले तस्य ब्राह्मणस्य वर्मन्युपविश्य स्थिताः । तत्रैकेन धूर्त्तेन स ब्राह्मणोऽभिहितः भो ब्राह्मण किमिति त्वया कुक्कुरः स्कन्धेनोह्यते । विप्रेणोक्तम् नायं श्वा यज्ञच्छागोऽयम् । अनन्तरं पुनर्द्वितीयेन क्रोशमात्रस्थितेन तदेवोक्तम् । तदाकर्ण्य ब्राह्मणः छागं भूमौ निधाय मुहुर्मुहुर्निरीक्ष्य पुनः स्कन्धे कृत्वा दोलायमानमतिः चलितः ।

यतः

मतिर्दोलायते नूनं सतामपि खलोक्तिभिः ।
ताभिर्विश्वसितो योऽसौ म्रियते चित्रकर्णवत् ॥ १६ ॥

राजा पृच्छति कथमेतत् स कथयति अस्ति कस्मिंश्चिद्वनोद्देशे मदोत्कटो नाम सिंहः । तस्यानुचरास्त्रयः काको व्याघ्रः शृगालश्च । अथ तैर्भ्रमद्भिः सार्थाद्भ्रष्ट उष्ट्रो दृष्टः पृष्टश्च । कुतो भवानागतः । स चात्मवृत्तान्तमकथयत् । ततस्तैर्नीत्वासौ सिंहाय समर्पितः । तेन चाभयवाचं दत्त्वा चित्रकर्ण इति नाम कृत्वा स्थापितः । एवं काले गच्छति कदाचित् सिंहस्य शरीरवैकल्यात् भूरिवृष्टिकारणाच्चाहारमलभमानास्ते व्यग्रा बभूवुः । ततः काकव्याघ्रगोमायुभिरालोचितम् ।

चित्रकर्णमेव यथा स्वामी व्यापादयति तथानुष्ठीयताम् किमनेन कण्टकभुजास्माकम्। व्याघ्रो ब्रूते स्वामिनाभयवाचं दत्त्वा गृहीतोऽयम् कथमेवं सम्भवति वायसो वदति क्षुत्समये परिक्षीणः स्वामी पापमपि करिष्यति।

यतः

त्यजेत् क्षुधार्त्ता महिलापि पुत्रं खादेत् क्षुधार्त्ता भुजगी स्वमण्डम्।
बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति॥१७॥

इति निश्चित्य सर्वे सिंहान्तिकं जग्मुः। सिंहेनोक्तम्। आहारार्थं प्राप्तं किञ्चित्। काको ब्रूते देव यत्नादपि न प्राप्तं किञ्चित्। सिंहोऽवदत्। कोऽधुना जीवनोपायः। काको वदति स्वाधीनाहारपरित्यागात् सर्वनाशोऽयमुपस्थितः। सिंहेनोक्तं अत्राहारः कः। कस्य स्वाधीनः। काकः कर्णे कथयति चित्रकर्ण इति। सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति। मयास्मै अभयवाक् दत्ता तत् कथमेवं सम्भवति। काको ब्रूते नासौ स्वामिना वधापादयितव्यः। किन्त्वस्माभिरेव तथा कर्त्तव्यं यथासौ स्वदेहदानमङ्गीकरोति। तच्छ्रुत्वा सिंहस्तूष्णीं स्थितः। ततोऽसौ लब्धावकाशः कूटं कृत्वा सर्वानादाय सिंहसमीपमागतः। अथ काकेनोक्तम् देव यत्नादप्याहारो न प्राप्तः। अनेकोपवासक्लिष्टस्य स्वामी। तदिदानीं मदीयमांसमुपभुज्यताम्। सिंहेनोक्तम् भद्र वरं प्राणपरित्यागो न पुनरीदृशे कर्मणि प्रवृत्तिः। जम्बुकेनापि तथोक्तम्। सिंहेनोक्तं नैवम्। व्याघ्र उवाच मद्देहेन जीवतु स्वामी। सिंहेनोक्तम् न कदाचिदेवमुचितम्। अथ चित्रकर्णोऽपि

जातप्रत्ययः तथैवात्मदेहदानमाह। तद्वदन्नेवासौ द्वीपिना कुक्षिं विदार्य्य व्यापादितः सर्वैर्भक्षितश्च। ततोऽहं ब्रवीमि मतिर्दोलायते नूनमित्यादि।

तदनन्तरं तृतीयधूर्त्तवचनं श्रुत्वा स विप्रो भ्रमं निश्चित्य छागं त्यक्त्वा स्नात्वा च गृहं ययौ। छागश्च नीत्वा धूर्त्तैः खादितः। अतोऽहं ब्रवीमि आत्मौपम्येन यो वेत्तीत्यादि।

राजाह मेघवर्ण कथं त्वया शत्रुमध्ये सुचिरमुषितम् कथं वा तेषामनुनयः कृतः। मेघवर्ण आह देव स्वामिकार्य्यार्थिना स्वप्रयोजनवशाद्वा किं किं न क्रियते।

तथाचोक्तम्

स्कन्धेनापि वहेच्छत्रून् कार्य्यमासाद्य बुद्धिमान्।
यथा वृद्धेन सर्पेण मण्डूका विनिपातिताः॥ १८॥

राजाह कथमेतत् मेघवर्णः कथयति अस्ति जीर्णोद्याने मन्दविषो नाम सर्पः। सोऽतिजीर्णतया स्वाहारमप्यन्वेष्टुमक्षमः सरस्तीरे पतित्वा स्थितः। ततो दूरात् केनचिन्मण्डूकेन दृष्टः पृष्टश्च किमिति भवानाहारं नान्विष्यति। सर्पो ब्रूते भद्र गच्छ किं ते मम मन्दभाग्यस्य वृत्तान्तप्रश्नेन। ततः सञ्जातकौतुकः स भेकः सर्व्वथा कथ्यतामिति तं सर्पमाह। सर्पो ब्रूते भद्र अत्र ब्रह्मपुरे कौण्डिल्यनाम्नः श्रोत्रियस्य पुत्रो विंशतिवर्षदेशीयः सर्वगुणसम्पन्नोदुर्दैवान्मया नृशंसेन दष्टः। ततः सुशीलनामानं पुत्रं मृतमवलोक्य कौण्डिल्यः शोकेन मूर्च्छितः पृथिवीतले लुलोठ। अनन्तरं ब्रह्मपुरवासिनः सर्वे बान्धवास्तस्य तत्रागतग्रो-

प्रविष्टाः ततः कपिलो नाम स्नातकोऽवदत् अरे कौण्डिन्य मूढोऽसि येनैवं विलपसि ।

यतः

अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः ।
ऐश्वर्यं प्रियसंवासो मुह्येत् तत्र न पण्डितः ॥ १९ ॥
यथा हि पथि कश्चिच्छायामाश्रित्य तिष्ठति ।
विश्रम्य च पुनर्गच्छेत् तद्वद्भूतसमागमः ॥ २० ॥

अपि च

संयोगो हि वियोगस्य संसूचयति सम्भवम् ।
अनतिक्रमणीयस्य जन्म मृत्योरिवागमम् ॥ २१ ॥
आपातरमणीयानां संयोगानां प्रियैः सह ।
अपथ्यानामिवान्नानां परिणामो हि दारुणः ॥ २२ ॥

तद्भद्रात्मानमनुसन्धेहि शोकचर्चां च परिहर। ततस्तद्वचनं निशम्य प्रबुद्ध इव कौण्डिन्य उत्थायाब्रवीत्। तदलमिदानीं गृहनरकवासेन वनं गच्छामि। पुनः कपिलो ब्रूते

वनेऽपि दोषाः प्रभवन्ति रागिणां गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्त्तते निवृत्तरागस्य गृहं तपोवनम् ॥ २३ ॥
आत्मा नदी संयमपुण्यतीर्था सत्योदका शीलतटा दयोर्मिः ।
तत्राभिषेकं कुरु पाण्डुपुत्र न वारिणा शुध्यति चान्तरात्मा ॥ २४ ॥

कौण्डिन्यो ब्रूते एवमेव। ततोऽहं तेन शोकाकुलेन ब्राह्मणेन शप्तः। यदद्यारभ्य मण्डूकानां वाहनं भविष्यसीति। ततो ब्राह्मणशापं भोक्तुं मण्डूकानुद्वोढमत्र तिष्ठामि। अनन्तरं तेन मण्डूकेन गत्वा मण्डूकनाथस्य जलपादस्य तत् कथितम्। ततोऽसावागत्य स मण्डूकनाथः सर्पमधिष्ठितवान्। स सर्पस्तं पृष्ठे कृत्वा चित्रपदक्रमं बभ्राम। परेद्युश्चलितुमसमर्थं तं मण्डूकनाथोऽवदत्। किमिति भवानद्य मन्दगतिः। सर्पो ब्रूते देव आहारविरहाद् बलोऽस्मि। मण्डूकनाथो-ऽवदत् अस्मदाज्ञया मण्डूकान् भक्षय। ततः गृहीतोऽयं महाप्रसाद इत्युक्त्वा क्रमशः स मण्डूकान् खादति। अथ निर्मण्डूकं सरो विलोक्य मण्डूकनाथोऽपि तेन खादितः। अतोऽहं ब्रवीमि स्कन्धेनापि वहेच्छत्रून् इत्यादि।

देव यात्विदानीं पुरावृत्ताख्यानकथनं। सर्वथा सन्धेयोऽयं हिरण्यगर्भो राजा सन्धीयतामिति मे मतिः। राजोवाच कोऽयं भवतो विचारः। यतो जितस्तावदयमस्माभिः। ततो यद्यस्मदाज्ञया सेवायां वसति तदास्तां नो चेद्विगृह्यताम्। अत्रान्तरे जम्बुद्वीपादागत्य शुकेनोक्तम् देव सिंहलद्वीपस्य सारसो राजा सम्प्रति जम्बुद्वीपमाक्रम्या-धितिष्ठति। राजा तं ससम्भ्रममाह किं किम्। शुकः पूर्वोक्तं कथयति। गृध्रः स्वगतमुवाच साधु रे चक्रवाकमन्त्रिन् साधु। राजा सकोपमाह आस्तां तावदयं। तमेव गत्वा समूलमुन्मूलयामि। दूरदर्शी विहस्याह

एकदा न विगृह्णीयात् बहून् राजा विवादिनः।
सदर्पोऽप्युरगः कीटैर्बहुभिर्नाशितो ध्रुवम् ॥२५॥

देव किम् इतो विना सन्धानं गमनमस्ति । यत अस्माकं पश्चात् प्रकोपः कर्त्तव्यः ।

यतः

योऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः ।
स तथा तप्यते मूढ़ो ब्राह्मणो नकुलादिव ॥ २६ ॥

राजा पृच्छति कथमेतत् दूरदर्शी कथयति अस्त्युज्जयिन्यां माधवो नाम ब्राह्मणः । तस्य ब्राह्मणी प्रसूता । सा बालापत्यरक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता । अथ ब्राह्मणस्य कृते राज्ञः पार्वणश्राद्धं दातुमागतो जनः । तं दृष्ट्वा ब्राह्मणः सहजदारिद्र्यादचिन्तयत् यदि सत्वरं न गच्छामि तदाऽन्यः कश्चिच्छ्राद्धं ग्रहीष्यति । शिशोश्चात् रक्षकः कोऽपि नास्ति तत् किं करोमि । यातु चिरकालपालितममुं सुतनिर्विशेषं नकुलं बालकरक्षार्थं व्यवस्थाप्य गच्छामि । तथा कृत्वा गतः । ततस्तत् नकुलेन बालकसमीपमागच्छन् कृष्णसर्पो व्यापादितः खण्डितश्च । अथासौ नकुलो ब्राह्मणमायान्तमवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपागम्य ब्राह्मणस्य चरणयोर्लुलोठ । ततोऽसौ ब्राह्मणस्तं तथाविधं दृष्ट्वा मम पुत्रोऽनेन भक्षित इत्यविचार्य्य तं व्यापादितवान् । अनन्तरं यावदुपसृत्य पश्यति ब्राह्मणस्तावद्बालकः सुस्थः स्वपिति सर्पस्तु व्यापादितस्तिष्ठति । ततोऽसौब्राह्मणो विषादमुपगतः । अतोऽहं ब्रवीमि योऽर्थतत्त्वमविज्ञाय इत्यादि । राजाह मन्त्रिन् एष ते निश्चयः । मन्त्री ब्रूते एवमेव । तद्देव यदीदानीमस्मद्वचनं क्रियते तदा सन्धाय गम्यताम् । राजाह कथमेवं सत्वरं सम्भाव्यते । मन्त्री ब्रूते देव सत्वरं भविष्यति । विशेषतश्च असौ धर्मज्ञो राजा सर्वज्ञो मन्त्री च । ज्ञात-

मेतन्मया पूर्वं मेघवर्णवचनात् तत्कृतकार्य्यसन्दर्शनाच्च । राजाह अलमुत्तरोत्तरेण यथाभिप्रेतमनुष्ठीयताम् । एतन्मन्त्रयित्वा गृध्रो महामन्त्री तत्र यथार्हं कर्त्तव्यमितुरक्त्वा दुर्गाभ्यन्तरं प्रचलितः।

ततः प्रणिधिना बकेनागत्य राज्ञो हिरण्यगर्भस्य निवेदितम् देव सन्धिं कर्त्तुं महामन्त्री गृध्रोऽस्मत्समीपमागच्छति । राजहंसो ब्रूते मन्त्रिन् पुनः अभिसन्धिना केनचिदत्रागन्तव्यम् । सर्वज्ञो विहस्याह देव न शङ्कास्पदमेतत् । यतो महाशयोऽसौ दूरदर्शी । अथवा स्थितिरियं मन्दमतीनां कदाचित् शङ्कैव न क्रियते कदाचित् सर्वशङ्का ।

तथा हि

सरसि बहुशस्ताराच्छाये क्षणात् परिवञ्चितः
कुमुदविटपान्वेषी हंसो निशासु विचक्षणः ।
न दशति पुनस्ताराशङ्को दिवापि सितोत्पलं
कुहकचकितो लोकः सत्येऽप्यपायमपेक्षते ॥ २७ ॥

दुर्जनदूषितमनसः सुजनेष्वपि नास्ति विश्वासः ।
बालः पायसदग्धो दध्यपि ननु फुत्कृतं भुङ्क्ते ॥२८॥

तद्देव यथाशक्ति तत्पूजार्थं रत्नोपहारादिसामग्री सज्जीक्रियताम् । तथानुष्ठिते सति स गृध्रो मन्त्री दुर्गद्वाराच्चक्रवाकेण सत्कृत्यानीय राजदर्शनं कारितो दत्तासने चोपवेशितः । चक्रवाक उवाच मन्त्रिन् युष्मदायत्तं सर्वं स्वेच्छयोपभुज्यतामिदं राज्यं। राजहंसो ब्रूते एवमेव। दूरदर्शी ब्रूते एवमेवैतत् किन्त्विदानीं बहुप्रपञ्चनं निष्प्रयोजनम् ।

लुब्धमर्थेन गृह्णीयात् स्तब्धमञ्जलिकर्म्मणा ।
मूर्खं छन्दानुवृत्त्येन याथातथ्येन पण्डितम् ॥२९॥

तदिदानीं सन्धाय गम्यताम्। महाप्रतापश्चित्रवर्णो राजा। चक्रवाको ब्रूते यथा सन्धानं कार्य्यं तदप्युच्यताम्। राजहंसो ब्रूते भवन्तो महापण्डिताः तदत्रास्माकं यथाकार्य्यमुपदिश्यताम्। दूरदर्शी ब्रूते अतः सत्याभिधानदिव्यपुरःसरं द्वयोरप्येतयोर्भूपालयोः काञ्चनाभिधानसन्धिर्विधीयताम्। सर्वज्ञो वदति एवमस्तु। ततो वस्त्रोपहारादिना स मन्त्रिदूरदर्शी पूजितः प्रहृष्टमनाश्चक्रवाकं गृहीत्वा मयूरस्य राज्ञः समीपं गतः। ततः चित्रवर्णेन राज्ञा सर्वज्ञो गृध्रवचनाद्बहुमानदानपुरःसरं सम्भावितः। तथाविधं सन्धिं स्वीकृत्य राजहंससमीपं प्रस्थापितः। दूरदर्शी ब्रूते देव सिद्धं नः समीहितम्। इदानीं स्वस्थानमेव विन्ध्याचलं प्रति गम्यताम्। अथ सर्वे स्वस्थानं प्राप्य मनोवाञ्छितफलमनुभवन्ति।

विष्णुशर्म्मणोक्तम् अपरं किं कथयामि तदुच्यताम्। राजपुत्रा ऊचुः आर्य्य तव प्रसादात् सकलराजव्यवहाराङ्गं ज्ञातम्। ततः सुखिनो भूता वयम्। विष्णुशर्मोवाच यद्यप्येवं तथापि अपरमपीदमस्तु।

सन्धिः सर्वमहीभुजां विजयिनामस्तु प्रमोदः सदा
सन्तः सन्तु निरापदः सुकृतीनां कीर्त्तिश्चिरं वर्द्धताम्।
नीतिः…………सततं वचः स्थले राजतो
वक्त्रं चुम्बतु मन्त्रिणामहरहोर्भूयान्महानुत्सवः॥२०॥

इति विष्णुशर्मसंगृहिते हितोपदेशे सन्धि नाम
चतुर्थः कथासंग्रहः।

समाप्तश्च हितोपदेशः।

হিতোপদেশ

দীপিকা।

মিত্রলাভঃ।

(১) সিদ্ধিরিতি। যস্য মূর্দ্ধা যন্মূর্দ্ধা তস্মিন্ যচ্ছিরসি যস্য ললাটে ইত্যর্থঃ। শশিনঃ চন্দ্রস্য কলা ষোড়শভাগৈকভাগঃ, জহ্নো রপত্যং স্ত্রী জাহ্নবী তস্যাঃ ফেণানাং লেখা রেখা সা ইব রাজতে ইতি শেষঃ। (শুভ্রত্বাৎ সাদৃশ্যাৎ) যস্য দেবস্য ললাটস্থিতা শশিকলা শিরোবিলাসিন্যা গঙ্গায়াঃ ফেণ-লেখা ইব প্রতীয়তে ইত্যর্থঃ। তস্য ধূর্জটেঃ শিবস্য প্রসাদাৎ কৃপয়া সতাং সাধূনাং সাধ্যে অভিলষিতে বিষয়ে সিদ্ধিঃ অভীষ্টসিদ্ধিঃ অস্তু ভবতু।

(২) শ্রুত ইতি। অয়ং হিতায় উপদেশঃ হিতোপদেশঃ গ্রন্থঃ শ্রুতঃ অধীতঃ সন্ সংস্কৃতোক্তিষু সংস্কৃতবাক্যকথনেষু পাটবং পটুত্বং সর্ব্বত্র সর্ব্বস্মিন্ বিষয়ে বাচাং বৈচিত্র্যং বাক্‌প্রয়োগকৌশলং নীতিবিদ্যাঞ্চ দদাতি।

(৩) অজরামরবদিতি। প্রজ্ঞা বিদ্যতে অস্য ইতি প্রাজ্ঞঃ (প্রজ্ঞা + ষ্ণঃ) পণ্ডিতোজনঃ নাস্তি জরা যস্য সঃ অজরঃ বার্দ্ধক্যরহিতঃ অমরঃ চিরজীবী তেন তুল্যং (তেন তুল্যং ক্রিয়াচেদিতি বতিঃ) বিদ্যাং অর্থং ধনঞ্চ চিন্তয়েৎ উপার্জয়েৎ। মৃত্যুনা কেশেষু (অবচ্ছেদে সপ্তমী) গৃহীতঃ ধৃত ইব আসন্ন-মৃত্যুরিব ধর্ম্মং তপোনিয়মাদিকং আচরেৎ অনুতিষ্ঠেৎ।

(৪) বিদ্যেতি। বিদ্যা বিনয়ং দদাতি বিনয়াৎ পাত্রত্বাং গুণবত্তাং যাতি প্রাপ্নোতি বিদ্বানিতিশেষঃ। পাত্রত্বাৎ গুণশালিত্বাৎ ধনং প্রাপ্নোতি লভতে ধনাৎ ধর্ম্মং ততঃ তস্মাৎ (ধর্ম্মাৎ) সুখং প্রাপ্নোতীত্যন্বয়ঃ।

(৫) যদিতি। যৎ যস্মাৎ নবে নূতনে অকঠিনে ইত্যর্থঃ। ভাজনে মৃৎপাত্রাদৌ লগ্নঃ অর্পিতঃ সংস্কারঃ রেখাদিঃ অন্যথা বিপরীতঃ ন ভবেৎ ন বিলুপ্যতীত্যর্থঃ। অতঃ কথাচ্ছলেন নীতিকথাপ্রসঙ্গেন কাককূর্ম্মাদীনাং উপন্যাসেন ইহ গ্রন্থে বালানাং নীতিঃ কথ্যতে উপদিশ্যতে। অগ্নিসংস্কারাদেঃ প্রাক্ মৃৎপাত্রদৌ উৎকীর্ণোঽঙ্ক ইব সুকুমারমতিষু বালকেষু যদেব উপদিশ্যতে তদেব স্থিরতাং যাতীতিভাবঃ।

(৬) মিত্রলাভ ইতি। পঞ্চতন্ত্রাৎ তথা অন্যস্মাৎ গ্রন্থাৎ মহাভারতাদেঃ আকৃষ্য সংগৃহ্য মিত্রলাভঃ সুহৃদ্ভেদঃ বিগ্রহঃ সন্ধিরেব চ লিখ্যতে। মিত্রলাভঃ সুহৃদ্ভেদঃ বিগ্রহঃ সন্ধিশ্চেতি ভাগচতুষ্টয়েন বিভাজ্য গ্রন্থোঽয়ং হিতোপদেশঃ লিখ্যতে ইত্যর্থঃ।

সর্ব্বস্বামিগুণোপেতঃ = সর্ব্বে স্বামিনঃ গুণাঃ দয়াদাক্ষিণ্যাদয়ঃ তৈঃ উপেতঃ যুক্তঃ। যেষাং সদ্ভাবাৎ প্রভুত্বং জায়তে তৈঃ সর্ব্বৈর্গুণৈঃ সম্পন্ন ইত্যর্থঃ।

(৭) অনেকসংশয়চ্ছেদীতি। অনেকেষাং কর্ত্তব্যাকর্ত্তব্যানাং সংশয়ঃ তং ছিনত্তি যৎ তৎ তথোক্তং কর্ত্তব্যাকর্ত্তব্যনির্ণায়কং অক্ষ্ণোঃ পরঃ পরোক্ষঃ স চ অর্থশ্চেতি তস্য দর্শকং চক্ষুরগোচরস্য বিষয়স্য দর্শকং শাস্ত্রং সর্ব্বস্য জনস্য লোচনং নয়নং (কর্ত্তা) যস্য জনস্য নাস্তি সএব অন্ধঃ দৃষ্টিহীনঃ। দর্শনেন্দ্রিয়বানপি শাস্ত্রজ্ঞানবিবর্জ্জিতঃ সদসদ্বিচারবিমূঢ়ত্বাৎ অন্ধত্বেন পরিগণিতোভবেদিত্যর্থঃ।

(৮) যৌবনমিতি। যৌবনং ধনসম্পত্তিঃ ধনশালিতা প্রভুত্বং আধিপত্যং অবিবেকিতা বিবেকরাহিত্যং এককং যৌবনাদিকং ব্যস্তমপি অনর্থায় অহিতায় ভবতীতি শেষঃ। তত্র তেষু যৌবনাদিষু (নির্দ্ধারে সপ্তমী) চতুষ্টয়ং সমস্তং কিমু বক্তব্যং। মহদনর্থায়েতি ভাবঃ।

অনধিগতশাস্ত্রাণাং = অনধিগতানি অপঠিতানি শাস্ত্রাণি যৈঃ তেষাং, শাস্ত্রজ্ঞানবিবর্জ্জিতানাং।

অসন্মার্গগামিনাং = অসৎপথপ্রবৃত্তানাং।

শাস্ত্রানুষ্ঠানেন = শাস্ত্রজ্ঞানজন্যানুষ্ঠানেন, শাস্ত্রজ্ঞানসম্পাদনার্থং (অধ্যয়নেন বসতীতিবৎ ফলরূপহেতৌ তৃতীয়া)

(৯) ক ইতি। পুত্রেণ জাতেন কঃ অর্থঃ কিং প্রয়োজনং কীদৃশেনেত্যাহ যঃ পুত্রঃ ন বিদ্বান্ শাস্ত্রজ্ঞঃ ন ধার্ম্মিকঃ ধর্ম্মবিৎ। তদেব সমর্থয়ন্নাহ কাণেনেতি কাণেন দর্শনশক্তিবিহীনেন চক্ষুষা নয়নেন কিং কিং প্রয়োজনং কেবলং চক্ষুষঃ পীড়া চক্ষুঃপীড়ৈব। কাণচক্ষুরিব মূর্খঃ পুত্রঃ কেবলং ক্লেশায় ভবতীত্যর্থঃ।

(১০) রূপযৌবনসম্পন্নেতি। রূপঞ্চ যৌবনঞ্চ তাভ্যাং সম্পন্নাঃ যুক্তাঃ রূপবন্তঃ যুবানশ্চেত্যর্থঃ। সম্ভবত্যস্মাদিতি সম্ভবঃ উৎপত্তিস্থানং বিশালং মহৎ কুলং সম্ভবো যেষাং তে তথোক্তাঃ মহাকুলোৎপন্নাঃ অপীতি ভাবঃ। বিদ্যয়া হীনাঃ বিদ্যাহীনাঃ অগুণসম্পন্নাঃ নির্গন্ধাঃ সৌরভহীনাঃ কিংশুকাঃ পলাশকুসুমানীব ন শোভন্তে ন কৈরপি আদ্রিয়ন্তে ইত্যর্থঃ।

এবম্ভূতঃ = এতাদৃশঃ।

উন্মার্গগামিনাং = অসৎপথপ্রবৃত্তানাং।

সকলনীতিশাস্ত্রতত্ত্বজ্ঞঃ = জানাতীতি জ্ঞঃ সকলানি নীতিশাস্ত্রাণি তেষাং তত্ত্বং তস্য জ্ঞঃ, অখিলনীতিশাস্ত্রবিশারদঃ।

(১১) কাব্যশাস্ত্রবিনোদেনেতি। ধী র্বিদ্যতে এষাং তেষাং ধীমতাং পণ্ডিতানাং কাব্যশাস্ত্রবিনোদেন কাব্যশাস্ত্রপাঠজনিতয়া প্রীত্যা কালঃ সময়ঃ গচ্ছতি। পণ্ডিতাঃ কাব্যশাস্ত্রালোচনয়া কালং যাপয়ন্তীত্যর্থঃ। মূর্খানাং মন্দমতীনাং ব্যসনেন দ্যূতপানাদ্যাসঙ্গেন নিদ্রয়া কলহেন চ কালো গচ্ছতীত্যন্বয়ঃ।

(১২) অসাধনেতি। নাস্তি সাধনং উপায়ো যেষাং তে তথোক্তাঃ নিরুপায়াঃ বিত্তহীনাঃ অসম্পন্নাঃ সুহৃত্তমাঃ পরস্পরং নিতরাং মৈত্রীমাপন্নাঃ কাককূর্ম্মমৃগাখবঃ আশু ঝটিতি কার্য্যাণি সাধয়ন্তি সম্পাদয়ন্তি।

বিশালঃ = অতিমহান্, বহুভিঃ শাখাপ্রশাখাভির্যুক্তঃ।

তত্র = শাল্মলীতরৌ।

নানাদিগ্দেশাৎ = দিশশ্চ দেশাশ্চ দিগ্দেশং নানা দিগ্দেশং তস্মাৎ বিভিন্নদিগ ভাগাৎ।

আগত্য = উপস্থায় (আ + গম্ + যপ)

অবসন্নায়াং = প্রভাতপ্রায়ায়াং উষসি (অব + সদ্ + ক্তঃ ৭।১)

অস্তাচলচূড়াবলম্বিনি = অস্তঃ অচলঃ (যস্মিন্ সূর্য্যাদয়োঽস্তং যান্তি) তস্য চূড়া শিখরং তাং অবলম্বতে যঃ সঃ তস্মিন্ তথোক্তে অস্তগিরিশিখরাশ্রয়িণি অস্তং গতে ইত্যর্থঃ।

ভগবতি = ভগঃ ষড়ৈশ্বর্য্যং বিদ্যতে অস্য তস্মিন্। ষড়ৈশ্বর্য্যশালিনি (ঐশ্বর্য্যস্য সমগ্রস্য বীর্য্যস্য যশসঃ শ্রিয়ঃ। জ্ঞানবৈরাগ্যয়োশ্চৈব ষণ্ণাং ভগ ইতি স্মৃতঃ)

প্রবুদ্ধঃ = জাগরিতঃ (প্র + বুধ্ + কর্ত্তরি ক্তঃ)

কৃতান্তং = কৃতঃ অন্তঃ বিনাশো যেন তম্।

অটন্তং = ইতস্ততো গচ্ছন্তং, পরিভ্রমন্তং।

দ্বিতীয়ং = নরকাধিপতেরন্যং।

কৃতান্তমিব...... ..অপশ্যৎ = কৃতান্তমিব ভীষণাকারং ব্যাধং দৃষ্ট্বা নিতরাং ভীতি মবাপেত্যর্থঃ।

অনিষ্টদর্শনং = অনিষ্টস্য অপ্রিয়স্য প্রাণহন্তুরিত্যর্থঃ (ন + ইষ্ + কর্ম্মণি ক্তঃ) দর্শনং সাক্ষাৎকারঃ। শক্রমুখাবলোকনং।

জাতং = বৃত্তং, ঘটিতং (জন্ + কর্ত্তরি ক্তঃ)

জানে = বেদ্মি, অবগচ্ছামি (জ্ঞা + লট্ এ)

অনভিমতং দর্শয়িষ্যতি = অনভিমতং (ন + অভি + মন্ + কর্ম্মণি ক্তঃ) অপ্রিয়ং অশুভমিতি যাবৎ, দর্শয়িষ্যতি ঘটয়িষ্যতি (কর্ত্তৃপদমনিষ্টদর্শনং) প্রাতরুত্থায়ৈব শক্রমুখাবলোকনেন ভাগ্যে কিমনিষ্টমাপতিষ্যতীতি ন পারয়ামি নির্ণেতু মিত্যর্থঃ।

তদনুসরণক্রমেণ = তস্য ব্যাধস্য অনুসরণং (অনু + সৃ + অনট্) তস্য ক্রমঃ নিয়মঃ তেন (ভেদবিশেষণে তৃতীয়া)

ব্যাকুলঃ = অনিষ্টাপাতভয়েন উদ্বিগ্নচিত্তঃ।

তণ্ডুলকণান্ = তণ্ডুলানাং কণাঃ তান্।

বিকীর্য্য = ইতস্ততো বিক্ষিপ্য (বি + কৄ + যপ্)

বিস্তীর্য্য = প্রসার্য্য, পাতয়িত্বা, (বি + স্তৄ + যপ্)

প্রচ্ছন্নঃ = সংবৃতঃ, লুক্কায়িতঃ অন্যৈরলক্ষিত ইত্যর্থঃ (প্র + ছদ্ + কর্ত্তরি ক্তঃ)

অস্মিন্নেব কালে = অত্রান্তরে, ব্যাধে তণ্ডুলকণান্ বিক্ষিপ্য জালং প্রসার্য্য চ গূঢ়মাস্থিতে সতীত্যর্থঃ।

কপোতরাজঃ = কপোতানাং রাজা (রাজাহঃসখিভ্যষ্ট ইতি অকারান্তত্বং)

সপরিবারঃ = অনুচরবর্গসহিতঃ।

বিয়তি = আকাশে। বিসর্পন্ = বিচরন্, উড্ডয়মানঃ (বি + সৃপ্ শতৃ ১।১)

তান্ = ব্যাধেন সমন্তাৎ বিক্ষিপ্তান্।

তণ্ডুলকণলুব্ধান্ = তণ্ডুলকণেষু লুব্ধাঃ লোলুপাঃ তান্ (লুভ্ + কর্ত্তরি ক্তঃ ২।৩) তণ্ডুলকণভক্ষণার্থং জাতস্পৃহান্।

কুতোঽত্র……সম্ভবঃ = মানবসমাগমরহিতে ঽস্মিন্ বনে তণ্ডুলকণাগমস্য একান্তাসম্ভাবিতত্বাৎ কেনাপি ব্যাধেনাস্মদ্বিনাশার্থমেতে বিক্ষিপ্তাইত্যহং মন্যে ইতি ভাবঃ।

তন্নিরূপ্যতাং = তৎ তস্মাৎ নিরূপ্যতাং নির্ণীয়তাং (নি + রূপি + লোট্ তাম্ ভাববাচ্যে) অস্মাভিরিতি শেষঃ। কথং কুত এতে আগতা ইতি কারণমনুসন্ধীয়তামিত্যর্থঃ।

প্রায়েণ = বাহুল্যেন ; ভবিতব্যমিতি ক্রিয়ায়া বিশেষণং।

অসম্ভাবিতে লোভং কুর্ব্বন্ মৃত্যু মেবাহ্বয়তীত্যুদাহরন্নাহ

(১৩) কঙ্কণস্যেতি। কঙ্কণস্য সুবর্ণালঙ্কারবিশেষস্য (কর্ম্মণি ষষ্ঠী) লোভেন লিপ্সয়া হেতুনা সুদুঃখেন তীর্য্যতে ঽসৌ তস্মিন্ (সু + দুঃ + তৃ + কর্ম্মণি অ) (যস্মিন্ পতিত্বা উত্থাতুং ন শক্যতে ইত্যর্থঃ) পঙ্কে কর্দ্দমে নিমগ্নঃ (নি + মস্জ্ + ক্তঃ) পতিতঃ ব্যাঘ্রমুপগন্তুং কৃতাবগাহন ইতি যাবৎ পথিকঃ কশ্চিৎ পান্থঃ বৃদ্ধব্যাঘ্রেণ (কর্ত্তা) পরিণতবয়সা কেনচিৎ শার্দ্দূলেন সংপ্রাপ্তঃ আক্রান্তঃ সন্ (সং + প্র + আপ্ + কর্ম্মণি ক্তঃ) সংমৃতঃ পঞ্চত্বং গতঃ। যথা কশ্চিৎ পথিকঃ হিংসারতস্য ব্যাঘ্রস্য অসম্ভাবিতং দানশীলত্বমবিগণয্য সুবর্ণকঙ্কণলোভাৎ মৃত্যুমুখে পতিতস্তথাস্মাকমপি অনেন তণ্ডুলকণলোভেন মরণং ভবিষ্যতীত্যর্থঃ।

কথমেতৎ = এতৎ কঙ্কণলোভেন ব্যাঘ্রহস্তে পথিকস্য মরণং কথং কেন প্রকারেণ বৃত্তমিতিশেষঃ।

কুশহস্তঃ = কুশাঃ হস্তে যস্য সঃ (ব্যধিকরণবহুব্রীহিঃ) কুশাঙ্গুরীয়ং দধানঃ।

গৃহ্যতাং = নীয়তাং, প্রতিগ্রহত্বেন স্বীক্রিয়তাম্, যুষ্মাভিরিতি শেষঃ।

ততঃ = ব্যাঘ্রস্য প্রলোভনবাক্যশ্রবণানন্তরম্।

লোভাকৃষ্টেন = লোভেন আকৃষ্টঃ (আ + কৃশ্ + কর্ম্মণি ক্তঃ) তেন, লোভোপহতচিত্তবৃত্তিনা, লোভবিমোহিতচিত্তেন।

আলোচিতং = চিন্তিতং, মনসি বিচারিতম্।

ভাগ্যেনৈতৎ সম্ভবতি = এবমযাচিতলাভোবহুপুণ্যৈরেব ঘটতে ইত্যর্থঃ।

আত্মসন্দেহে...বিধেয়া = আত্মনঃ শরীরস্য সন্দেহঃ সংশয়ঃ যস্মিন্ তস্মিন্ প্রাণবিনাশশঙ্কাযুক্তে বিষয়ে। প্রবৃত্তিঃ ইচ্ছা। বিধেয়া কর্ত্তব্যা (বি + ধা + কর্ম্মণি যঃ) লোভবশবর্ত্তিতয়া হিংস্রপ্রকৃতেঃ শার্দ্দূলস্য সমীপগমনং সর্ব্বথা ন কর্ত্তব্যমিতি ভাবঃ।

নিরূপয়ামি = অবধারযামি, কিমসৌ কঙ্কণদানব্যাজেন প্রলোভয়ন্ হন্তু মিচ্ছতি ন বেতি অস্য মনোগতং পরিজ্ঞায় কঙ্কণগ্রহণায় উদযচ্ছামীত্যর্থঃ।

মারাত্মকে ত্বয়ি বিশ্বাসঃ = মারে (মৃ + ঘঙ্) হিংসায়াং আত্মা স্বভাবো যস্য তস্মিন্। বিশ্বাসঃ প্রত্যয়ঃ। নরমাংসলোলুপস্য হিংস্রস্য তে দানশীলত্বে স্বজাতিদুর্লভহিংসানিবৃত্তৌচ কিং প্রমাণ মিত্যর্থঃ।

অতিদুর্বৃত্তঃ = অতিশয়েন দুঃ দুষ্টং বৃত্তং আচরণং যস্য সঃ, দুরাচারঃ, হিংসারত ইত্যর্থঃ।

অনেকগোমানুষাণাং......দারাশ্চ = গোমানুষাদিপ্রাণিবধজনিতাৎ পাপাৎ স্ত্রীপুত্রহীনোঽস্মীত্যর্থঃ।

ততঃ কেনচিৎ...... ভবান্ = কশ্চিদ্ধার্ম্মিকঃ প্রাণিহিংসৈব মে পুত্রকলত্রনাশহেতুরিতি নিরূপয়ন্ দানাদিধর্ম্মাচরণে মামুপদিষ্টবানিত্যর্থঃ।

গলিতনখদন্তঃ = নখাশ্চ দন্তাশ্চেতি নখদন্তাঃ গলিতাঃ জীর্ণাঃ নখদন্তাঃ যস্য সঃ। নখদন্তা হি ব্যাঘ্রাণাং হিংসাকরণস্য প্রধানসাধনানি তেঽপি মে

জীর্ণতামাপন্নাঃ অতঃ সর্ব্বথাহং বিশ্বাসভাজন মিত্যভিপ্রেত্য বিশেষণমিদং প্রোক্তং।

স্বহস্তস্থমপি = স্বব্যবহ্রিয়মাণস্য বস্তুনোদানং দানশীলত্বস্য পরাকাষ্ঠা তদপি মে অস্তীতি অপেঃ সার্থকত্বং।

যস্মৈকস্মৈচিৎ = যএব প্রতিগ্রহীতুমিচ্ছতি গুণাগুণয়োরবিশেষেণ তস্মৈ ইত্যর্থঃ।

তথাপি......দুর্নিবারঃ = হিংসাবৃত্তিং বিহায় দানাদিধর্ম্মানুষ্ঠানে কৃতে ঽপি মে ঘাতুকোঽয়মিতি লোকনিন্দায়াঃপরিহারো নাস্তীত্যর্থঃ।

ধর্ম্মশাস্ত্রাণ্যধীতানি = মন্বাদিপ্রণীতানি শাস্ত্রাণি অধীতানি (অধি + ই + ক্তঃ) পঠিতানি। ন কেবলং ধার্ম্মিকোপদেশো মে সদনুষ্ঠানস্য কারণং ধর্ম্ম-শাস্ত্রপাঠোঽপীতিভাবঃ।

ধর্ম্মশাস্ত্রাধ্যয়নাৎ যদুপলব্ধং তদ্বিজ্ঞাপয়ন্নাহ

(১৪) প্রাণাইতি। আত্মনঃ স্বস্য প্রাণাঃ জীবনং যথা অভীষ্টাঃ (অভি + ইষ্ + কর্ম্মণি ক্তঃ) অভিলষিতাঃ মহতা যত্নেন রক্ষণীয়াঃ ভূতানাং আত্মভিন্নপ্রাণিনামপি তে (প্রাণাঃ) তথা তদ্বৎ অভীষ্টা ইত্যর্থঃ। সাধবঃ সজ্জনাঃ উপমা এব ঔপম্যং (স্বার্থে ষ্ণ্যঃ) আত্মনা ঔপম্যং সাদৃশ্যং তেন আত্মতুলনয়া ভূতানাং প্রাণিনাং দয়াং অনুকম্পাং কুর্ব্বন্তি। সাধবো যদেবা-ত্মনঃ ক্লেশকরং পরেষামপি তত্তথেতি বিবিচ্য সর্ব্বভূতেষু আত্মবৎ পশ্যন্তী ত্যর্থঃ। অতঃ পরদুঃখ মসহমানাৎ মত্তঃ হিংসাশঙ্কা ন কর্ত্তব্যেতিভাবঃ।

দুর্গতঃ = দুঃ দুঃখজনকং গতং (গম্ + ভাবে ক্তঃ) অবস্থা যস্য সঃ, দুরবস্থা-পন্নঃ দরিদ্র ইতি যাবৎ।

দরিদ্রায় দানস্য প্রশস্ততাং প্রমাণয়ন্নাহ।

(১৫) দরিদ্রানিতি। হে কৌন্তেয় (কুন্তী + ঢেয়ঃ) কুন্তীতনয় দরিদ্রান্ অকিঞ্চনান্ ভর (ভৃ + লোট্ হি) অন্নবস্ত্রাদিদানেন প্রতিপালয় ঈশ্বরে (ঈশ্ + বর ৭। ১) ধনশালিনি জনে (বিবক্ষয়া সপ্তমী) ধনং মা ন প্রযচ্ছ দেহি। এতদেব দৃষ্টান্তেন সমর্থয়ন্নাহ ব্যাধিতস্যেতি ব্যাধিরস্য জাতইতি ব্যাধিত স্তস্য রুগ্নস্য ঔষধং ভেষজং পথ্যং হিতকরং নির্নাস্তি রুজো যস্য তস্য

রোগহীনস্য ঔষধৈঃ কিং কিং প্রয়োজনং ন কিমপীত্যর্থঃ। দানস্য দারিদ্র্য-মোচনমূলত্বাৎ নীরোগিনি ঔষধপ্রয়োগ ইব ধনবতি ধনদানং নিষ্ফল মিতি ভাবঃ।

তদ্বচঃ প্রতীতঃ = তস্য ব্যাঘ্রস্য বচঃ তস্মিন্ প্রতীতঃ ব্যাঘ্রবচসি কৃতবিশ্বাসঃ।

পলায়িতুং = অপসর্ত্তুং (পরা + অয়্ + তুম্)

অহহ = খেদসূচকমব্যয়ম্।

(১৬) ন ধর্ম্মশাস্ত্রমিতি। অয়মিত্যধ্যাহার্য্যঃ ধর্ম্মস্য শাস্ত্রং মান্বদি-প্রণীতং ধর্ম্মোপদেশকং শাস্ত্রং পঠতি অধীতে ইতি এতৎ ধর্ম্মশাস্ত্রপাঠমাত্র মিত্যর্থঃ। দুরাত্মনঃ প্রকৃত্যা দুরাচারস্য ন কারণং ধর্ম্মপ্রবৃত্তেরিতি শেষঃ। নাপি বেদাধ্যয়নং বেদপাঠঃ ধর্ম্মপ্রবৃত্তিকারণমিতি শেষঃ। এতদেব সমর্থয় নুদাহরতি অত্র সংসারে স্বভাব এব তথা তদ্বৎ অতিরিচ্যতে (অতি + রিচ্ + লট্ তে কর্ত্তরি বাচ্যে) প্রবলো ভবতি গুণানন্যানতিক্রম্য বর্ত্ততে ইত্যর্থঃ যথা যেন প্রকারেণ গবাং তৃণভক্ষিণীনামপীতি ভাবঃ পয়ঃ দুগ্ধং প্রকৃত্যা স্বভাবেন মধুরং সুস্বাদু (অত্রোপমানে দোষে ঽপি গুণস্থিতিঃ) যস্য হি যা-দৃশঃ স্বভাবঃ নকেনাপি কারণেন তদ্বৈপরীত্যং সম্ভবতীতি ভাবঃ। অঙ্গারঃ শতধৌতেন মলিনত্বং ন মুঞ্চতীত্যাদাহরণান্তরঞ্চ।

অপরঞ্চ = স্বভাবস্য অপরিবর্ত্তনশীলতায়া উদাহরণান্তরমপ্যস্তীত্যর্থঃ।

(১৭) সর্বস্যেতি। হি নিশ্চিতং সর্বস্য জনস্য স্বভাবাঃ চরিত্রানি পরী-ক্ষ্যন্তে (পরি + ঈক্ষ্ + কর্ম্মণি লট্ অন্তে) সম্যক্ বিচার্য্যন্তে ইতরে স্বভাবা-তিরিক্তাঃ অন্যে বিদ্যাদয়ঃ গুণাঃ ন পরীক্ষ্যন্তে ইতি শেষঃ। বিদ্যাবত্ত্বাদিগুণা নপেক্ষ্য প্রথমং স্বভাবপরীক্ষণং শ্রেয় ইত্যর্থঃ। হি যতঃ স্বভাবঃ সর্বান্ গুণান্ বিদ্যাবত্ত্বাদীন্ অতীত্য (অতি + ই + যপ্) অতিক্রম্য অভিভূয়েতি যাবৎ মূর্দ্ধ্নি শিরসি সর্বোপরীত্যর্থঃ, বর্ত্ততে তিষ্ঠতি। স্বভাবো হি সর্বগুণাভি-ভাবক ইতি ভাবঃ।

অবিচারিতং = প্রাক্ সম্যগনালোচিতং।

অতঃ .....কর্ত্তব্যমিতি = অতঃ পথিকস্য অপরিণামদর্শিতায়াঃ ফলদর্শনাৎ কিমপি কার্য্যং ন সহসা কর্ত্তব্য মিত্যর্থঃ। অবিবেকঃ পরমাপদাং পদমিতিভাবঃ।

আঃ কিমেব মুচ্যতে = তব বচনং ন সর্ব্বত্রানুমোদনীয় মিতি ভাবঃ।

(১৮) বৃদ্ধস্যেতি। আপদঃ বিপত্তেঃ কালঃ সময়ঃ তস্মিন্ বিপৎকালে উপস্থিতে আগতে সতি বৃদ্ধস্য বয়োবৃদ্ধত্বেন লব্ধপ্রাবীণ্যস্য বহুদর্শিন ইতি যাবৎ বচনং উপদেশবাক্যং গ্রাহ্যং অনুসরণীয়ং লোকৈ রিতি শেষঃ। ইদঞ্চ বিষয়-বিশেষে বর্ত্ততে ন সর্বত্রেত্যাহ সর্বত্রেতি সর্বত্র সর্বস্মিন্ অনপেক্ষিতবৃদ্ধোপদেশে বিষয়ে ইত্যর্থঃ। এবং ইত্থং বিচারে বৃদ্ধবচনং গ্রাহ্য মিতি সিদ্ধান্তে কৃতে তু ভোজনে ঽপি জীবনধারণস্য প্রধানসাধনভূতে ঽপীত্যর্থঃ অপ্রবর্ত্তনং প্রবৃত্ত্যভাবঃ ভবেদিতি শেষঃ। বৃদ্ধা হি খাদ্য মিদং গুরুপাকং চিরেণ পচ্যতে অতো নেদং ভোক্তু মুচিত মিত্যেব মুপদিশন্তীতি তত্র তেষাং বচনে অনুস্থতে কস্যাপি ভোজনং ন ভবেদিতিভাবঃ।

(১৯) শঙ্কাভিরিতি। ভূতলে পৃথিব্যাং অন্নং (অদ্+ক্তঃ) ভোজ্যং বস্তু পীয়তে যৎ তৎ পানং (পা+অনট্ কর্ম্মণিবাচ্যে) জলাদি পানীয়ং বস্তু শঙ্কাভিঃ খাদ্যেনানেন পানীয়েনচ ভুক্তেন পীতেন বা কিঞ্চিদনিষ্টং জায়তে নবেতি সংশয়ৈঃ আক্রান্তং (আ+ক্রম্+ক্তঃ) যুক্তং এবং সতি কুত্র বস্তুনি প্রবৃত্তিঃ ইচ্ছা পানভোজনাভিলাষ ইত্যর্থঃ কর্ত্তব্যা বিধেয়া অস্মাভিরিতি শেষঃ নু ভোঃ (চিত্রগ্রীবসম্বোধনং) বা অথবা প্রবৃত্তি মন্তরেণেত্যর্থঃ কথং কেন প্রকারেণ জীবিতব্যং (জীব্+তব্য ভাববাচ্যে) প্রাণিতব্যং অস্মাভিরিতি শেষঃ। পানভোজনং বিনা জীবনধারণং ন কথমপি সম্ভবেদিত্যর্থঃ।

(২০) ঈর্ষীতি। ঈর্ষী (ঈর্ষ্+অ, স্ত্রী) পরশ্রীকাতরতা বিদ্যতে অস্যেতি ঈর্ষী পরোৎকর্ষাসহিষ্ণুঃ ঘৃণা দয়া সর্ব্বত্র জুগুপ্সাশীলতা বা বিদ্যতে অস্য সঃ ঘৃণী দয়ালুঃ সর্ব্বদা সর্ব্বত্র জুগুপ্সাশীলো বা অসন্তুষ্টঃ সর্ব্বদৈব নিরানন্দঃ যস্মৈ ন কিমপি প্রীতিকর মিত্যর্থঃ ক্রোধনঃ কোপনস্বভাবঃ নিত্যং শঙ্কা অস্য জাতেতি নিত্যশঙ্কিতঃ সদা সাহসরহিতঃ। পরস্য ভাগ্যং (ভজ্+ণ্যৎ) সম্পৎ তেন উপজীবতি য সঃ পরভাগ্যোপজীবী পরসম্পদা বর্ত্তনশীলঃ এতে পূর্ব্বোক্তাঃ ঈর্ষ্যাদয়ঃ ষট্ ষড়বিধাঃ লোকাঃ দুঃখস্য ভাগিনঃ দুঃখভাগিনঃ (ভজ্+ঘিণুন্ ১।৩) ভবন্তীতি শেষঃ। অত্র তণ্ডুলকণাহারে চিত্রগ্রীববচ-

নেনাস্মাভিঃ ন শঙ্কিতব্যমিতি ভাবঃ।

অনন্তরং=তণ্ডুলকণাহারে নিশ্চয়াদনন্তরং।

অবতীর্য্য=অবরুহ্য (অব+তৃ+যপ্)

জালনিবন্ধাঃ=জালেন নিবদ্ধাঃ (নি+বন্ধ্+ক্তঃ কর্ম্মণি বাচ্যে) পাশনিয়মিতাঃ ব্যাধপ্রসারিতেন পাশেন সংরুদ্ধা ইতি যাবৎ।

বচনাৎ=বচনমনুস্মৃত্য (যবর্থে পঞ্চমী)

তত্রাবলম্বিতাঃ=তত্র তস্মিন্ স্থানে অবলম্বিতাঃ অবতীর্ণাঃ ভূমৌ নিপতিতা ইতি যাবৎ।

(২১) নেতি। গণস্য সমূহস্য বহূনামিতি যাবৎ অগ্রতঃ অগ্রে ন গচ্ছেৎ ন যায়াৎ লোক ইতি শেষঃ। বহুভিঃ সাধ্যে কার্য্যে নৈকেন পুরঃ প্রবর্ত্তিতব্যমিত্যর্থঃ। কুতঃ ইত্যাহ কার্য্যে সিদ্ধে সফলে সতি ফলং অভীষ্টলাভঃ সমং সর্ব্বেষামেকরূপং। ফলস্য সর্ব্বে এব সমাংশভাগিনঃ। যদি কার্য্যস্য বিপত্তিঃ কার্য্যবিপর্ত্তিঃ সমারভ্যমানে কার্য্যে বিপৎপাতঃ স্যাৎ ভবেৎ তদা তত্র বিষয়ে তত্র গণেবা (মুখংরাতীতি মুখারা+কঃ) মুখরঃ অগ্রযায়ী অগ্রে প্রবর্ত্তকঃ হন্যতে বধ্যতে তিরস্ক্রিয়তে ইত্যর্থঃ সহকারিভি রিতিশেষঃ। সমারব্ধস্য কার্য্যস্য সিদ্ধৌ সত্যাং সর্ব্বে সমাংশেন ফলং লভন্তে বিপদি উপস্থিতায়ান্তু অগ্রসরএব দোষভাক্ ভবতীত্যর্থঃ।

নায়মস্যদোষঃ=অয়ং জালবন্ধনরূপঃ বিপৎপাতঃ ন অস্য মুখরস্য দোষেণ ঘটিতঃ। যদ্যয়ং বৃদ্ধস্য বচনং গ্রাহ্যমিত্যাদিনা তণ্ডুলকণভক্ষণে প্রবৃত্তিং নাজনয়িষ্যৎ তদা ন কদাচিদস্মাকং জালবন্ধন মঘটিষ্যতেতি চিন্তা ন কার্য্যা ভবিতব্যতেয়মিতিভাবঃ।

নায়মস্যদোষইত্যুক্তং তদেবোপপাদয়ন্নাহ।

(২২) আপদামিতি। হিতঃ হিতকরোঽপি জনঃ আপতন্তীনাং (আ+পৎ+শতৃ, স্ত্রী ৬।৩) আগচ্ছন্তীনাং অবশ্যংভাবিনীনা মিত্যর্থঃ আপদাং বিপদাং হেতুতাং আয়াতি প্রাপ্নোতি হিতং কুর্ব্বতোঽপি জনাদবশ্যম্ভাবিন্য আপদো ঘটন্তে ইত্যর্থঃ। "প্রতিকূলে বিধৌ সর্ব্বং বিপরীতায় কল্পতে" ইতিভাবঃ। অত্রোদাহরণমাহ হি তথাহি মাতুর্জ্জঙ্ঘা উরুদেশঃ বিপদি আশ্রয়-

ণীয়ং স্থান মিতিভাবঃ। বৎসসা বন্ধনে (বন্ধ্+অনট্) রোধনে বিষয়ে অস্তম্ভঃ স্তম্ভঃ ভবতীতি স্তম্ভীভবতি (স্তম্ভ্+অভূততদ্ভাবে চ্বিঃ) বন্ধনদণ্ডত্বং প্রাপ্নোতি। দোহনকালে ধেনুজঙ্ঘায়াং বৎসং বধ্নাতি যদ্যন্যঃ কশ্চিৎ বন্ধনো-পায়ো ন বিদ্যতে।

বিপৎ কালে........লক্ষণং=বিস্ময়ঃ (বি+স্মি+অল্) স্তব্ধত্বং কিংকর্ত্তব্য বিমূঢ়তেতি যাবৎ। কুৎসিতঃ পুরুষঃ কাপুরুষঃ (কর্ম্মধারয়সমাসে কুৎসিত শব্দস্য কাদেশঃ) তস্য লক্ষণং চিহ্নং। পৌরুষহীনাঃ পুরুষাএব কিংকর্ত্তব্য-বিমূঢ়া ভবন্তি।

তদত্র........চিন্ত্যতাং=অত্র উপস্থিতাযাং বিপদি। ধৈর্য্যং অবলম্ব্য চিত্তং স্থিরীকৃত্য প্রতীকারঃ (প্রতি+কৃ+ঘঞ্) বন্ধনমোচনোপায়ঃ চিন্ত্যতাং (চিন্তি+লোট্+তাম্ কর্ম্মণি বাচ্যে) নিরূপ্যতাং অস্মাভিরিতি শেষঃ। ভয়কাতর্য্যং বিহায় বন্ধনমোচনোপায়ং সমুদ্ভাব্য চ সর্বথা আত্মরক্ষণে যত্নঃ ক্রিয়তা মিত্যর্থঃ।

মহাত্মানো ন কদাচিৎ বিপদি বিস্ময়াবিষ্টা ভবন্তীতি প্রদর্শয়ন্নাহ

২৩) বিপদীতি। বিপদি বিপৎকালে উপস্থিতে সতীত্যর্থঃ ধৈর্য্যং (ধীর+ষ্যঃ) অব্যাকুলতা অথ অনন্তরং অভ্যুদয়ে (অভি+উৎ+ই+অল্ ৭।১) সম্পৎকালে ক্ষমা ঔদ্ধত্যবিরহঃ অহঙ্কাররাহিত্যমিতিযাবৎ। সদসি (সীদত্যস্যামিতি সদ্+অস্ ৭।১) সভায়াং বাক্ষু পটুতা বাক্প্রয়োগনৈপুণ্যং যুধি (যুধ্+ক্বিপ্ ৭।১) যুদ্ধে বিক্রমঃ সাহসপ্রদর্শনং যশসি (যশ্+অস্ ৭।১) কীর্ত্তৌ অভিরুচিঃ ইচ্ছা যশোলিপ্সা। শ্রুতৌ শাস্ত্রে ব্যসনং (বি+অস্+অনট্) আসক্তিঃ শাস্ত্রার্থপরিজ্ঞানে সবিশেষানুরাগঃ ইদং বিপদি ধৈর্য্যা-দিকং সর্বং হি নিশ্চিতং মহান্ আত্মা যেষাং তেষাং উদারচরিতানাং প্রকৃত্যা সিদ্ধং প্রকৃতিসিদ্ধং স্বভাবসিদ্ধং শিক্ষাং বিনৈব মহাত্মসু পূর্বোক্তাঃ গুণাঃ আজন্মসিদ্ধাভবন্তীত্যর্থঃ। অস্মিন্ শ্লোকে দ্রুতবিলম্বিতং বৃত্তং।

(২৪) ষড়িতি। ইহ সংসারে ভূতিং উন্নতিং ইচ্ছতা (ইষ্+শতৃ ৩।১) অভিলষতা উন্নতিকামেন পুরুষেণ নিদ্রা স্বাপঃ তন্দ্রা, (তন্দ্র্+অ, স্ত্রী) অনুৎসাহঃ কার্য্যবৈমুখ্যমিতিযাবৎ ভয়ং শঙ্কা ক্রোধঃ কোপঃ

আলস্যং (অলস+ষ্যঃ) অলসতা দীর্ঘসূত্রঃ (দীর্ঘেণ চিরকালেন সূত্রং ঈপ্সিতং কর্ম্ম যস্য সঃ) চিরেণ প্রারব্ধস্য কর্ম্মণঃ সম্পাদয়িতা তস্য ভাবঃ দীর্ঘসূত্রতা চিরক্রিয়তা এতে পূর্ব্বোক্তাঃ নিদ্রাদয়ঃ ষট দোষাঃ হাতব্যাঃ (হা+তব্যঃ কর্ম্মণি) ত্যক্তব্যাঃ। নিদ্রাদয়ঃ ষট্ উন্নতিপ্রতিবন্ধকা ইত্যর্থঃ।

ইদানীং···উড্ডীয়তাং=ক্রিয়তাং অস্মাভিরিতি শেষঃ। একচিত্তীভূয়—একং চিত্তং যেষাং তে একচিত্তাঃ একচিত্তাঃ ভূত্বেতি একচিত্তীভূয় (অভূত তদ্ভাবার্থে চ্বিঃ) মিলিত্বা। উড্ডীয়তাং (উৎ+ডী+লোট্ তাম্ ভাবে) অস্মাভিরিতিশেষঃ।

(২৫) অল্পানামিতি। অল্পানাং তৃণাদিবৎ ক্ষুদ্রাণামপি বস্তূনাং সংহতিঃ (সম্+হন্+ক্তিঃ) সমবায়ঃ মিলনমিতি যাবৎ কার্য্যস্য সাধিকা কার্য্যসাধিকা কার্য্যসম্পাদিকা ভবতীতি শেষঃ। ক্ষুদ্রা অপি সমেত্য মহৎ কার্য্যং সাধয়ন্তীতি মিলিতেষু অস্মাসু জালবন্ধনমোচনং ন দুষ্করং ভবেদিত্যর্থঃ। তথাহি গুণত্বং রজ্জুত্বং আপন্নৈঃ (আ+পদ্+ক্তঃ কর্ত্তরি ৩।৩) প্রাপ্তৈঃ রজ্জুরূপেণ পরিণতৈরিত্যর্থঃ তৃণৈঃ কুশাদিভিঃ মত্তদন্তিনঃ মদস্রাবিণঃ হস্তিনঃ বধ্যন্তে (বন্ধ্+লট অন্তে কর্ম্মণি) নিয়ম্যন্তে সংরুধ্যন্তে ইতি যাবৎ লোকৈরিতি শেষঃ।

সুদূরাৎ=দূরান্তিকার্থেভ্যশ্চেতি পঞ্চমী।

জালাপহারকান্=জালস্য পাশস্য অপহারকাঃ (অপ+হৃ+ণকঃ ২।৩) তান্ পাশচৌরান্ জালমাদায় উৎপতিতানিত্যর্থঃ।

ধাবিতঃ=অনুসরন্ (ধাব্+ক্তঃ কর্ত্তরি)

(২৬) সংহতা ইতি। ইমে বিহঙ্গমাঃ (বিহায়সা গচ্ছন্তীতি বিহায়স্+গম্+খঃ ১।৩) খেচরাঃ পক্ষিণঃ সংহতাঃ (সম্+হন্+ক্তঃ ১।৩) মিলিতাঃ সন্তঃ মে মম জালং হরন্তি অপহরন্তি আদায় উৎপতন্তীত্যর্থঃ। তু কিন্তু যদা যস্মিন সময়ে নিপতিষ্যন্তি ভূমৌ অবতরিষ্যন্তি তদা তস্মিন সময়ে মে মম বশং বশ্যতাং এ ষ্যন্তি (ই—লৃট্ স্যন্তি) প্রাপ্স্যন্তি মম বশীভূতাঃ ভবিষ্যন্তীত্যর্থঃ, যদ্যেতেষামুৎপততামনুসরণং দুষ্করং তথাপি যদৈতে অবরোক্ষ্যন্তি তদা ন দুরাসদা ভবন্তীত্যর্থঃ।

চক্ষুর্বিষয়মতিক্রান্তেষু=চক্ষুষোর্বিষয় স্তং দৃষ্টিবিষয়ং অতিক্রান্তেষু (অতি+ক্রম্+ক্তঃ) অতীতা গতেষু দৃষ্টিবহির্ভূতেষু ইত্যর্থঃ।

লুব্ধকং = ব্যাধং (লুভ্ + ক্তঃ কর্ত্তরি ততঃ স্বার্থে কঃ)

মিত্রং = বন্ধুং (মিদ্যতি স্নিহ্যতীতি মিদ্ + ত্রঃ)

ছেৎস্যতি = কর্ত্তিষ্যতি (ছিদ্ + লৃট্ স্যতি)

পাপশঙ্কয়া = পাপাৎশঙ্কা তয়া অনিষ্টসজ্ঘটনভয়েন।

শতদ্বারং বিবরং = শতং দ্বারাণি যস্য তৎ ; বিবরং গর্ত্তং।

কপোতাবপাতভয়াৎ······স্থিতঃ = কপোতানাং অবপাতঃ (অব + পৎ + ঘঞ্) অবরোহণং তস্মাৎ ভয়ং তস্মাৎ। তূষ্ণীং (অব্যয়ং) নিঃশব্দং। যুগপদবরোহতাং কপোতানাং মহান্ পক্ষশব্দঃ জাতঃ তমেব ভয়কারণমাশঙ্ক্য ভীতঃ সন্ নিঃশব্দং স্থিত ইত্যর্থঃ।

সম্ভাষসে = আমন্ত্রয়সে (সম্ + ভাষ্ + লট্ সে)

তদ্বচনং প্রত্যভিজ্ঞায় = তস্য চিত্রগ্রীবস্য বচনং প্রত্যভিজ্ঞায় জ্ঞাত্বা স্বরসংযোগেন চিত্রগ্রীব এব মা মাহ্বয়তীতি বিদিত্বেত্যর্থঃ।

সসম্ভ্রমং = সবহুমানং (সম্ভ্রমেণ সহ বর্ত্তমানমিতি সহার্থে বহুব্রীহিঃ)

আঃ পুণ্যবান্·········সমায়াতঃ = মমভাগ্যোদয়াৎ বহোঃ কালাৎ পরমদ্য প্রিয়সুহৃদা চিত্রগ্রীবেণ মিলিতোঽস্মীত্যর্থঃ।

(২৭) যস্যেতি। যস্য জনস্য মিত্রেণ বন্ধুনা সহ সম্ভাষঃ আলাপঃ যস্য জনস্য মিত্রেণ সংস্থিতিঃ (সম্ + স্থা + ক্তিঃ) সহবাসঃ একত্রাবস্থানমিতি যাবৎ যস্য জনস্য মিত্রেণ সংলাপঃ মিথোভাষণং অন্যোন্যস্মৈ রহস্যপ্রকাশপূর্ব্বকঃ বিশ্রম্ভালাপঃ। ততঃ তস্মাৎ জনাৎ ইহ জগতি পুণ্যং (পূ + ডুণ্যঃ) বিদ্যতে অস্যেতি পুণ্যবান্ সৌভাগ্যশালী ন অস্তি বিদ্যতে। অকৃত্রিমেণ বন্ধুনা সহ সংলাপাদের্জনিতাৎ সুখসন্তানাৎ ন কিমপ্যধিকং পুণ্যফলমস্তীত্যর্থঃ।

সবিস্ময়ঃ = বিস্ময়েন আশ্চর্য্যেণ সহ বর্ত্তমানঃ অচিন্তনীয়ং জালবন্ধনং দৃষ্ট্বা বিস্ময়াপন্নঃ সন্নিত্যর্থঃ।

কিমেতৎ = এতৎ জালবন্ধনং কিং কথং বৃত্তমিতিশেষঃ।

অস্মাকং·········ফলমেতৎ = ন বিমৃষ্য করোতীতি অবিমৃষ্যকারী (ন + বি + মৃষ্ + যপ্ + কৃ + ণিন্) তস্য ভাবঃ তস্যাঃ অপরিণামদর্শিতায়াঃ এতৎ

জালবন্ধনং ফলং পরিণামভূতং। অপরিণামদর্শিনামেবং বন্ধনাদ্যাপদো-ঘটন্তে ইত্যর্থঃ।

(২৮) রোগেতি। রোগঃ (রুজ্ + ঘঞ্) পীড়া শোকঃ (শুচ্ + ঘঞ্) পুত্রাদিনাশজনিতং দুঃখং বন্ধনং কারারোধনাদিকং ব্যসনং (বি + অস্ + অনট্) বিপৎ এতানি রোগাদীনি দেহিনাং শরীরিণাং আত্মনঃ স্বস্য অপরাধাঃ অবিবেকাদিরূপাঃ দোষাঃ তে এব বৃক্ষাঃ তেষাং ফলানি পরিণামভূতানি। বৃক্ষেভ্যঃ ফলানীব দেহিনাং অবিবেকাদিভ্যঃ রোগাদয় উৎপদ্যন্তে ইত্যর্থঃ।

অস্মদাশ্রিতানাং = অস্মান্ আশ্রিতাঃ (আ + শ্রি + ক্তঃ) অস্মদাশ্রিতা স্তেষাং অস্মদধীনানাং।

ছিন্ধি = খণ্ডয় (ছিদ্ + লোট্ হি)

অল্পশক্তিঃ = অল্পা শক্তিঃ (শক্ + ক্তিঃ) যস্য সঃ স্বল্পবলঃ।

যাবচ্ছক্যং = শক্যং (শক্ + যঃ) যাবদ্যোগে দ্বিতীয়া।

নীতিবেদিনাং = নীতিং বিদন্তি যে তে তেষাং (নীতি + বিদ্ + ণিন্ কর্ত্তরি ষষ্ঠী।

সম্মতং = অনুমোদিতং (সম্ + মন্ + ক্তঃ কর্ম্মণি)

আত্মপরিত্যাগেন……সম্মতং = আত্মানং সততং রক্ষেদিতি নীতৌ আত্ম-রক্ষণে উপেক্ষাং কৃত্বা আশ্রিতরক্ষণং নীতিবেদিনো নানুমোদন্তে ইত্যর্থঃ।

(২৯) ধর্ম্মেতি। প্রাণাঃ জীবনং ধর্ম্মঃ অহিংসাদিঃ অর্থঃ অর্জনবর্দ্ধন-সংরক্ষণাত্মকং ধনং কাম্যতে ইতি কামঃ (কম্ + ঘঞ্) 'পুংসো যা বিষয়াপেক্ষা স কাম ইতি ভণ্যতে' ইত্যুক্তলক্ষণঃ ভোগাভিলাষঃ মোক্ষঃ অপবর্গঃ জীবাত্ম-পরমাত্মনোরুপাধিবর্জনাদৈক্যমিতি যাবৎ তেষাং চতুর্ব্বর্গস্যেত্যর্থঃ সংস্থিতি হেতবঃ রক্ষাকারণানি তান্ প্রাণান্ নিঘ্নতা (নি + হন্ + শতৃ বিনাশয়তা জনেন (কর্ত্তা) কিং ন হতং (হন্ + ক্তঃ কর্ম্মণি) বিনাশিতং। চতুর্ব্বর্গসাধনভূতেষু প্রাণেষু বিনাশিতেষু ধর্ম্মাদিকং সর্বমেব তৈঃ সহ বিনষ্টং ভবতীত্যর্থঃ। রক্ষতা (রক্ষ্ + শতৃ ৩।১) তানিতিশেষঃ জনেন কিং ন রক্ষিতং। শরীরমাদ্যং খলু ধর্ম্মসাধন মিতি ভাবঃ।

ঈদৃশী = ইয়মিব দৃশ্যতে হসৌ ইতি (ইদম্—দৃশ—টক্) এবম্প্রকারা

আত্মানং সততং রক্ষেদেবংরূপেত্যর্থ'।

সোঢ়ুং = দ্রষ্টুং (সহ + তুম্)

নীতিস্তাবৎ……অসমর্থঃ = আশ্রিতদুঃখস্যৈকান্তদুঃসহত্বাৎ ন কথমপি নীতি মনুসর্ত্তুং শক্নোমীত্যর্থঃ।

অয়ং……হেতুঃ = আত্মপরিত্যাগেনাশ্রিতরক্ষণস্যেদমদ্বিতীয়ং কারণান্তরং।

(৩০) জাতীতি। এষাং কপোতানাং জাতিঃ কপোতত্বং (বয়ং সর্বেঽপি কপোতাঃ) দ্রব্যং সম্পৎ (অস্মাকং সর্বেষামেব পক্ষচঞ্চ্বাদয়ঃ সমসম্পদঃ) বলং সামর্থ্যং উৎপতনাদৌ শক্তি রিতি যাবৎ। এষাং ময়া সহ সাম্যং একরূপং এতেভ্যঃ জাত্যাদীনাং ন কোঽপি বিশেষো হস্তীত্যর্থঃ। এবং স্থিতে মম প্রভুত্বং মৎপ্রভুত্বং তস্য ফলং মৎকর্ত্তৃত্বফলং ময়ি অর্পিতস্য আধিপত্যস্য উপযোগমিত্যর্থঃ। ব্রূহি (ব্রূ—লোট্ হি) কথয় ত্বমিতিশেষঃ। কদা কস্মিন্ কালে নেদানীং চেদিতিভাবঃ। তৎ প্রভুত্বফলং কিং ভবিষ্যতি। যদ্যহমেতান্ বিপদঃ পরিত্রাতুং ন শক্নুয়াম্ তর্হি মে কপোতরাজত্বং বিফলং স্যাদিত্যর্থঃ। আর্ত্তত্রাণং হি রাজ্ঞাং ধর্ম্ম ইতি ভাবঃ।

(৩১) ধনানীতি। প্রজ্ঞা বিদ্যতে অস্য প্রাজ্ঞঃ (প্রজ্ঞা—ষ্ণঃ) বুদ্ধিমান্ জনঃ পরার্থে পরস্য অর্থঃ প্রয়োজনং তস্মিন্ পরোপকারায় ধনানি জীবিতং (জীব + ক্তঃ ভাবে) প্রাণান্ উৎসৃজেৎ (উৎ—সৃজ — বিধিলিঙ্ যাৎ) ত্যজেৎ লব্ধস্য ধনস্য ব্যয়ে জাতস্য মরণে চ নিয়তে (নি + যম্ + ক্তঃ) নিশ্চিতে সতি সৎ সাধু নিমিত্তং কারণং তস্মিন্ ত্যাগঃ ধনপ্রাণানামিত্যর্থঃ। বরং শ্রেয়ান্ সাধুসম্মত ইতিযাবৎ। ধনপ্রাণানা মনিত্যতায়াং তৈঃ সদনুষ্ঠানং প্রশংসনীয় মিত্যর্থঃ।

(৩২) যদীতি। যদি অনিত্যেন অস্থিরেণ ক্ষণবিধ্বংসিনেতি যাবৎ মলং বহতি যঃ সঃ তেন (মল + বহ্ + ণিন্) কায়েন (চীয়তে অন্নাদিভিরিতি চি + ঘঞ্) দেহেন শরীরেণ নিত্যং স্থিরং নির্ম্মলং বিশুদ্ধং যশঃ কীর্ত্তিঃ লভ্যেত (লভ্ + বিধিলিঙ্ ঈত কর্ম্মণি) প্রাপ্যেত জনেনেবিত শেষঃ। মু ভোঃ (হিরণ্যকসম্বোধনমিদং) তৎ তদা কিং কিং নাম বস্তু ন লব্ধং ভবেৎ অপিতু সর্বমেব। অল্পমূল্যেন বহুমূল্যস্য বিনিময়ঃ মহান্ লাভ ইতি ভাবঃ।

(৩১) শরীরস্যেতি। শরীরস্য কায়স্য গুণানাং দয়াদাক্ষিণ্যাদীনাং অন্তরং প্রভেদঃ অত্যন্তং অতীব দূরং অতিমহৎ শরীরগুণয়োঃ সাদৃশ্যং ন কথমপি সঙ্গচ্ছতে ইত্যর্থঃ। অত্র হেতুমাহ শরীরং ক্ষণেন বিধ্বংসতে যৎ তৎ (ক্ষণ + বি + ধ্বন্‌স্‌ + ণিন্‌) ক্ষণভঙ্গুরং অস্থির মিতি যাবৎ গুণাঃ কল্পস্য অন্তঃ তস্মিন্‌ তিষ্ঠন্তি যে তে (কল্পান্ত + স্থা + ণিন্‌) প্রলয়েঽপিস্থিতিশীলাঃ। যুগৈকসিদ্ধাঃ গুণাঃ যুগান্তেঽপি ন বিলীনা ভবন্তীত্যর্থঃ।

প্রহৃষ্টমনাঃ = প্রহৃষ্টং (প্র + হৃষ্‌ + ক্তঃ) মনো যস্য সঃ। সন্তুষ্টচিত্তঃ। চিত্রগ্রীবস্যাসাধারণয়া আশ্রিতবৎসলতয়া নিতরাং প্রীত ইত্যর্থঃ।

অনেন ...... যুজ্যতে = আশ্রিতেষু বাৎসল্যং (বৎসল + ষ্যঃ) স্নেহঃ তেন। ত্রয়াণাং লোকানাং সমাহারঃ ত্রিলোকী ত্রিলোকী এব ত্রৈলোক্যং (ত্রিলোক + ষ্যঃ) ত্রিভুবনং তস্য। ভবাদৃশে আশ্রিতবৎসলে ত্রিভুবনস্যাধিপত্যমপি সঙ্গচ্ছতে কিমুত কপোতানা মিত্যর্থঃ।

সর্বথা ...... কর্ত্তব্যা = জালবন্ধনেনাবমানিতস্য মে জীবিতং ধিগিতি আত্মাপকর্ষচিন্তা ন কার্য্যা প্রত্যুত দৈবদুর্বিপাকবশাদিদং বৃত্তমিতি চিত্তং বিনোদয়িতব্য মিত্যর্থঃ।

আতিথ্যং = অতিথিসৎকারঃ (অততি গচ্ছতীতি অৎ + ইথিন্‌) অতিথেঃ কর্ম্ম আতিথ্যং (অতিথি + ষ্যঃ)

সম্প্রেষিতঃ = বিসর্জ্জিতঃ (সং + প্র + ইষ্‌ + ক্তঃ কর্ম্মণি) হিরণ্যকেনেতি শেষঃ।

সর্ববৃত্তান্ত দর্শী = সর্বং বৃত্তান্তং পশ্যতি যঃ সঃ (সর্ববৃত্তান্ত + দৃশ্‌ + ণিন্‌) হিরণ্যকচিত্রগ্রীবয়োঃ মৈত্রীং তৎসমুচিতং জালবন্ধনমোচনসম্ভাষণাদিকং সর্বং ব্যাপারং প্রত্যক্ষং কৃত্বেত্যর্থঃ।

অতোঽহমপি ...... অর্হসি = ভবতো মিত্রানুরাগং সমবলোক্য ভবতা সহ মৈত্রীং কর্ত্তুং সমুৎসুকং মে চেতঃ। অতো মিত্রত্বেন স্বীকৃত্য ময্যনুকম্পাং প্রদর্শয়িতু মর্হসীত্যর্থঃ।

আঃ ...... মৈত্রী = ত্বয়া সহ অস্মাকং মৈত্রী ন কথমপি যুজ্যতে ইত্যর্থঃ।

(৩৪) যদিতি। লোকে জগতি যৎ বস্তু যেন বস্তুনা সহ যুজ্যতে) (যুজ

ঞি + বিধিলিঙ্‌যা ২) আবয়োর্মৈত্রী ন সঙ্গচ্ছতে ইতিভাবঃ। অহং অন্নং (অদ্‌ + ক্তঃ) ভক্ষ্যং বস্তু ভবত ইতি শেষঃ। ভবান্‌ ভোক্তা (ভুজ্‌ + তৃণ্‌) ভক্ষকঃ প্রীতিঃ আবয়োরিতি শেষঃ কথং কেন প্রকারেণ ভবিষ্যতি ন কেনাপীত্যর্থঃ।

(৩৫) ভক্ষ্যেতি। ভক্ষ্যশ্চ ভক্ষকশ্চ তৌ তয়োঃ খাদ্যখাদকয়োঃ প্রীতিঃ (প্রী + ক্তিঃ) প্রণয়ঃ বিপত্তেঃ (বি + পদ্‌ + ক্তিঃ)। আপদঃ বিনাশস্যেতি যাবৎ কারণং হেতুঃ মতং বিদুষামিতিশেষঃ। বিশৃগালাৎ শৃগালম্‌ আশ্রিত্য (যবর্থে পঞ্চমী) পাশবদ্ধঃ অসৌ বক্ষ্যমাণঃ মৃগঃ কাকেন কেনচিৎ বায়সেন রক্ষিতঃ ত্রাতঃ পাশাদুন্মোচিত ইতি যাবৎ।

অরণ্যানী = মহারণ্যং (অর্য্যতে শেষে বয়স্যত্রেতি (ঋ + অন্যঃ ততঃ আনুক্‌ ঈপ্‌ চ)

হৃষ্টপুষ্টাঙ্গঃ = হৃষ্টং স্ফূর্ত্তিমাপন্নং পুষ্টং মাংসলঞ্চ অঙ্গং যস্য সঃ। স্বাস্থ্যযুক্তস্থূলকায়ঃ।

এতন্মাংসং = এতস্য হরিণস্য মাংসং এতন্মাংসং।

সুললিতং = অতিমনোহরং অত্যন্তমধুরমিত্যর্থঃ। (সু + লল্‌ + ক্তঃ)

বিশ্বাসং তাবদুৎপাদয়ামি = যথায়ং ময়ি বিশ্বসিতি তথাহহং যতিষ্যে ইত্যর্থঃ।

বন্ধুহীনঃ = বন্ধুনা হীনঃ (হা + ক্তঃ কর্ম্মণি।

ইদানীং......প্রবিষ্টোহস্মি = পূর্বমহং বন্ধুহীনঃ জীবন্মৃত ইবাসম্‌ অদ্য তু ত্বাং মিত্রমাসাদ্য মৃতোত্থিত মিবাত্মানং মন্যে ইত্যর্থঃ।

অনুচরেণ = অনু পশ্চাৎ চরতি যঃ সঃ (অনু + চর্‌ + অন্‌ কর্ত্তরি) অনুগামিনা।

ততঃপশ্চাৎ = অনন্তরং (তত ইতি পশ্চাদযোগে পঞ্চমী)

সবিতরি = সূর্য্যে (সূ + তৃণ্‌ ৭। ১)

মরীচিমালিনি = মরীচীনাং কিরণানাং মালা বিদ্যতে অস্যেতি তস্মিন্‌ কিরণমালিনি।

বাসভূমিং = বাসস্য ভূমি স্তাং আবাসস্থানং।

চিরমিত্রং = চিরস্য মিত্রং চিরমিত্রং চিরসুহৃৎ।

অস্মৎসখ্যমিচ্ছন্ = সখ্যুর্ভাবঃ সখ্যং আবাভ্যাং সখ্যং অস্মৎসখ্যং। ইচ্ছন্ অভিলষন্।

অকস্মাৎ = সম্যগনালোচ্য, সবিশেষমবিচার্য্য।

আগন্তুনা = নবাগতেন অজ্ঞাতকুলশীলেন জনেনেত্যর্থঃ (আ + গম্ + তুন্)

(৩৬) অজ্ঞাতেতি। কুলঞ্চ শীলঞ্চ কুলশীলে অজ্ঞাতে অবিদিতে কুল শীলে যস্য তস্য তথোক্তস্য অবিদিতবংশচরিতস্য কস্যচিৎ জনস্য বাসঃ আশ্রয়ঃ ন দেয়ঃ (দা + যঃ কর্ম্মণি) দাতব্যঃ গৃহস্থেনেতি শেষঃ। যং বংশতঃ চরিত্রতো বা ন জানীয়াত্তস্মৈ আশ্রয়দানং ন কর্ত্তব্য মিত্যর্থঃ। যস্য ন জ্ঞায়তে কুলং ন শীলং ন চ সংশ্রয়ঃ ন তেন সঙ্গতিং কুর্য্যাদিতি ভাবঃ। এতদেবোদাহরন্নাহ হি তথাহি মার্জারস্য (বক্ষ্যমাণস্য দীর্ঘকর্ণস্য) দোষেণ পক্ষিশাবকবিনাশ-রূপেণ অপরাধেন জরদ্গবঃ তন্নামা কশ্চিৎ গৃধ্রঃ (গৃধ্ + রঃ) শকুনিঃ হতঃ (হন্ + ক্তঃ কর্ম্মণি) বিনাশিতঃ পক্ষিভিরিতি শেষঃ। পরাপরাধেন পরস্য দণ্ড ইতিভাবঃ। যথা আগন্তুকায় মার্জারায় আশ্রয়ং দত্বা নিরপরাধো জরদ্গবঃ প্রাণদণ্ড মবাপ তথা আবয়ো রপ্যেবং কিমপি ঘটিতুং ন চিত্রমিত্যর্থঃ।

ভাগীরথীতীরে = গঙ্গাতীরে (ভগীরথেন আনীতা তৎসম্বন্ধিনীবেতি (ভগীরথ + ষ্ণঃ স্ত্রী)

কৃপয়া = অনুকম্পয়া (হেত্বর্থে তৃতীয়া)

তজ্জীবনায় = তস্য জীবনং তস্মৈ তজ্জীবনং রক্ষিতুং (তুমন্তস্য বা লোপ ইতি চতুর্থী)

তদ্বৃক্ষবাসিনঃ = তস্মিন্ বৃক্ষে বসন্তি যে তে তথোক্তাঃ। পর্কটীবৃক্ষে নির্ম্মিতেষু নীড়েষু অবতিষ্ঠমানাঃ।

স্বাহারাৎ = স্বেষাং আহারঃ (আ + হৃ + ঘঞ্ কর্ম্মণি) খাদ্যং তস্মাৎ।

পক্ষিশাবকান্ = পক্ষিণাং শাবকাঃ (শব্ + ঘঞ্ স্বার্থে কঃ) তান্ পক্ষি শিশূন্।

আয়ান্তং = (আ + যা + শতৃ ২। ১)

ভয়ার্ত্তৈঃ = ভয়েন ঋতাঃ তৈঃ ভয়কাতরৈঃ (তৃতীয়াতৎপুরুষে ঋতো বৃদ্ধিঃ)

কোলাহলঃ = কলরবঃ (কুল্ + ঘঞ্ তমাহলতীতি কোল + আ + হল্ অঃ)

হা হতো ঽস্মি = কদাচিদয়ং জরদ্গবঃ মাং পক্ষিশাবকান্ ভক্ষিতুকামং বিদিত্বা হন্যাদিত্যর্থঃ।

(৩৭) তাবদিতি। যাবৎ যাবৎকালপর্য্যন্তং ভয়ং (বিভেতি অস্মাদিতি ভী + অল্) ভয়কারণং অনাগতং অনুপস্থিতং তাবৎ তাবৎকালপর্য্যন্তং (যাবত্তাবদিতি কালবাচকত্বাৎ দ্বিতীয়া) ভয়স্য ভয়াৎ (সম্বন্ধবিবক্ষয়া ষষ্ঠী) ভেতব্যং (ভী + তব্যঃ ভাবে) শঙ্কিতব্যং জনৈরিতি শেষঃ। তু কিন্তু ভয়ং আগতং উপস্থিতং বীক্ষ্য (বি + ঈক্ষ্ + যপ্) দৃষ্ট্বা উচিতমনতিক্রম্য যথোচিতং যথাযোগ্যং প্রতিকুর্য্যাৎ (প্রতি + কৃ + বিধিলিঙ্ যাৎ) প্রতিবিদধ্যাৎ জন ইতি শেষঃ। ভয়সম্ভাবনায়াং সাশঙ্কমাচরিতব্যং উপস্থিতে তু ভয়কারণে তৎপ্রতীকারায় যতেতেত্যর্থঃ।

সন্নিধানে = সমীপে (সম্ + নি + ধা + অনট্) জরদ্গবস্যেতি শেষঃ।

আলোচ্য = মনসি বিচিন্ত্য (আ + লোচি + যপ্)

আর্য্য = মান্য (ঋ + ণ্যৎ) " কর্ত্তব্য মাচরন্ কামমকর্ত্তব্য মনাচরন্। তিষ্ঠতি প্রকৃতাচারে স বা আর্য্য ইতিস্মৃতঃ।"

বধ্যঃ = বধার্হঃ (বধমর্হতীতি বধ + যৎ)

(৩৮) জাতীতি। ক্বচিৎ কস্মিংশ্চিৎ দেশে, কশ্চিৎ জনঃ জাতিরেব জাতিমাত্রং তেন কেবলয়া জাত্যা কিং হন্যতে বিনাশ্যতে বা অথবা পূজ্যতে শ্লাঘ্যতে লোকৈরিতি শেষঃ। অয়ং শত্রুজাতীয়ঃ অয়ং মিত্রজাতীয়ো বেতি বিবিচ্য কিং কমপি হন্যাৎ পূজয়েত বা। নহীদমুচিত মিত্যাহ ব্যবহারং (বি + অব + হৃ + ঘঞ্) আচরণং পরিজ্ঞায় সবিশেষং বিদিত্বা বধ্যঃ বধার্হঃ অথবা পূজ্যঃ পূজনীয়ঃ ভবেৎ। পূর্ব্বং তাবন্মমাচরণং পরিজানীহি ততোবধ্যশ্চেৎ হনিষ্যসীত্যর্থঃ।

কিমর্থং = কস্মৈ ইতি কিমর্থং (অর্থেন নিত্যসমাসঃ)

নিত্যস্নায়ী = নিত্যং স্নাতি যঃ সঃ (নিত্য + স্না + ণিন্) নিত্যগঙ্গাস্নান-শীলঃ।

নিরামিষাশী = নির্নাস্তি আমিষং যস্মিন্ তৎ অশ্নাতি যঃ সঃ (নিরামিষ +

অশ্ + ণিন্) মৎস্যমাংসাহারে বিরতঃ।

ব্রহ্মচারী = ব্রহ্মণে বেদায় তদ্গ্রহণায় চরতীতি (ব্রহ্মন্ + চর্ + ণিন্) ব্রহ্মচর্য্যব্রতাবলম্বী।

চান্দ্রায়ণব্রতং = চান্দ্রঃ চন্দ্রলোকঃ অয্যতে প্রাপ্যতে অনেনেতি (চান্দ্র + অয়্ + অনট্) তচ্চ ব্রতঞ্চেতি চান্দ্রায়ণব্রতং পক্ষদ্বয়সাধ্যং অন্নপিণ্ডস্য হ্রাসবৃদ্ধি-নিয়মযুক্তং চন্দ্রলোকপ্রাপ্তিফলকং ব্রতং একৈকং হ্রাসয়েৎ পিণ্ডং কৃষ্ণে শুক্লে চ বৰ্দ্ধয়েদিতি লক্ষণাৎ।

আচরন্ = অনুতিষ্ঠন্ (আ + চর্ + শতৃ)

ধৰ্ম্মজ্ঞানরতান্ = ধৰ্ম্মস্য জ্ঞানং তস্মিন্ রতাঃ তান্ ধৰ্ম্মাচরণৈকব্রতান্।

বিশ্বাসভূময়ঃ = বিশ্বাসভাজনানি (ইতিযোগে প্রথমা)

প্রস্তুবন্তি = বর্ণয়ন্তি (প্র + স্তু + লট্ অন্তি)

ভবদ্ভ্যঃ = গৌরবাদ্বহুবচনং (আখ্যাতোপযোগে ইতি অপাদানত্বাৎ পঞ্চমী)

বিদ্যাবয়োবৃদ্ধেভ্যঃ = বিদ্যা চ বয়শ্চ তাভ্যাং বৃদ্ধাঃ তেভ্যঃ বিদ্যয়া বয়সা চ প্রবীণেভ্যঃ সৰ্ব্বথা ধৰ্ম্মোপদেশদানে সমর্থেভ্য ইতিভাবঃ।

উদ্যতাঃ = কৃতোদ্যোগাঃ (উৎ + যম্ + ক্তঃ কৰ্ত্তরি)

(৩৯) অরাবিতি। অরৌ (ঋ + ইঃ) শত্রৌ অপি কিমুত মিত্রে ইতি অপেঃ সার্থকতা। গৃহং আগতে উপস্থিতে সতি উচিতং যথাযোগ্যং আতিথ্যং (অতিথেঃ কৰ্ম্মেতি অতিথি + ষ্যঃ) অতিথিসৎকারঃ কাৰ্য্যং করণীয়ং সৰ্ব্বত্রা-ভ্যাগতো গুরুরিতি মন্যমানেন গৃহস্থেন অভ্যাগতাঃ শত্রবোঽপি পূজিতব্যা ইত্যর্থঃ। অত্র দৃষ্টান্তমাহ দ্রুমাঃ বৃক্ষাঃ পার্শ্বং গতঃ তস্মাৎ পার্শ্ববৰ্ত্তিনঃ ছেত্তুঃ (ছিদ্ + তৃণ্ ৫।১) ছেদকাৎ সংহারকাদপীতি ভাবঃ ছায়াং ন উপসংহরতি (উপ + সম্ + হৃ + লট্ তি) আকর্ষতি। বৃক্ষা শ্ছেদকায়েব সাধবঃ শত্রবেঽপি আশ্রয়দানে ন কাতরা ভবন্তীত্যর্থঃ।

যদি……নাস্তি = স্বোদরপূরণেঽপি অসমর্থাম্মত্তঃ কুতোঽতিথিসৎকার-লাভাশেত্যাশঙ্ক্যাহ যদিবেতি।

প্রীতিবচসা = প্রীতয়ে বচঃ তেন মধুরসম্ভাষণেন।

(৪০) তৃণানি। তৃণানি কুশাদয়ঃ কুশাদিনির্ম্মিতমাসনমিত্যর্থঃ। ভূমিঃ বিশ্রামার্থং স্থানং উদকং পাদপ্রক্ষালনার্থং জলং চতুর্ণাং পূরণী (চতুর্ + থঃ) চতুর্থী সুনৃতা সত্যপ্রিয়া বাক্ মধুরসম্ভাষণ মিত্যর্থঃ। এতানি পূর্ব্বোক্তানি তৃণাদীনি চত্বারি অপি অন্নাদ্যভাবে ইতিভাবঃ। সতাং সাধূনাং গেহে গৃহে কদাচন ন উচ্ছিদ্যন্তে (উৎ+ছিদ্ +লট্ অন্তে কর্ম্মণি) ন প্রত্যাদিশ্যন্তে। অন্নাভাবেঽপি আসনাদিদানেনাতিথয়ঃ সৎক্রিয়ন্তে এবেত্যর্থঃ।

(৪১) উত্তমস্যেতি। উত্তমস্য বর্ণস্য ব্রাহ্মণক্ষত্রিয়বৈশ্যশূদ্রাণাং চতুর্ণাং উৎকৃষ্টস্যাপি কস্যচিৎ গৃহং আগতঃ অতিথিভাবেনোপস্থিতঃ নীচঃ ব্রাহ্মণস্য ক্ষত্রিয়াদীনা মেকঃ ক্ষত্রিয়স্য বৈশ্যশূদ্রয়ো রেকঃ বৈশ্যস্য শূদ্রঃ ইত্যেবং হীন-বর্ণোঽপি যথাযোগ্যং যথোচিতং পূজনীয়ঃ আতিথ্যক্রিয়য়া সম্ভাবনীয়ঃ। কুত ইত্যাহ অতিথিঃ অভ্যাগতঃ সর্ব্বে দেবাঃ তৈঃ সদৃশঃ সর্ব্বদেবময়ঃ (তাদ্রূপ্যে ময়ট্) সর্ব্বদেবস্বরূপঃ সর্ব্বেষাং দেবানাং পূজনেন যৎ ফলং লভ্যতে অতিথি-সেবয়াঽপি তদিত্যর্থঃ।

বীতরাগেণ = বীতঃ (বি + ই + ক্তঃ) বিগতঃ রাগঃ বিষয়ানুরাগঃ যস্য সঃ তেন। ভোগ্যবস্তুষু স্পৃহাশূন্যেনেত্যর্থঃ।

দুষ্করং = দুঃ দুঃখেন ক্রিয়তে সাধ্যতে যৎ তৎ (দুঃ + কৃ + অঃ কর্ম্মণি) কঠোরম্।

অধ্যবসিতং = অনুষ্ঠিতং (অধি + অব + সো + ক্তঃ কর্ম্মণি)

যতঃ পরস্পরং......ঐকমত্যং = বিবদমানানাং (বি + বদ্ + শানচ্) বিমতিব্যক্তসহোক্ত্যো রিত্যাত্মনেপদং। একং মতং যেষাং তে একমতা স্তেষাং ভাবঃ ঐকমত্যং (একমত + ষ্যঃ) যদ্যপি ধর্ম্মশাস্ত্রেষু মতভেদা দৃশ্যন্তে তথাপি " মা হিংস্যাৎ সর্ব্বভূতানি " ইতি অহিংসা পরমোধর্ম্ম ইত্যত্র সর্ব্বে এব ধর্ম্মশাস্ত্রকারা অভিন্নমতা ইত্যর্থঃ।

(৪২) সর্ব্বহিংসেতি। যে নরাঃ মনুষ্যাঃ সর্ব্বাঃ হিংসাঃ প্রাণিবধাদয়ঃ তাভ্যঃ নিবৃত্তাঃ বিরতাঃ যে চ সর্ব্বং সহন্তে যে তে সর্ব্বংসহাঃ (সর্ব্ব + সহ্ + খচ্) সর্ব্বসহিষ্ণবঃ সর্ব্বস্য লোকস্য আশ্রয়ভূতাশ্চ যানাশ্রিত্য অনেকে উপজীব-ন্তীত্যর্থঃ। " পঞ্চানামপি যোভর্ত্তা নাসৌ প্রাকৃতমানুষঃ " ইতি ভাবঃ। তে

নরাঃ স্বর্গং গচ্ছন্তি যে তে তথোক্তাঃ স্বর্গবাসোচিতা ভবন্তীতিশেষঃ।

(৪৩) একএবেতি। ধর্ম্মঃ এক এব একমাত্রঃ অনন্যসাধারণ ইত্যর্থঃ সুহৃৎ মিত্রং যোবর্ম্মঃ নিধনেঽপি অনুযাতি অনুগচ্ছতি বন্ধুমিতি শেষঃ। তু কিন্তু অন্যৎ যানরত্নাদিকং সর্ব্বং শরীরেণ সমং সহ নাশং লয়ং গচ্ছতি প্রাপ্নোতি। যানরত্নাদিক মিহ সুখোৎপাদকং ধর্ম্মস্তু পরত্রেহ চ শর্ম্মণে ইতি ভাবঃ।

(৪৪) য ইতি। যঃ যস্য মাংসং অত্তি (অদ্+লট্ তি) উভয়োঃ খাদ্যখাদকয়োঃ অন্তরং প্রভেদং পশ্যত জানীত যূয়মিতি শেষঃ। একস্য খাদকস্য ক্ষণিকা ক্ষণস্থায়িনী অকিঞ্চিৎকরীতি ভাবঃ প্রীতিঃ অন্যঃ খাদকঃ প্রাণৈঃ কর্ত্তৃভিঃ বিমুচ্যতে (বি+মুচ্+লট্ তে কর্ম্মণি) অল্পস্যহেতো র্মহ-দপরাধকরণং মূঢ়বিচেষ্টিত মিতিভাবঃ।

(৪৫) স্বচ্ছন্দেতি। স্বস্য ছন্দো যস্মিন্ তৎ যথা তথা বনে জাতঃ তেন হলচালনাদিব্যাপার মন্তরেণৈব স্বত উৎপন্নেন শাকেনাঽপি বন্যেন ফলমূলা-দিনাঽপীত্যর্থঃ প্রপূর্য্যতে (প্র+পূর্+লট্ তে কর্ত্তরি) উদর মিতি শেষঃ। অস্য দগ্ধং ঘৃণিত মিত্যর্থঃ উদরং তস্য অর্থে নিমিত্তং ঘৃণিতস্যোদরস্য পূরণা-য়েত্যর্থঃ কো জনঃ মহৎ পাতকং (পাতয়তীতি পৎ+ণিচ্+ণকঃ) প্রাণিবধরূপং মহাপাপং কুর্য্যাৎ ন কোঽপীত্যর্থঃ।

অপত্যানি=ন পততি বংশো যেন জাতেন তদপত্যং তানি (ন+পৎ+যঃ) সন্তানাঃ।

শোকার্ত্তৈঃ=শোকেন ঋতাঃ তৈঃ শোককাতরৈঃ।

জিজ্ঞাসা=জ্ঞাতুমিচ্ছা (জ্ঞা+সন্+অঃ স্ত্রী) অপত্যানাং বিনাশকারণ মনুসন্ধাতুং পৃচ্ছা।

নিরূপয়দ্ভিঃ=অন্বিষ্যদ্ভিঃ (নি+রূপি+শতৃ)

স্নেহানুবৃত্তিঃ=স্নেহস্য অনুবৃত্তিঃ স্নেহানুবৃত্তিঃ স্নেহাচরণং প্রণয়বন্ধন-মিত্যর্থঃ।

উত্তরোত্তরং=ক্রমশঃ। বর্দ্ধতে ইতিক্রিয়ায়া বিশেষণং।

(৪৬) যত্রেতি। যত্র যস্মিন্ দেশে বিদ্বান্ (বিদ্+শতৃ) জনঃ বিদ্বজ্জনঃ

পণ্ডিতোজনঃ ন অস্তি ন বিদ্যতে তত্র তস্মিন্ দেশে অল্পা ধীঃ বুদ্ধির্যস্য সঃ ক্ষুদ্রবুদ্ধিরপি শ্লাঘ্যঃ প্রশংসনীয়ঃ ভবতীতিশেষঃ। তদেবোপপাদয়ন্নাহ নিরস্তঃ শূন্যঃ পাদপঃ বৃক্ষঃ যস্মিন্ তস্মিন্ তথোক্তে দ্রুমশূন্যে দেশে এরণ্ডঃ তন্নাম্না প্রসিদ্ধঃ উদ্ভিজ্জবিশেষঃ অপি দ্রুমইবাচরতীতি দ্রুমায়তে (দ্রুম + আচারে ক্যঙ্)-দ্রুমত্বেন পরিগণ্যতে। মাদৃশানামসদ্ভাবাদেব স্বল্পধিয়া ঽপি ত্বয়া শ্লাঘ্য-বোধেনানেন মৈত্রী কৃতেতিভাবঃ।

(৪৭) অয়মিতি। অয়ং নিজঃ আত্মীয়ঃ বা অথবা অয়ং পরঃ অনাত্মীয়ঃ ইতি এবং লঘু চেতঃ চিত্তং যেষাং লঘুচিত্তানাং গণনা বিবেচনা। তু কিন্তু উদারং মহৎ চরিতং যেষাং তেষাং মহাত্মনাং বসূনি ধীয়ন্তে অস্যামিতি (বসু + ধা + কঃ) বসুধা পৃথিবী এব কুটুম্বকং কুলং পোষ্যবর্গ ইতিযাবৎ। তাদৃশাঃ পুরুষাঃ সর্বানেব বসুধাবাসিনো ভ্রাতৄন্ মন্যন্তে ইত্যর্থঃ। অতো ন মাং পরং সম্প্রতিপত্তুমর্হসীতি ভাবঃ।

কিমনেনোত্তরেণ—অনেন এবংবিধেন উত্তরেণ উত্তরোত্তরবাক্প্রপঞ্চেন কিং কিং প্রয়োজনং ন কিমপীত্যর্থঃ।

সর্বৈরেকত্র······স্থীয়তাম্—একত্র একস্মিন্ স্থানে। বিশ্রম্ভেন (বি + শ্রম্ভ্ + ঘঞ্) আলাপাঃ তৈঃ বিশ্বাসপূর্ণৈঃ প্রণয়গর্ভৈর্বা সম্ভাষণৈঃ। সর্ব এব বয়ং প্রণয়ালাপৈঃ কালমতিবাহয়ন্তঃ সুখিনো ভবামেত্যর্থঃ।

(৪৮) নেতি। কশ্চিৎ জনঃ কস্যচিৎ জনস্য ন মিত্রং বন্ধুঃ কশ্চিৎ জনঃ কস্যচিৎ জনস্য ন রিপুঃ শত্রুঃ। ন কোঽপি কস্যচিৎ মিত্রং শত্রুর্বা ভূত্বা জায়েতেত্যর্থঃ। ব্যবহারেণ হিতাহিতাচরণেন মিত্রাণি তথা রিপবঃ শত্রবঃ জায়ন্তে (জন্ + লট্ অন্তে)

নিভৃতং = বিজনে। ব্রূতে ইতি ক্রিয়ায়া বিশেষণং।

কালপাশাৎ—কালস্য যমস্য পাশস্তস্মাৎ। সংশয়িতজীবিতাদিত্যর্থঃ।

কপটপ্রবন্ধেন = কপটঃ ছলপূর্ণঃ প্রবন্ধঃ প্রয়োগঃ উপায়ো বা তেন। ছল-প্রয়োগেণ।

মনোরথসিদ্ধিঃ—মনঃ রথো যত্র সঃ মনোরথঃ। (ইষ্যমাণপ্রাপকত্বান্মন-সোরথত্ব মুক্তং) অভীষ্টং তস্য সিদ্ধিঃ। মৃগমাংসাহাররূপস্যাভীষ্টস্য পূরণ-

মিত্যর্থঃ।

উৎকৃত্যমানস্য—ছিদ্যমানস্য (উৎ+কৃত্+শানচ্ কর্ম্মণি)

মাংসাসৃগ্লিপ্তানি—মাংসঞ্চ অসৃক্‌চ মাংসাসৃজী তাভ্যাং লিপ্তানি মিশ্রিতানি রক্তমাংসসহিতানীতি যাবৎ।

ত্রায়স্ব—পাশবন্ধনাদুন্মোচয় (ত্রৈ+লোট্ স্ব)

(৪৯) উৎসবইতি। উৎসবে বিবাহাদাবানন্দজনকব্যাপারে ব্যসনে (বি+অস্+অনট্) বিপদি দুঃ দুষ্প্রাপা ভিক্ষা যস্মিন্ তস্মিন্ দুর্ভিক্ষে অন্নাভাবসময়ে রাষ্ট্রস্য (রাজ্+ট্রণ্) রাজ্যবিপ্লবে বি+প্লু+অল্) রাজ্যোপদ্রবে রাজদ্বারে ধর্ম্মাধিকরণে শ্মশানে প্রেতস্থানে দাহাদ্যন্তেষ্টিকর্ম্মণি যঃ জনস্তিষ্ঠতি বর্ত্ততে অনুকূলয়তীত্যর্থঃ সঃ বান্ধবঃ প্রকৃতো বন্ধুঃ। উৎসবাদাবনুকূলকারিতৈব বন্ধুকৃত্যমিত্যর্থঃ।

দৃঢ়ঃ=কঠিনঃ দুশ্ছেদ ইতি যাবৎ (দৃহ্+ক্তঃ)

স্নায়ুনির্ম্মিতাঃ—স্নায়ুভি দেঁহান্তর্বর্ত্তিভিঃ নাড়ীবিশেষৈঃ নির্ম্মিতাঃ ঘটিতাঃ।

ভট্টারকবারে=ভট্টং স্বামিত্বং ঋচ্ছতীতি (ভট্ট+ঋ+অন্ কর্ত্তরি ততঃ সংজ্ঞায়াং কঃ) ভট্টারকঃ সূর্য্যঃ তস্য বারঃ দিনং তস্মিন্ রবিবারে।

মিত্র যদি......মন্যসে=যদি মাং কালবিলম্বাৎ পাশবিমোচনবিমুখং ন সম্ভাবয়সীত্যর্থঃ।

প্রদোষকালে—সন্ধ্যা সময়ে। ইতস্ততো বিচর্য্য আবাসপ্রতিগমনস্য কালে উপস্থিতে সতীত্যর্থঃ।

অন্বিষ্যন্=নিরূপয়ন্ (অনু+ইষ্+শতৃ)

অবধীরিতসুহৃদ্বাক্যস্য=অবধীরিতং (অব+ধীর্+ক্তঃ কর্ম্মণি) অবজ্ঞাতং সুহৃদোবাক্যং বচনং তস্য। যতঃ অজ্ঞাতকুলশীলস্যেতি ত্বদ্বচনং ন শ্রুতং ততস্তৎফলং প্রাপ্তমিত্যর্থঃ।

৫০) সুহৃদামিতি। হিতং কাময়ন্তে যে তে তেষাং (হিত+কম্+ণিঙ+অঃ কর্ত্তরি) হিতৈষিণাং সুহৃদাং বন্ধূনাং ভাষিতং বচনং ন শৃণোতি আকর্ণয়তি প্রতিপালয়তীতি যাবৎ। তস্য নরস্য বিপৎ আপৎ সন্নিহিতা সমীপবর্ত্তিনী অচিরেণৈবাপততীত্যর্থঃ। স নরঃ শত্রূণাং নন্দনঃ (নন্দি+অনঃ) আনন্দকরঃ

তাদৃশং হি পুরুষং আসন্নবিপদং মত্বা শত্রবো হৃষ্যন্তীত্যর্থঃ।

মন্মাংসার্থী=মম মাংসং মন্মাংসং তদর্থয়তে যঃ সঃ মম মাংসং ভক্ষিতুকামঃ সন্নিত্যর্থঃ।

(৫১) অপরাধ ইতি। মে মম অপরাধঃ দোষঃ ন অস্তি বিদ্যতে ইত্যেতৎ এতাবন্মাত্রং নাহমস্মৈ অপরাদ্ধ ইতি জ্ঞানমেব ন বিশ্বাসকারণং ন প্রত্যয়-হেতুঃ খলাদনিষ্টসংঘটনশঙ্কানিরাসকমিত্যর্থঃ। হি যতঃ নৃন্ শংঙ্কন্তি যে তেভ্যঃ নিসর্গতঃ ক্রূরপ্রকৃতিভ্যঃ গুণবতাং গুণশালিনাং নিরপরাধানামপীত্যর্থঃ ভয়ং অনিষ্টাপাতশঙ্কা বিদ্যতে অস্তি। রন্ধ্রান্বেষিণো হি খলাঃ সাপরাধেষু নিরপরাধেষু চ সমমেবানিষ্টং ঘটয়ন্তীত্যর্থঃ।

[৫২] পরোক্ষ ইতি। অক্ষ্ণোঃ পরং পরোক্ষং তস্মিন্ অসমক্ষে কার্য্যস্য হন্তা তম্ কার্য্যহন্তারং অনিষ্টকারিণ মিত্যর্থঃ। প্রত্যক্ষে সমক্ষে প্রিয়ং বদতীতি প্রিয়বাদী তম্ হিতৈষিতাং প্রকটয়ন্তং পয়ো মুখে যস্য তং বিষকুম্ভমিব বিষপূর্ণ-কুম্ভমিব অত্র ইব ইতি পদ মধ্যাহার্য্যং। বন্ধুং যত্নতঃ যত্নেন বর্জয়েৎ ত্যজেৎ। মানসমপরিজ্ঞায় ন কস্মিন্নপি বিশ্বসিতব্য মিত্যর্থঃ।

কিং ত্বয়া পাপকর্ম্মণা কৃতং=পাপং অসাধু কর্ম্ম যস্য তেন। বিশুদ্ধমতৌ ত্বদ্বচসি কৃতবিশ্বাসে চাস্মিন্ মৃগে এবমাচরণং সর্ব্বথা মহাপাপকর মিত্যর্থঃ।

[৫৩] উপকারিণীতি। উপকরোতীতি তস্মিন্ (উপ—কৃ—ণিন্) উপকারকে বিশ্রব্ধে (বি—শ্রন্ভ্—ক্তঃ কর্ত্তরি) বিশ্বাসমাপন্নে শুদ্ধা নির্ম্মলা মতি র্যস্য তস্মিন্ অকপটহৃদয়ে জনে যঃ পাপং সমাচরতি ঘটয়তি অসত্যে বঞ্চনায়াং সন্ধা অভিসন্ধি র্যস্য তং বঞ্চনৈকব্রতং তং জনং হে ভগবতি বসুধে পৃথ্বি কথং কেন প্রকারেণ বহসি ধারয়সি। অতি দুর্ব্বহঃ তস্য ভার ইতিভাবঃ।

স্তব্ধীকৃত্য=অস্তব্ধান্ স্তব্ধান্ কৃত্বেতি [স্তব্ধ—চ্বিঃ]

হর্ষোৎকল্লকপোলেন=হর্ষেণ মৃগং পাশবদ্ধং দৃষ্ট্বা জাতেন আনন্দেন উৎফুল্লৌ বিকসিতৌ কপোলৌ যস্য তেন।

সত্বরঃ=ত্বরয়া সহ বর্ত্তমানঃ সত্বরঃ ব্যগ্রঃ।

(৫৪) ভক্ষিতেনেতি। ভবতা করণেন ভক্ষিতেন খাদিতেনাপি মম পুষ্কলঃ প্রভূতঃ প্রচুর ইতি যাবৎ আহারঃ ভোজনং ন ভবতীতি শেষঃ। ক্ষুদ্র-

কায়ং ত্বাং ভক্ষিত্বাঽপি ন মে তৃপ্তি র্জায়েতেতি ন মত্তো জীবননাশঃ শঙ্কিতব্য ইত্যর্থঃ। কিন্তু ত্বয়ি (ভাবে সপ্তমী) জীবতি (জীব্—শতৃ ৭।১) সতি হে অনঘ নিষ্পাপ অহং চিত্রগ্রীব ইব জীবামি প্রাণিমি চিত্রগ্রীব ইব ত্বৎসহবাসসুখ মনুভবন্ জীবিতু মিচ্ছামীত্যর্থঃ।

শত্রুপক্ষঃ=খাদ্যখাদকসম্বন্ধাৎ স্বভাববৈরী।

(৫৫) শত্রুণেতি। শত্রুণা (শৎ+রুঃ) প্রতিপক্ষেণ সহ সুশ্লিষ্টেন (সু+শ্লিষ্+ক্তঃ) সুঘটিতেন দৃঢ়েনেতি যাবৎ সন্ধিনা (সম্+ধা+কিঃ) মৈত্রীকরণেন ন সন্দধ্যাৎ (সং+ধা+বিধিলিঙ্ যাৎ) মিলেৎ জনইতি শেষঃ। সন্ধিং কৃত্বাঽপি ন নির্বৃতো ভবেদিত্যর্থঃ। তথাহি পানীয়ং (পা+অনীয়ঃ কর্ম্মণি) জলং সুতপ্তমপি উষ্ণত্বাদিবহ্নিপ্রকৃতিং লভমানমপি পাবকং (পুনাতীতি পূ+ণকঃ) অগ্নিং শময়ত্যেব নির্বাপয়ত্যেব। প্রকৃতি র্দুরতিক্রমেতি ভাবঃ।

(৫৬) দুর্জ্জন ইতি। দুর্জনঃ নিসর্গকুটিলো জনঃ বিদ্যয়া শাস্ত্রজ্ঞানেন অলঙ্কৃতঃ বিভূষিতঃ অপি অনন্যসাধারণো বিদ্বানপি পরিহর্ত্তব্যঃ (পরি+হৃ+তব্যঃ কর্ম্মণি) ত্যক্তব্যঃ গুণবত্তয়া ন কদাচিদপি তস্মিন্ বিশ্বসিতব্যমিত্যর্থঃ। কুতঃ মণিনা রত্নেন ভূষিতঃ সর্পঃ অসৌ দুর্জনঃঃ কিং ন ভয়ঙ্করঃ (ভয়ং করোতীতি ভয়—কৃ—খচ্) ভয়াবহঃ অপিতু ভয়ঙ্কর এব।

আপ্যায়িতঃ···বচনামৃতেন=আপ্যায়িতঃ (আ—প্যায্—ক্তঃ কর্ত্তরি) বর্দ্ধিতঃ। বচন মমৃতমিবেতি বচনামৃতং। আবাভ্যাং সহ মৈত্রীকরণার্থং আগ্রহাতিশয়ব্যঞ্জিকাং অমৃতায়মানাং বচনপরম্পরাং শ্রুত্বা নিতরাংপ্রীতো ঽস্মীত্যর্থঃ।

[৫৭] রহস্যেতি। রহসি ভবং রহস্যং (রহস্—ষ্যঃ) গুপ্তমন্ত্রণং তস্য ভেদঃ অন্যসন্নিধৌ প্রকাশনং যাচ্ঞা ধনাদীনাং প্রার্থনা নৈষ্ঠুর্য্যং নির্দয়তা চলং চিত্তং যস্য তস্য ভাবঃ চলচিত্ততা অব্যবস্থিতচিত্ততা ক্রোধঃ কোপঃ নিঃসত্যতা মিথ্যাবাদিত্বং দ্যূতং [দিব্—ক্তঃ ভাবে] অক্ষক্রীড়া এতৎ পূর্ব্বোক্তং সর্ব্বং মিত্রস্য দূষণং দোষঃ। এতদ্দোষদূষিতেন সহ ন সর্ব্বথা মৈত্রী কর্ত্তব্যেত্যর্থঃ।

এতদ্বচনোক্তং=এতস্মিন্ বচনে উক্তং এতদ্বচনোক্তং রহস্যভেদাদিকমিত্যর্থঃ।

একমপি = অন্যতমপি, ব্যস্তমপি।

অন্যোন্যাহারপ্রদানেন = অন্যোন্যস্মৈ আহারস্য প্রদানং তেন। পরস্পর মাহারীয়দানকর্ম্মণা।

কুশলপ্রশ্নৈঃ = মঙ্গলবার্ত্তাজিজ্ঞাসাভিঃ।

কষ্টলভ্যাহারং = কষ্টেন লভ্যঃ লব্ধুং শক্যং আহারো যস্মিন্ তৎ। অত্র বায়সোচিত মহারীয়ং দুষ্প্রাপমিত্যর্থঃ।

সুনিরূপিতং = নির্দ্ধারিতং।

সহজধার্ম্মিকঃ = ধর্ম্মং বেত্তীতি ধার্ম্মিকঃ (ধর্ম্ম + ষ্ণিকঃ) সহজেন ধার্ম্মিকঃ সহজধার্ম্মিকঃ প্রকৃত্যৈব ধর্ম্মপরায়ণঃ।

সংবর্দ্ধয়িষ্যতি = প্রীণয়িষ্যতি আপ্যায়িষ্যতে (সম্ + বৃধ্ + ণিচ্ + লৃট্ স্যতি)

চিত্রালাপসুখেন = চিত্রাঃ বিবিধাঃ আলাপাঃ তেভ্যঃ সুখং তেন।

ধুরীণঃ = ধুরি অগ্রে স্থিতঃ অগ্রগণ্য ইতি যাবৎ। ধুরং বহতীতি (ধুর্ + খঃ)

কারুণ্যরত্নাকরঃ = করুণৈব কারুণ্যং (করুণা + স্বার্থে ষ্ণ্যঃ) রত্নানাং আকরঃ রত্নাকরঃ সমুদ্রঃ। কারুণ্যস্য রত্নাকরঃ দয়াসাগরঃ। প্রভূতস্য কারুণ্যস্যাধারত্বাৎ রত্নাকর ইত্যুক্তং।

এতস্য······সমর্থঃস্যাৎ = গুণস্তুতিং গুণব্যাখ্যানং। নাহ মেকমুখেনাস্য গুণব্যাখ্যানং কর্ত্তুং সমর্থোঽস্মীত্যর্থঃ।

পরিব্রাজকাবসথঃ = পরিত্যজ্য সর্ব্বাণি কার্য্যাণি ব্রজন্তীতি (পরি + ব্রজ্ + ণকঃ) পরিব্রাজকাঃ যতয়ঃ তেষাং আবসথঃ (আবসত্যত্রেতি আ + বস্ + অথচ্) বাসস্থানং আশ্রম ইতি যাবৎ।

ভোজনাবশিষ্টভিক্ষান্নসহিতং = অবশিষ্যতে যৎ তৎ অবশিষ্টং। ভিক্ষয়া লব্ধং অন্নং ভিক্ষান্নং। ভোজনস্য অবশিষ্টং ভিক্ষান্নং তেন সহিতং। ভোজ-নোদ্বৃত্ততণ্ডুলযুক্তং।

ভিক্ষাপাত্রং = ভিক্ষায়ৈ পাত্রং ভিক্ষাপাত্রং।

নাগদন্তকে = গৃহভিত্তৌ প্রোতে দণ্ডবিশেষে।

উৎপ্লুত্য = উৎপত্য, উল্লম্ফ্য (উৎ + প্লু + যপ)

কথাপ্রসঙ্গাবস্থিতঃ = সুহৃৎসমাভাষণতৎপরঃ সন্নিত্যর্থঃ।

জর্জ্জরবংশখণ্ডেন = বিশীর্ণবংশদণ্ডেন।

অতাড়য়ৎ = আহতবান্।

(৫৮) ধনবানিতি। লোকে জগতি সর্ব্বঃ ধনবান্ সর্ব্বত্র সর্ব্বস্মিন্ স্থানে সর্ব্বদা সর্ব্বস্মিন্ সময়ে বলবান্ বলশালী ভবতীতি শেষঃ। কিমধিকং রাজ্ঞাং নৃপাণাং কিমুতান্যেষা মিত্যর্থঃ অপি প্রভুত্বং আধিপত্যং ধনমূলং সৎ উপজায়তে (উপ + জন্ + লট্‌তে) ধনাভাবে রাজ্ঞামপি প্রভুত্বং নস্যাদেবেত্যর্থঃ।

খনিত্রং = খন্যতে অনেনেতি (খন্ + ইত্রঃ) ভূমিখননসাধন মস্ত্রবিশেষম্ (খোন্তা)

নিজশক্তিহীনঃ = নিজস্য শক্তিঃ সামর্থ্যং তয়া হীনঃ স্বসামর্থ্যরহিতঃ।

সত্ত্বোৎসাহরহিতঃ = সত্ত্বং সাহসং উৎসাহঃ অধ্যবসায়ঃ চিত্তপ্রসাদো বা তাভ্যাং রহিতঃ। হীনসাহসঃ অনির্ব্বৃতচিত্তশ্চ সন্নিত্যর্থঃ।

উৎপাদয়িতুং = উপার্জয়িতুং সংগ্রহীতুমিতিযাবৎ (উৎ + পদ্ + ণিচ + তুম্)

(৫৯) অর্থেনেতি। সর্ব্বঃ জনঃ অর্থেন ধনেন বলবান্ বলশালী অর্থাৎ ধনাৎ পণ্ডিতঃ বিদ্বান্ ভবতি। পশ্য ত্বমিতি শেষঃ অয়ং পাপঃ (অপকারিত্বাদিদং বিশেষণং প্রযুক্তং) অপকারীত্যর্থঃ অয়ং পুরোবর্ত্তী মূষিকঃ স্বজাতিসমতাং মূষিকজাতে স্তুল্যবলত্বং গতঃ প্রাপ্তঃ। পূর্ব্বং তাবৎ মম ধন মপহৃত্য সঞ্চিত্য চ বলেন স্বজাতেরুৎকর্ষং প্রাপদধুনা চ গৃহীতে হস্য ধনে হীনবলঃ সন্ মূষিকো মূষিক এব সংবৃত্ত ইত্যর্থঃ।

এতদ্বৃত্তান্তকথনং = এতস্য বৃত্তান্তস্য চৌর্য্যেণ সঞ্চিতস্য ধনস্য গ্রহণরূপায়া ঘটনায়া ইত্যর্থঃ কথনং বিজ্ঞাপনম্।

পরপিণ্ডেন……পোষয়ামি = পরান্নভোজনেন জীবিকাং নির্ব্বাহয়ামি।

কষ্টং……মৃত্যুদ্বারং = পরান্নেন বর্ত্তনাৎ মৃত্যুরপি সহস্রশঃ শ্রেয়ানিত্যর্থঃ।

(৬০) রোগীতি। রোগী চিররুগ্নঃ চিরং প্রবসতি যঃ স তথোক্তঃ চিরবিদেশবাসী পরস্য অন্নং ভুঙ্‌ক্তে ইতি পরান্নভোজী (পরান্ন + ভুজ্ + ণিন্) পরান্নেন বর্ত্তনশীলঃ পরস্য আবসথঃ আলয়ঃ তস্মিন্ শেতে যঃ সঃ পরাবসথশায়ী পরগৃহে শয়নশীলঃ (সর্ব্বত্র তাচ্ছীল্যে ণিন্) জনঃ যৎ (জীবতীতি ক্রিয়ায়া বিশেষণং) জীবতি প্রাণিতি তৎ (জীবনং) মরণং মৃত্যুবৎ দুঃসহযাতনাপ্রদমিত্যর্থঃ যৎ মরণং সঃ (বিধেয়প্রাধান্যাৎ পুংস্ত্বং) অস্য ঈদৃশাবস্থস্য জনস্য

বিশ্রামঃ শান্তিঃ ক্লেশোপশমায়েত্যর্থঃ। ঈদৃশস্য জীবিতধারণং ক্লেশবহুল মিত্যর্থঃ।

ইত্যালোচ্যাপি = পরান্নেন বর্ত্তনস্য দোষং সবিশেষং বিদিত্বাপি।

গ্রহং = আগ্রহং উদ্যমমিতি যাবৎ।

(৬১) লোভেনেতি। লোভেন হেতুনা বুদ্ধিঃ চলতি ভ্রশ্যতি। লোভঃ তৃষাং উত্‌ত্যুৎকটামিচ্ছাং জনয়তে (জন্+ণিচ্+লট্‌তে) তৃষার্ত্তঃ নিতরাং লুব্ধো জনঃ পরত্র পরস্মিন্ লোকে ইহ অস্মিন্ লোকে চ দুঃখং আশাপূরণাভাবজনিতং ক্লেশং আপ্নোতি প্রাপ্নোতি লুব্ধস্যাশাপূরণপ্রয়াসো নিরন্তরং প্রবর্ত্তত এবেতি নাস্তি তস্য দুঃখনিবৃত্তিরিতি ভাবঃ।

লব্ধঃ……ভবতি = আত্মনে দ্রুহ্যতীতি (অস্মিন্+দ্রুহ্+ণিন্) আত্মানিষ্টকারী। আশায়া নিরবধিকত্বাৎ পরিণাম মবিবিচ্য আত্মনোঽপ্যনিষ্টং ঘটয়েদিত্যর্থঃ।

(৬২) সর্ব্বইতি। যস্য জনস্য মানসং (মন্+অস্+স্বার্থে ষ্ণঃ) চিত্তং ন তুষ্টং তস্য জনস্য সর্ব্বাএব আপদঃ বিপদঃ আপদ্বৎ ক্লেশবহুলা ইত্যর্থঃ। যস্য চ মানসং সন্তুষ্টং তস্য সর্ব্বাঃ সম্পত্তয়ঃ ঐশ্বর্য্যাণি। রাজচক্রবর্ত্তিনো ঽপ্যসন্তুষ্টস্য সর্ব্বমেব ক্লেশাবহং তথা সন্তুষ্টস্য ভিক্ষুকস্যাঽপি সর্ব্বং প্রীতিকরং ভবতীত্যর্থঃ।

(৬৩) সন্তোষেতি। সন্তোষ এব অমৃতং তেন তৃপ্তাঃ তেষাং সন্তোষসদ্ভাবাৎ পার্থিববস্তুষু বীতস্পৃহাণা মিত্যর্থঃ শান্তং চেতঃ যেষাং তথোক্তানাং স্থিরচিত্তানাং জনানাং যৎ যাদৃশং সুখং ভবতীতিশেষঃ ধনায় লুব্ধাঃ তেষাং ধনলুব্ধানাং অতএব আশাপূরণার্থং ইতশ্চ ইতশ্চ চতুর্দ্দিক্ষু ইত্যর্থঃ ধাবতাং (ধাব্+শতৃ ৬।৩) পরিভ্রমতাং জনানাম্ তৎ তাদৃশং সুখং কুতঃ ন কুতোঽপি সম্ভবেদিত্যর্থঃ। সন্তুষ্টস্য সদা সুখমিতিভাবঃ।

(৬৪) অসেবিতেতি। ঈশ্বরস্য (ঈশ্+বরচ্) ধনশালিনঃ দ্বারং ঈশ্বরদ্বারং অসেবিতম্ ঈশ্বরদ্বারং যস্মিন্ তৎতথোক্তম্ অদৃষ্টা অসোঢ়েত্যর্থঃ বিরহস্য পুত্রকলত্রনাশজনিতস্য দুঃখস্য ব্যথা যাতনা যস্মিন্ তৎ। অনুক্তং অকথিতং ক্লীবং ব্যর্থং বচনং যস্মিন্ তৎ তথোক্তং কস্যাপি জনস্য জীবনং ধন্যং শ্লাঘনীয়ং ঈদৃগ্‌জীবনবন্তঃ পুরুষা এব সফলজন্মান ইত্যর্থঃ।

(৬৫) নেতি। তৃষ্ণয়া অত্যুৎ কটধনলালসয়া বাহ্যমানস্য (বহ্+ণিচ্+

শানচ্ কর্ম্মণি) নীয়মানস্য অভিভূয়মানস্যেতি যাবৎ জনস্য যোজনানাং শতং যোজনশতমপি বহুদূরমপীত্যর্থঃ। ন দূরং দূরত্বেন পরিগণিতং ভবতীতি শেষঃ। সন্তুষ্টস্য নিবৃত্তধনাকাঙ্ক্ষস্যেত্যর্থঃ অর্থে ধনে করপ্রাপ্তে করতলস্থিতে ঽপি কিমুত প্রয়াসলভ্যে ইত্যপেরর্থঃ। আদরঃ যত্নঃ ন ভবতি। নিরাকাঙ্ক্ষস্য কিমনেন আশোপহতাত্মবৃত্তিনা ধনাগমেনেতি ভাবঃ।

অবস্থোচিতকার্য্যপরিচ্ছেদঃ = কার্য্যাণাং পরিচ্ছেদঃ নির্ণয়ঃ কার্য্যপরিচ্ছেদঃ অবস্থায়া উচিতঃ অবস্থোচিতঃ স চাসৌ কার্য্যপরিচ্ছেদশ্চেতি। অবস্থানুরূপ কার্য্যনির্ণয়ঃ।

তদত্র······শ্রেয়ান্ = ইদানীমুপস্থিতেয়ং মে দারিদ্র্যদশা কথং লোকালয়ে স্থিত্বা মুখং দর্শয়ামীতি মাদৃশস্যাবমানিতস্য বিজনবাস এব বিধেয় ইত্যর্থঃ।

অস্মৎপুণ্যোদয়াৎ = মদ্ভাগ্যোপচয়াৎ।

অধুনা······প্রাপ্তঃ = ভাগ্যবশাদিদানীং ভবদাশ্রয়ং প্রাপ্য স্বর্গবাসসুখ মনুভবামীত্যর্থঃ।

পশ্চাদায়ান্তং = অনুপদমাগচ্ছন্তং (আ + যা + শতৃ)

অত্রাবস্থানেন······সনাথীক্রিয়তাম্ = সনাথীক্রিয়তাং অসনাথং সনাথং ক্রিয়তাং (অভূততদ্ভাবার্থে চ্বিঃ) বনমিদং ত্বয়া বিনা অনাথমিবাসীৎ অধুনা চ অত্র অবস্থায় নাথযুক্তং কুরু ইতিভাবঃ।

শরণং = গৃহং আবাসভূমিমিতি যাবৎ। শরণং গৃহরক্ষিত্রোরিত্যমরঃ।

স্বগৃহনির্ব্বিশেষেণ = স্বস্য গৃহং তস্মাৎ নির্ব্বিশেষঃ অভেদজ্ঞানং যস্মিন্ তেন (ভেদবিশেষণে তৃতীয়া)

মিত্রত্বং······স্থীয়তাম্ = আলাপমাত্রেণৈব ভবতা সহ সখ্যং জাতমতঃ স্বগৃহে যথা স্থীয়তে তদ্বদত্র স্বচ্ছন্দং স্থীয়তা মিত্যর্থঃ।

জলাসন্নতরুচ্ছায়ায়াং = জলস্য জলাশয়স্যেত্যর্থঃ আসন্নঃ (আ + সদ্ + ক্তঃ) সন্নিহিতঃ তরুঃ তস্য ছায়া তস্যাম্।

কলিঙ্গবিষয়ে = কলিঙ্গাখ্যে দেশে।

দিগ্বিজয়ব্যাপারক্রমেণ = দিগ্বিজয়প্রসঙ্গেন।

সমাবাসিতকটকঃ = সমাবাসিতঃ (সম্ + আ + বস্ + ণিচ্ + ক্তঃ) সন্নিবেশিতঃ কটকো যেন সঃ সন্নিবেশিতশিবিরঃ কৃতশিবিরসন্নিবেশ ইতি যাবৎ।

কিংবদন্তী=জনরবঃ জনশ্রুতিঃ (কিম্‌+বদ্‌+শতৃ স্ত্রী)

যথাকর্য্যং তথারভ্যতাম্‌=কর্ত্তব্য মবধার্য্য আত্মরক্ষণার্থমুপায়ঃ ক্রিয়তাম্‌ (আ+রভ্‌+লোট্‌ তাম্‌ ভাবে)

স্থলে……প্রকারঃ=স্থলে গমনসময়ে অস্য কা গতিঃ।

বিমুগ্ধ ইব=অভিভূত ইব (বি+মুহ্‌+ক্তঃ)

পরং বিষাদং=আত্যন্তিকং দুঃখং (বি+সদ্‌+ঘঞ্‌)

(৬৬) একস্যেতি। অহং অর্ণবস্য (অর্ণাংসি জলানি সন্তি অস্মিন্নিতি অর্ণস্‌+বঃ) সমুদ্রস্য পারং অপরসীমানমিব একস্য দুঃখস্য চিত্রগ্রীবপাশবন্ধন-রূপস্য অন্তং অবসানং ন গচ্ছামি তাবৎ তাবৎকালং মে মম দ্বিতীয়ং মন্থরস্য কিরাতকরাধিগমনরূপং দুঃখং সমুপস্থিতং আগতম্‌ একস্মাৎদুঃখাৎ দুঃখান্তরে পতিতোঽস্মীত্যর্থঃ। অত্র বিশেষেণ সামান্যস্য সমর্থনরূপং অর্থান্তরং ন্যস্যতি ছিদ্রেষ্বিতি। ছিদ্রেষু রন্ধ্রেষু (ভাবে সপ্তমী) অনর্থাঃ অমঙ্গলানি বহুলীভবন্তি অবহুলা বহুলা ভবন্তীতি অভূততদ্ভাবার্থে চ্বিঃ। সম্পৎ সম্পদং বিপৎ বিপদমনুগচ্ছতীতি ভাবঃ

(৬৭) স্বভাবজমিতি। স্বভাবেন জায়তে যৎ তৎ স্বভাবজম্‌ অকৃত্রিমমিত্যর্থঃ যৎ মিত্রং ভাগ্যেন শুভাদৃষ্টবশেন অভিজায়তে নিষ্পদ্যতে তৎ অকৃত্রিমং (ন+কৃ+ত্রিমক্‌) অহেতুকম্‌ উপকারাদিকারণানপেক্ষীতিযাবৎ সৌহার্দ্দং (সুহৃদ্‌+ষ্ণঃ) যস্য তৎ তথোক্তং তৎ মিত্রং বন্ধুঃ আপৎস্বপি বিপৎসময়েষ্বপি ন মুঞ্চতি ত্যজতি মিত্রমিতি শেষঃ। অহেতুঃ পক্ষপাতো যস্তস্য নাস্তি প্রতিক্রিয়েতি ভাবঃ।

(৬৮) নেতি। স্বভাবজে স্বাভাবিকে অকৃত্রিমে ইতি যাবৎ মিত্রে সুহৃদি পুংসাং যাদৃক্‌ যাদৃশঃ বিশ্বাসঃ প্রত্যয়ঃ তাদৃশঃ বিশ্বাসঃ ন মাতরি ন দারেষু স্ত্রিয়াং ন সোদর্য্যে (সহ সমানে উদরে শয়িতেতি যৎ সাদেশশ্চ) একোদরজাতে ভ্রাতরি ন চ আত্মজে (আত্মনঃ জায়তে ইতি আত্মন্‌+জন্‌+ডঃ) পুত্রে চ ভবতীতি শেষঃ। ন খলু প্রেম চলং সুহৃজ্জনে ইতিভাবঃ।

দুর্দ্দৈবং=দৈবদুর্বিপাকঃ, ভাগ্যবিপর্য্যাসঃ।

অথবা ইত্থমেবৈতৎ=ইত্থং এবংবিধম্‌। অনেন প্রকারেণেতি (ইদম্‌+থম্‌) কথমহং দৈবংবা নিন্দামি সংসারস্য ঈদৃশী এব পরিবর্ত্তনশালতা

হত

(৬৯) কায়ইতি। কায়ঃ (চীয়তে অন্নাদিভিরিতি চি+ঘঞ্ কর্ম্মণি) দেহঃ সন্নিহিতঃ নিকটবর্ত্তী অপায়ঃ (অপ+অয়্+ঘঞ্) নাশঃ যস্য সঃ তথোক্তঃ মরণং প্রকৃতিঃ শরীরিণামিতিভাবঃ। সম্পদঃ ঐশ্বর্য্যাণি আপদাং পদং স্থানং সম্পন্নস্যৈব চৌর্য্যাদ্যুপদ্রবো ঘটতে ইত্যর্থঃ। সমাগমাঃ মিলানি সাপগমাঃ সবিচ্ছেদাঃ নিষ্পন্নস্য মিত্রত্বস্যৈব বিচ্ছেদসম্ভাবনেত্যর্থঃ কিং বহুনা উৎপদ্যতে যৎ তৎ উপাদি (উৎ+পদ্+ণিন্) জন্যং সর্ব্বং বস্তু ভঙ্গুরং (ভন্জ+ঘুরঃ) ভঙ্গপ্রবণং বিনশ্বর মিত্যর্থঃ উৎপন্নং সদেব ধ্বংসতে ইত্যর্থঃ। চক্রবৎ পরিবর্ত্তন্তে দুঃখানি চ সুখানি চেতি মত্বা ধৈর্য্যমবলম্ব্য আপৎপ্রতী-কারায় উপায় শ্চিন্তনীয় ইতিভাবঃ।

কার্য্যমুপদিশ = কর্ত্তব্যং ব্রূহি।

নিশ্চেষ্টং = নিষ্পন্দং হস্তপদাদিসঞ্চালনরহিতমিতি যাবৎ।

কর্ত্তরিকাং = ছুরিকাম্ (কৃত—ঘঞ্ কর্ত্তং রাতীতি রা+কঃ স্ত্রী)

ছিন্নবন্ধনঃ = ছিন্নং বন্ধনং যস্য সঃ খণ্ডিতপাশঃ।

(৭০) যইতি। যো জনঃ ধ্রুবাণি নিশ্চিতানি দ্রব্যাণি পরিত্যজ্য বিহায় অধ্রুবাণি অনিশ্চিতানি নিষেবতে অবলম্বতে আশ্রয়তীতিযাবৎ তস্য জনস্য ধ্রুবাণি নশ্যন্তি অধ্রুবং নষ্টমেব অনধিগতত্বাদিতিভাবঃ। দুরাকাঙ্ক্ষোঽব-সীদতীত্যর্থঃ।

মুক্তাপদঃ = আপন্মুক্তাঃ মুক্তা ত্যক্তা অতিক্রান্তেতি যাবৎ আপৎ যৈঃ তে।

সমীহিতং = অভীষ্টং (সম্+ঈহ্+ক্তঃ কর্ম্মণি)

(৭১) মিত্রমিতি। সজ্জনাঃ সাধবঃ মিত্রং বন্ধুং প্রাপ্নুত ভৃশং প্রাপ্নুবন্তু (ভৃশার্থে লোট্) জনপদৈঃ দেশৈঃ লক্ষ্মীঃ সমালভ্যতাম্ প্রাপ্যতাম্ জনপদাঃ সমৃদ্ধাঃ ভবন্তু। ভূপালা নৃপাঃ স্বধর্ম্মে ন্যায়তঃ প্রজারঞ্জনাদৌ স্থিতাঃ শশ্বৎ নিত্যং বসুধাং পৃথিবীং পালয়ন্তু রক্ষন্তু। নীতিঃ নয়ঃ নবোঢ়া (নব+বহ্+ক্তঃ কর্ম্মণি) নবপরিণীতা বধূরিব সুকৃতিনাং কৃতবিদ্যানাং সদাচাররতানাঞ্চ বঃ যুষ্মাকং মানসতুষ্টয়ে চিত্তবিনোদনায় আস্তাং ভবতু। ভগবান্ চন্দ্রস্য অর্দ্ধং চন্দ্রার্দ্ধং তদেব চূড়ামণিঃ শিরোভূষণং যস্য সঃ চন্দ্রশেখরঃ শিবঃ জনস্য লোকস্য কল্যাণং শুভং কুরুতাম্ বিতরতু (সর্ব্বত্র আশংসায়াং লোট্)

* ইতি হিতোপদেশটীকায়াং দীপিকা সমাখ্যায়াং প্রথমঃ কথাসংগ্রহঃ। *

হিতোপদেশ

দীপিকা।

সুহৃদ্ভেদঃ।

অথ = মিত্রলাভশ্রবণানন্তরমিত্যর্থঃ।

আর্য্য = মহাত্মন্, মান্ত।

ইদানীং = অস্মিন্‌কালে ইতি ইদানীং ; অধুনা, সাম্প্রতং।

(১) বর্দ্ধমান ইতি। বনে দুর্গবাম্নি মহারণ্যে ইত্যর্থঃ। মৃগেন্দ্রবৃষয়োঃ মৃগেন্দ্রশ্চ বৃষশ্চ তৌ তয়োঃ সিংহবৃষয়োঃ বর্দ্ধমানঃ (বৃধ্ + শানঃ) উত্তরোত্তরং বৃদ্ধিং প্রাপ্নুবন্ দিনে দিনে বৃদ্ধিং গচ্ছন্ ইতিযাবৎ। মহান্ স্নেহঃ মহাস্নেহঃ সুদৃঢ়প্রণয়ঃ পিশুনেন খলেন ধূর্ত্তেনেতি যাবৎ অতিলুব্ধেন লোলুপেন জম্বুকেন শৃগালেন (বক্ষ্যমাণেন করটকেণ) বিনাশিতঃ বিভেদিতঃ ভেদং প্রাপিত ইত্যর্থঃ।

দক্ষিণাপথে = দক্ষিণস্যাং দিশি, ভারতবর্ষস্য দক্ষিণে ভাগে।

বাণিজঃ = বণিক্, ব্যবসায়ী, (বণিজ্ + স্বার্থে ষ্ণঃ)।

মহাধনঃ = মহৎ ধনং যস্য সঃ সমৃদ্ধিশালী।

প্রভূতে = প্রচুরে।

বিত্তে = ধনে।

অতিসমৃদ্ধান্ = ধনশালিনঃ (সম্ + ঋধ্ + ক্তঃ)

মতিঃ = মননং, অভিলাষঃ।

(২) অধোঽধ ইতি। অধঃ অধঃ (অব্যয়ং) আত্মান মপেক্ষ্য দীন-দীনতরদীনতমান্ পশ্যতঃ অবলোকয়তঃ দীনতরৈঃ সহ আত্মতুলনাং কুর্বত ইত্যর্থঃ কস্য জনস্য মহিমা (কর্ত্তা) ধনিত্বাভিমানং অহং ধনীতিজ্ঞানমিতি যাবৎ; ন উপচীয়তে—ন বর্দ্ধতে (উপ+চি+লট্ তে) সর্বএব স্বাপেক্ষয়া নির্দ্ধনান্ বীক্ষ্য আত্মানং ধনিনং মন্যন্তে ইত্যর্থঃ। উপরি উপরি উচ্চোচ্চতরোচ্চতমান্ পশ্যন্তঃ ধনবত্তরৈ রাত্মতুলনাং কুর্বন্ত ইত্যর্থঃ। সর্বে এব জনাঃ দরিদ্রতি আত্মানংদরিদ্রং মন্যন্তে। (দরিদ্রা+লট্ অন্তি) সর্বএব স্বাপেক্ষয়া ধনিনো দৃষ্ট্বা আত্মানং নির্দ্ধনং মন্যন্তে ইত্যর্থঃ। অতঃ সর্বথা অর্থবৃদ্ধিঃ করণীয়েতিভাবঃ।

ধনিনির্দ্ধনয়োঃ প্রভেদং দর্শয়ন্নাহ ব্রহ্মহাপীতি।

(৩) যস্ত (নরস্য) বিপুলং প্রচুরং ধনং অস্তি স নরঃ ব্রহ্মাণং হন্তি যঃ সঃ ব্রহ্মহা (ব্রহ্মন্+হন্+ক্বিপ্) ব্রাহ্মণহন্তা ব্রহ্মবধরূপমহাপাপাৎ অস্পৃষ্টোঽপী তিভাবঃ পূজ্যঃ পূজনীয়ঃ ভবতীতি শেষঃ। শশিনঃ চন্দ্রস্য তুল্যঃ বংশো যস্য সঃ তুল্যবংশঃ নির্ম্মলবংশোৎপন্নোঽপি নির্দ্ধনঃ (কর্ম্ম) দরিদ্রঃ পরিভূয়তে অবজ্ঞায়তে (অন্যৈঃ কর্ত্তা উহ্যঃ) (পরি+ভূ+তে) নির্ম্মলবংশোৎপন্নমপি ধনহীনং জনাঃ অবমন্যন্তে ইত্যর্থঃ; জাতেরপি ধনস্যাধিকং গৌরবমিতিভাবঃ।

অর্থবৃদ্ধেরন্যদপি প্রয়োজনং দর্শয়ন্ আহ সম্পদেতি।

(৪) যঃ জনঃ স্বল্পয়া সামান্যয়া অপি সম্পদা ধনেন—আত্মানং সুস্থিতং মন্যতে যঃ সঃ সুস্থিতম্মন্যঃ নিরাকাঙ্ক্ষ ইতি যাবৎ—ভবতি। তস্য (সুস্থিতম্মন্যস্য) তাং (সম্পদং) বিধিঃ (কর্ত্তা) কৃতং কৃত্যং যেন সঃ তথোক্তঃ সম্পাদিতস্বকর্ত্তব্যঃ সন্ যদেবায়ং প্রার্থয়ামাস তদেবাহমস্মৈ দত্তবানিতি মন্যমানঃ সন্নিত্যর্থঃ ন বর্দ্ধয়তি বৃদ্ধিং গময়তি। উন্নতিমনিচ্ছতঃ কুত উন্নতেঃ সম্ভবনাইতি ভাবঃ।

উন্নতৌ নিরুৎসাহস্য বৃথৈব জন্মেত্যাহ নিরুৎসাহমিতি।

(৫) নিরুৎসাহং উৎসাহরহিতং কার্য্যেষু অলসমিত্যর্থঃ নিরানন্দং সতত মসন্তুষ্টং নির্বীর্য্যং পরাক্রমশূন্যং অতএব অরেঃ শত্রোঃ নন্দনং আনন্দকরং ঈদৃশং (যং দৃষ্ট্বা শত্রবঃ হৃষ্যন্তীত্যর্থঃ) পুত্রং কাচিৎ সীমন্তিনী নারী (কর্ত্তা) মাস্ম জনয়েৎ উৎপাদয়েৎ। (জন+ণিচ্+যাৎ) ঈদৃশোহি পুত্রো নারীণাং ক্লেশায় ভবতীতি ভাবঃ।

(৬) অলব্ধমিতি। অলব্ধং অপ্রাপ্তং অনুপার্জিতং (বস্তু) লিপ্সেত লব্ধুং ইচ্ছেৎ (লভ্+সন্+ঈত, জনঃ কর্ত্তা উহ্যঃ) লব্ধং উপার্জিতং অবক্ষয়াৎ নাশাৎ চৌর্য্যাদেরিতিযাবৎ রক্ষেৎ। রক্ষিতং (বস্তু) সম্যক্ সবিশেষং বর্দ্ধয়েৎ বৃদ্ধং তীর্থেষু সৎপাত্রেষু দানযোগ্যেষু ইত্যর্থঃ নিক্ষিপেৎ বিনিয়োজয়েৎ (নি+ক্ষিপ্+যাৎ)

অঞ্জনবৎ=কজ্জলবৎ।

এতি=প্রাপ্নোতি (ই+লট্ তি)

অনুপভুজ্যমানঃ=অব্যবহ্রিয়মাণঃ (ন+উপ+ভুজ্+শানঃ কর্ম্মণি বাচ্যে)

ধুরি=ভারবহনে।

নানাবিধদ্রব্যপূর্ণং=নানা বিধাঃ প্রকারাঃ যেষাং তানি দ্রব্যাণি তৈঃ পূর্ণং তৎ। বহুবিধবাণিজ্যদ্রব্যপরিপূর্ণং।

(৭) কইতি। সমর্থানাং বলবতাং অতিভারঃ কঃ নকোঽপীত্যর্থঃ। ব্যবসায়িনাং বণিজাং দূরং কিং বাণিজ্যে বহুদূরমপি ন দূরত্বেন পরিগণয়েদিত্যর্থঃ সবিদ্যানাং কৃতবিদ্যানাং বিদেশঃ কঃ। প্রিয়ং বদন্তি যে তে তেষাং মধুরভাষিণাং পরঃ শত্রুঃ কঃ সর্বএব প্রিয়বাদিনং স্নিহ্যন্তীত্যর্থঃ।

ভগ্নজানুঃ=ভগ্নঃ জানুঃ উরুসন্ধিঃ যস্য সঃ।

(৮) করোতু ইতি। জানাতীতি জ্ঞঃ নীতেঃ জ্ঞঃ নীতিজ্ঞঃ নীতিবিৎ জনঃ ইতস্ততঃ ব্যবসায়ং করোতু নাম (নামেতিসম্ভাবনায়াং) পুনঃ কিন্তু ফলং ব্যবসায়স্যেতি শেষঃ তদেব তাদৃশমেব স্যাৎ ভবেৎ (অস্+যাৎ) যৎ যাদৃশং বিধেঃ বিধাতুঃ মনসি স্থিতং বর্ত্ততে। চেষ্টয়া নকোঽপি দৈবমতিক্রমিতুং শক্নুয়াদিতিভাবঃ।

(৯) বিস্ময় ইতি। সর্বকর্ম্মণাং সর্বকার্য্যাণাং প্রত্যূহঃ অন্তরায়ঃ বিস্ময়ঃ স্তব্ধত্বং কিংকর্ত্তব্যবিমূঢ়তেতিযাবৎ সর্বথা যেনকেনচিদুপায়েন হেয়ঃ ত্যাজ্যঃ। নকস্মিন্নপি কার্য্যে বিস্ময়ঃ কর্ত্তব্য ইত্যর্থঃ। তস্মাৎ (বিস্ময়স্য হেয়ত্বাৎ) বিস্ময়ং উৎসৃজ্য ত্যক্ত্বা সাধ্যস্য সিদ্ধিঃ সাধ্যসিদ্ধিঃ (কর্ম্ম) কর্ত্তব্যসাধনং বিধীয়তে ক্রিয়তে। (বি+ধা+তে) লোকৈরিতি শেষঃ।

স্বেচ্ছাহারাদিলাভেন = স্বস্য ইচ্ছা স্বেচ্ছা তয়া আহারঃ স আদিঃ যেষাং তানি তেষাং লাভঃ তেন ।

অরণ্যানীং = মহারণ্যং ।

পরিভ্রমন্ = বিচরন্ ।

হৃষ্টপুষ্টাঙ্গঃ = হৃষ্টং পুষ্টঞ্চ অঙ্গং যস্য সঃ ।

বলবৎ = উচ্চৈঃ (ননাদেতিক্রিয়াবিশেষণং)

স্বভুজোপার্জ্জিতরাজ্যসুখং = স্বস্য ভুজঃ তেন উপার্জিতং রাজ্যং তস্মিন্ সুখং । বাহুবলেন লব্ধস্য রাজ্যস্য উপভোগসুখং ।

অনুভবন্ = উপভুঞ্জানঃ ।

পিপাসাকুলিতঃ = পাতুমিচ্ছা পিপাসা (পা + সন্ + অ স্ত্রী) তয়া আকুলিতঃ কাতরঃ । তৃষ্ণাকাতরঃ ।

যমুনাকচ্ছং = যমুনানদীতীরং ।

অননুভূতপূর্ব্বকং = পূর্ব্বং অনুভূতং অনুভূতপূর্ব্বং তন্ন ভবতীতি অননুভূত-পূর্ব্বকং (স্বার্থে কঃ) অশ্রুতপূর্ব্বম্ ।

প্রলয়ঘনগর্জিতং = প্রলয়স্য ঘনঃ মেঘঃ তস্য গর্জিতং । প্রলয়মেঘ-গর্জনমিব ভীষণ মিত্যর্থঃ ।

অশ্রাবি = (শ্রু + লুঙ্ ত কর্ম্মণি বাচ্যে) তেন কর্ত্তৃপদং কর্ম্মপদঞ্চ সঞ্জীবক-নর্দ্দিতং ।

পরিবৃত্য = প্রত্যাগত্য ।

তূষ্ণীং = (অব্যয়ং) নিস্তব্ধং ।

তথাবিধঃ = তাদৃগবস্থায়াং অবস্থিতঃ ।

উদকার্থী = উদকং অর্থয়তে যঃ সঃ ; পিপাসিতঃ ।

পানীয়ং = জলম্ ।

চেষ্টানিরূপণেন = তূষ্ণীমবস্থানাদিকার্য্যাবধারণেন ।

অবধীরিতাভ্যাং = অবজ্ঞাতাভ্যাং ; মন্ত্রিপদে অনিযুজ্য অবমানিতাভ্যাম্ ।

(১০) সেবয়েতি । সেবয়া প্রভুশুশ্রূষয়া ধনং ইচ্ছদ্ভিঃ বাঞ্ছদ্ভিঃ সেবকৈঃ যৎ কৃতং পশ্য (দৃশ্ + হি) জানীহি, তদিতি শেষঃ । কিন্তদিত্যাহ শরীরস্য

যৎ স্বাতন্ত্র্যং স্বাধীনত্বং মূঢ়ৈঃ মন্দবুদ্ধিভিঃ (সেবকৈঃ) তৎ স্বাতন্ত্র্যমপি হারিতং বিনাশিতং। সেবকাঃ ধনলোভেন প্রাণানপি ত্যজন্তীতিভাবঃ।

(১১) এতাবদিতি। যৎ যস্মাৎ অনায়িত্তা স্বাধীনা বৃত্তি র্যেষাং তে তেষাং ভাবঃ অনায়ত্তবৃত্তিতা এতাবৎ এতাবন্মাত্রং স্বাধীনতৈব ইত্যর্থঃ। জন্মসাফল্যং জন্মনঃ সার্থকতা। স্বাধীনাএব সফলজন্মান ইত্যর্থঃ। এবং সতি যে জনাঃ পরাধীনতাং পরতন্ত্রতাং যাতাঃ প্রাপ্তাঃ তে পুরুষাঃ জীবন্তি প্রাণান্ ধারয়ন্তি চেৎ কে মৃতাঃ মৃত্যুং প্রাপ্তাঃ। পরাধীনানাং জীবনং নিরর্থকমতস্তে জীবন্তোঽপি মৃতাঃ ইতিভাবঃ।

এতৎ = স্বামিসেবারাহিত্যং।

(১২) কথমিতি। পরমেশ্বরাঃ স্বামিনঃ (কর্ম্ম) কথং নাম কেন হেতুনা বা ন সেব্যন্তে সেবকৈরিতিশেষঃ। সর্ব্বথা স্বামিসেবা কর্ত্তব্যেত্যর্থঃ। যে (পরমেশ্বরাঃ) তুষ্টাঃ প্রীতিমাপন্নাঃ সন্তঃ অচিরেণৈব অবিলম্বেনৈব মনোরথান্ অভিলাষান্ পূরয়ন্তি সফলীকুর্ব্বন্তি। স্বামিনি তুষ্টে অবশ্যমেবসেবকস্য মনোরথসিদ্ধি র্ভবতীতিভাবঃ।

সর্ব্বাধিকারে = সর্ব্বেষাং রাজ্যকার্য্যাণাং অধিকারঃ পর্য্যবেক্ষণরূপঃ নিয়োগঃ তস্মিন্।

পরাধিকারচর্চ্চা = পরেষাং অধিকারঃ তস্ত চর্চ্চা কর্ত্তব্যাকর্ত্তব্যনিরূপণং অনধিকারচর্চ্চা ইত্যর্থঃ।

(১৩) পরাধিকারচর্চ্চামিতি। যঃ জনঃ স্বামিনে হিতং তস্য ইচ্ছা তয়া স্বামিহিতৈচ্ছয়া প্রভুহিতকামনয়া পরাধিকারচর্চ্চাং অনধিকারচর্চ্চাং কুর্য্যাৎ সঃ চীৎকারাৎ তাড়িতঃ লগুড়েন প্রহৃতঃ গর্দ্দভঃ যথা গর্দ্দভ ইব বিষীদতি (বি+সদ্ +লট্ তি) ক্লিশ্যতি বিষাদমবাপ্নোতীতি যাবৎ। পরাধিকারচর্চ্চাকারিণঃ চীৎকারাৎ গর্দ্দভস্যেব মহদনিষ্টং জায়তে ইত্যর্থঃ।

প্রাঙ্গণে = চত্বরে।

শ্বানং = কুক্কুরম্।

ব্যাপারঃ = অধিকারঃ চৌরাদেঃ গৃহরক্ষণনিয়োগ ইত্যর্থঃ।

নির্বৃতঃ = নিরুদ্বেগঃ, চৌর্য্যাদ্যুপদ্রবরহিত ইত্যর্থঃ।

উপযোগং = উপকারিতাম্ (utility)

মন্দাদরঃ = মন্দঃ আদরঃ যস্ত সঃ হতাদরঃ। ন পূর্ব্ববদিদানীং মা মাহারাদিদানেন আদ্রিয়তে ইত্যর্থঃ।

বিধুরদর্শনং…ভবন্তি = বিধুরদর্শনং অনিষ্টদর্শনং। প্রয়োজনাপেক্ষিণঃ স্বামিনঃ অনিষ্টাপাতপ্রতিবিধানার্থং ভৃত্যান্ সম্ভাবয়ন্তীত্যর্থঃ। অধুনাহমুদাসীনো ভবামি ততশ্চৌর্য্যে ঘটিতেঽয়ং মমোপযোগং জ্ঞাত্বা পূর্ব্ববৎ মাং সম্ভাবয়িষ্যতীতিভাবঃ।

বর্ব্বর = নির্বোধ, মূর্খ।

কিংভৃত্যঃ = নিন্দনীয়ভৃত্যঃ।

কিংসুহৃৎ = নিন্দনীয়বন্ধুঃ।

কিংপ্রভুঃ = নিন্দনীয়প্রভুঃ।

পাপীয়ান্ = পাপাচারী (পাপ + ঈয়স্ ১। ১) উল্লঙ্ঘিতভৃত্যধর্ম্ম ইত্যর্থঃ। যথাতথা ত্বয়া প্রভুগৃহরক্ষা কর্ত্তব্যেতিভাবঃ।

প্রবুদ্ধঃ = জাগরিতঃ

নিদ্রাবিমর্দ্দকোপাৎ = নিদ্রাভঙ্গকোপাৎ।

(১৪) সুহৃদামিতি। সুহৃদাং বন্ধূনাং উপকারকারণাৎ হিতসাধনার্থং দ্বিষতাং শত্রূণাং অপকারকারণাৎ অনিষ্টসংঘটনার্থং নৃপসাহায্যং লব্ধা শত্রূন্ উন্মূলয়িতুমিত্যর্থঃ। বুধৈঃ পণ্ডিতৈঃ নৃপসংশ্রয়ঃ নৃপতেরাশ্রয়ঃ (কর্ম্ম) ইষ্যতে আশাস্যতে। মিত্রাণাং হিতসাধনং শত্রূণামহিতসাধনঞ্চ নৃপাশ্রয়স্য ফলং নতূদরপূরণমিত্যাহ কঃ জনঃ কেবলং জঠরং উদরং ন বিভর্ত্তি (ভৃ + লট্ তি) পূরয়তি। উদরপূরণস্যোপায়ান্তরে সতি তদর্থং নৃপাবলম্বনং মূঢ়ানাং কার্য্যমিতি ভাবঃ।

কিয়তাকালেন………লভেত = অমাত্যস্য প্রাধান্যলাভো বহুকালসাধ্য ইতিভাবঃ।

(১৫) নকস্যচিদিতি। ইহ জগতি কশ্চিৎ জনঃ কস্যচিৎ জনস্য স্বভাবাৎ নিসর্গতঃ উদারঃ সরলপ্রকৃতিঃ অভিমতঃ প্রিয়ঃ খলঃ ক্রূরপ্রকৃতিঃ কপটান্তঃকরণ ইতি যাবৎ ন ভবতি। লোকে জগতি স্বচেষ্টিতানি স্বকার্য্যাণি এব নরং গুরুত্বং শ্রেষ্ঠত্ব

বিপরীততাং বৈপরীত্যং লঘুত্বমিত্যর্থঃ নয়ন্তি প্রাপয়ন্তি। নরাঃ স্বকার্য্যানু-সারেণ উদারচেতসো লঘুচেতসোবা ভবন্তীত্যর্থঃ। ত্বন্ত স্বামিনি সাধুনাচরঃ অতো নপ্রধানামাত্য ইতিভাবঃ।

(১৬) আরোপ্যতে ইতি। যথা যেন প্রকারেণ মহতা সবিশেষণ যত্নেন শিলা প্রস্তরঃ শৈলে পর্বতে আরোপ্যতে উত্থাপ্যতে ক্ষণেন মুহূর্ত্তেন অধঃ নিম্নে নিপাত্যতে নিক্ষিপ্যতে তথা তেন প্রকারেণ গুণশ্চ দোষশ্চ তয়োঃ আত্মা আরোপ্যতে নিপাত্যতেচেত্যন্বয়ঃ। চিরকালেন মহতা যত্নেনচ আত্মন উৎকর্ষঃ স্বল্পকালেনচাপকর্ষো জায়তে ইত্যর্থঃ।

স্বযত্নয়াত্তঃ=স্বস্য যত্নঃ চেষ্টা তস্য আয়ত্তঃ অধীনঃ স্বচেষ্টাধীনঃ।

(১৭) যাতীতি। নরঃ স্বৈঃ স্বকীয়ৈঃ কর্ম্মভিঃ কার্য্যৈরেব কূপস্য খনিতা খনকঃ যদ্বৎ কূপখনক ইব প্রাকারস্য উচ্চপ্রাচীরস্য কারকঃ নির্ম্মায়কইব অধঃ অধঃ ক্রমশঃ নিম্নং যাতি গচ্ছতি। উচ্চৈঃ—ক্রমশঃ উচ্চৈঃ স্থানং ব্রজতি গচ্ছতি। শিল্পাভিজ্ঞঃ প্রাকারকারক স্তথা শিল্পানভিজ্ঞঃ কূপখনক ইব নরঃ স্বচেষ্টানুসারেণ উন্নতিমবমতিং বা লভতে ইত্যর্থঃ।

পরিবৃত্য=প্রতিনিবৃত্য।

তচ্চ=তয়কারণঞ্চ।

প্রজ্ঞাবতাং=প্রজ্ঞা বিদ্যতে এষাং তে তেষাং বুদ্ধিমতাং।

অবিদিতং=অজ্ঞাতং বুদ্ধেরবিষয়মিতি যাবৎ।

(১৮) উদীরিত ইতি। উদীরিতঃ উক্তঃ ব্যাখ্যাত ইতি যাবৎ অর্থঃ (কর্ম্ম) বিষয়ঃ পশুনা (কর্ত্তা) প্রজ্ঞাহীনেনাপীতিভাবঃ গৃহ্যতে বুধ্যতে। ইদমেব সমর্থয়ন্নাহ হয়াঃ অশ্বাঃ নাগাঃ গজাশ্চ দেশিতাঃ আদেশিতাঃ চালিতা ইতি যাবৎ আরোহিণেতি শেষঃ বহন্তি ভারমিতিশেষঃ (বহ্‌+লট্‌ অন্তি) পণ্ডিতঃ বুদ্ধিমান্‌ জনঃ অনুক্তং অকথিতং পরহৃদয়স্থিতং ভাবমপি। উহতি তর্কেণ জানাতি (উহ্‌+লট্‌তি)। বুদ্ধয়ঃ পরেবা মিঙ্গিতং মনোগতং তস্য জ্ঞানং বোধঃ তদেব ফলং যাসাং তাঃ তথোক্তাঃ। তএব বুদ্ধিমন্তো যে পরেষাং মনোগতং জ্ঞাতুং শক্নুবন্তি ইত্যর্থঃ।

(১৯) আকারৈরিতি। আকারৈঃ বহিরাকারৈঃ মুখরাগাদিভিঃ ইঙ্গিতৈঃ

হৃদয়স্থিতৈঃ ভাবৈঃ চেষ্টয়া কার্য্যেণ ভাষণেন বচনক্রমেণ নেত্রঞ্চ বক্ত্রঞ্চ তয়ো র্বিকারস্তেন ভ্রুকুট্যা অন্তর্গতং হৃদয়স্থিতং মনঃ অভিপ্রায়ঃ লক্ষ্যতে জ্ঞায়তে পণ্ডিতৈরিতি শেষঃ।

প্রজ্ঞাবলেন=বুদ্ধিবলেন।

আত্মীয়ং=মদায়ত্তং।

অনবসরপ্রবেশাৎ=আদেশমন্তরেণ সমীপগমনাৎ।

সান্নিধ্যং=সন্নিধৌ অবস্থানং।

(২০) দোষভীতেরিতি। দোষাৎ ভীতিস্তস্মাৎ অনিষ্টসংঘটনভয়েন অনারম্ভঃ কার্য্যবৈমুখ্যং কুৎসিতঃ পুরুষঃ কাপুরুষঃ (তৎপুরুষসমাসে কুৎসিতশব্দস্য কাদেশঃ) পৌরুষহীনস্য লক্ষণং চিহ্নং ভো ভ্রাতঃ (করটসম্বোধনমেতৎ) অজীর্ণভয়াৎ খাদ্যমিদং গুরুপাকং চিরেণ পচ্যতে ইতি ভয়েন কৈর্জনৈ র্ভোজনং আহারঃ পরিহীয়তে পরিত্যজ্যতে নকৈরপীত্যর্থঃ। (পরি+হা +কর্ম্মণি লট্ তে)

বক্ষ্যসি=কথয়িষ্যসি (বচ্+লৃট্ স্যসি)

তজ্জ্ঞানলক্ষণং=স্বামী অনুরক্তো বিরক্তোবেতি জ্ঞানচিহ্নং।

(২১) অনুরাগলক্ষণমাহ দূরাদিতি। দূরাৎ অবেক্ষণং সাভিলাষো দৃষ্টি-পাতঃ হাসঃ প্রীত্যা হসনং সংপ্রশ্নে জিজ্ঞাসায়াং ভৃশং অত্যর্থং আদরশ্চ অক্ষোঃ পরং পরোক্ষং তস্মিন্ অসমক্ষে গুণশ্লাঘা গুণস্তুতিঃ প্রিয়বস্তুষু প্রিয়কার্য্যেষু স্মরণং স্মৃতিঃ হিতং কর্ত্তুং অভিলাষপ্রকাশনমিত্যর্থঃ।

অপ্রাপ্তে=অনুপস্থিতে।

(২২) অপ্রাপ্তকালবচনমিতি। বৃহতাং বাচাং পতি র্বৃহস্পতিঃ দেবগুরু-রপি নীতিশাস্ত্রবিশারদোঽপীত্যর্থঃ অপ্রাপ্তঃ অনুপস্থিতঃ কালঃ অবসরো যস্য তৎ বচনং অনবসরপ্রযুক্তং বাক্যং ব্রুবন্ কথয়ন্ সন্ বুদ্ধেরবজ্ঞানং বুদ্ধ্যবজ্ঞানং বুদ্ধিহ্রাসরূপাবমানং শাশ্বতং নিত্যং অপমানং নায়ংনীতিজ্ঞ ইত্যেবং রূপং অবমানঞ্চ প্রাপ্নুয়াৎ লভেত। যোহি অপ্রাপ্তাবসরে বাক্যং বদতি স বিষীদ-তীত্যর্থঃ।

মা ভৈষীঃ=ন ভীতি মাপ্নুয়াঃ। (ভী+লুঙ্ স্ কর্ত্তৃপদং ত্বং মূহ্যং)।

বক্ষ্যামি = কথয়িষ্যামি (বচ্ + লৃট্ স্যামি)

(২৩) আপদীতি। হিতং শুভং ইচ্ছতা (ইষ্ + শতৃ ৩।১) অভিলষতা হিতৈষিণেতি যাবৎ ভৃত্যেন সেবকেন অপৃষ্টেনাপি অনাহূতেনাঽপি আপদি বিপৎসময়ে উন্মার্গগমনে অসদাচরণে কার্য্যকালস্য অত্যয়াঃ অতিপাতাঃ তেষু কার্য্যসময়াতিপাতেষু চ বক্তব্যং অভিধাতব্যং মন্ত্রয়িতব্যমিতিযাবৎ হিতমিতি শেষঃ। হিতৈষী ভৃত্যঃ প্রভোরাপদাদৌ সর্ব্বথা হিতং ব্রূয়াৎ নচ তত্রাবসরং প্রতিপালয়েদিত্যর্থঃ।

অনুপপন্নং = অনুপযুক্তং, বিফলমিত্যর্থঃ। (উপ + পদ্ + ক্তঃ)

যথাভিপ্রেতমনুষ্ঠীয়তাং = যথাভিপ্রেতং যথেচ্ছং অনুষ্ঠীয়তাং ক্রিয়তাং।

প্রবেশিতঃ = প্রবেশং কারিতঃ।

চিরাৎ = বহোঃ কালাৎ পরং।

অনুজীবিনা = অনুজীবতি যঃ সঃ তেন, ভৃত্যেনেত্যর্থঃ।

সুধীঃ = শোভনা ধীঃ বুদ্ধি র্যস্য সঃ, বুদ্ধিমান্।

ইয়ৎকালং = ইয়ান্ কাল স্তং, এতাবন্তং কালম্।

পিশুনবচনাৎ = খলস্য মন্ত্রণয়া।

যথাভিমতং = অভিমত মনতিক্রম্যেতি যথাভিমতং (অনতিক্রমার্থে অব্যয়ীভাবঃ) যথাভিপ্রেতং।

রহস্যং = গূঢ়ং।

বিশ্বাসভূমিঃ = বিশ্বাসভাজনং।

তদ্বিধঃ = সা বিধা প্রকারো যস্য সঃ, তাদৃশঃ বিশ্বাসভাজনমিত্যর্থঃ।

অপূর্ব্বসত্ত্বাধিষ্ঠিতং = অপূর্ব্বং অদৃষ্টপূর্ব্বং সত্ত্বং প্রাণী তেন অধিষ্ঠিতং উষিতং। অত্র বনে কশ্চিৎ অদৃষ্টপূর্ব্বঃ পশুরাগত ইত্যর্থঃ।

অপূর্ব্বঃ = অশ্রুতপূর্ব্বঃ।

শব্দানুসারেণ……ভবিতব্যং = যথাস্য মহান্ শব্দস্তথায়মপি মহাবলশালী ভবেদিত্যর্থঃ।

পরিত্যাগং = রাজ্যস্যেতি শেষঃ।

যুদ্ধোদ্যোগং = যুদ্ধায় উদ্যোগ স্তং।

কার্য্যসন্দেহে = কর্ত্তব্যাকর্ত্তব্যনিরূপণে।

উপযোগঃ = উপকারিতা।

(২৪) বন্ধুরিতি। নরঃ বন্ধুঃ মিত্রং স্ত্রী ভার্য্যা ভৃত্যবর্গস্য অমাত্যাদীনাং আত্মনঃ স্বস্য বুদ্ধেঃ স্বত্বস্য বলস্য চ সারতাং উৎকর্ষং আপদেব নিকষপাষাণঃ নিকষোপলঃ (কষ্টিপাতর) তস্মিন্ তথোক্তে জানাতি অবগচ্ছতি পরীক্ষতে ইতি যাবৎ। উপস্থিতায়াং বিপদি বন্ধুস্ত্রীভৃত্যানা মুৎকর্ষাপকর্ষজ্ঞানং ভবতীত্যর্থঃ। অহং তে বিপৎপ্রতীকারং বিধায় আত্মন উৎকর্ষং প্রমাণয়ামীতি ভাবঃ।

বাধতে = ক্লিশ্নাতি, পীড়য়তি উদ্বেজয়তীতি যাবৎ (বাধ্ + লট্ তে)

আশ্বাস্যন্তাং = আহুয় ধনমানাদিনা সম্ভাব্যন্তাম্।

পুরুষসমবায়ঃ = পুরুষসংহতিঃ, বিপৎপ্রতীকারসমর্থানাং পুরুষাণাং সংগ্রহ ইত্যর্থঃ।

মহাপ্রসাদেন = সবিশেষেণ পুরস্কারেণ।

শক্যপ্রতীকারঃ = শক্যঃ প্রতীকারঃ উপশমো যস্য সঃ, প্রতিবিধাতব্যঃ।

ভয়োপশমং = ভয়শান্তিং, ভয়প্রতীকারং।

প্রতিজ্ঞায় = অঙ্গীকৃত্য।

অনুপকুর্বাণঃ = উপকারমদর্শয়ন্, অনুপকৃতেত্যর্থঃ।

উপায়নং = উপঢৌকনং (present) পুরস্কারং।

তূষ্ণীমাস্যতাং = তূষ্ণীং স্থিরং আস্যতাং উপবিশ্যতাং স্থীয়তামিতিযাবৎ (আস্ + লোট্ তাম্) নৈতৎ প্রকাশয়েত্যর্থঃ। রাজনি বিদিতে মহাপ্রসাদলাভাশা নাস্তীতিভাবঃ।

বলীবর্দ্দেন = বৃষভেণ (সঞ্জীবকেন)

নর্দ্দিতং = গর্জ্জিতং চীৎকৃতমিতিযাবৎ (নর্দ্দ্ + ক্তঃ ভাববাচ্যে)

স্বামিত্রাসঃ = স্বামিনঃ উচ্চৈঃশব্দশ্রবণেন জনিতং ভয়ং।

অপনীতঃ = দূরীকৃতঃ, নিবারিতঃ।

মুচ্যতে = দূরীক্রিয়তে, অপনীয়তে।

স্যাৎ = ভবেৎ (অস্ + বিধিলিঙ যাৎ)

(২৫) নিরপেক্ষ ইতি। ভৃত্যৈঃ সেবকৈঃ কার্য্যসহায়ৈরিত্যর্থঃ। স্বামী প্রভুঃ কদাচন কস্মিন্ কালেঽপি নিরপেক্ষঃ প্রয়োজনানপেক্ষী ভৃত্যসাহায্যানপেক্ষীতিযাবৎ ন কর্ত্তব্যঃ কর্ত্তুমুচিতঃ। কথমিত্যাহ, প্রভুং নিরপেক্ষং কৃত্বা ভৃত্যঃ দধিকর্ণবৎ দধিকর্ণনামা কশ্চিৎ বিড়ালইব (উপমানে বৎ) স্যাৎ ভবেৎ। দধিকর্ণ ইব বিষীদতীত্যর্থঃ।

উত্তরাপথে = উত্তরস্যাং দিশি।

পর্বতকন্দরমধিশয়ানস্য = পর্বতগুহায়াং শয়ানস্য (অধি + শী + শানচ অধিপূর্বকত্বাৎশীধাতোঃ সকর্ম্মকত্বং)

কেশরাগ্রং = গ্রীবাস্থিতানাং কেশানামগ্রং।

ছিনত্তি = কৃন্ততি (ছিদ্ + লট্ তি)

লূনং = ছিন্নং (লু + ক্তঃ)

বুদ্ধা = জ্ঞাত্বা।

বিবরান্তর্গতং = বিলমধ্যপ্রবিষ্টম্।

অলভমানঃ = আক্রমিতুমশক্নুবন্।

বিধেয়ং = কর্ত্তব্যং (বি + ধা + যঃ কর্ম্মণি বাচ্যে ময়েতি কর্ত্তৃপদ মূহ্যং)

(২৬) ক্ষুদ্রশত্রুরিতি। যস্য ক্ষুদ্রশত্রুঃ মূষিকাদিবৎ ক্ষুদ্রপ্রাণী শত্রুঃ ভবেৎ স্যাৎ বিক্রমাৎ (যবর্থেপঞ্চমী) বিক্রম মবলম্ব্য নৈব লভ্যতে আক্রম্যতে তং (ক্ষুদ্র শত্রুং) আহর্ত্তুং আক্রমিতুং পরিভবিতুমিত্যর্থঃ তস্য সদৃশঃ সমকক্ষঃ যাদৃশোঽয়ং ক্ষুদ্রস্তাদৃশো বলত্তরঃ ক্ষুদ্র ইত্যর্থঃ সৈনিকঃ সেনাপুরুষঃ পুরস্কার্য্যঃ উপযুক্তত্বেন নিয়োক্তব্যঃ। সদৃশং সদৃশঃ পরিভবিতুং শক্নুয়ান্ন চ কদাচিৎ ক্ষুদ্রেণ মহতো বিরোধঃ সম্ভবেদিতিভাবঃ।

আলোচ্য = স্থিরীকৃত্য, নিশ্চিত্য।

স্বকন্দরে = স্বকীয়গুহায়াম্।

নিঃসরতি = নিষ্ক্রামতি।

অক্ষতকেশরঃ = অক্ষতাঃ কেশরাঃ যস্য সঃ, অচ্ছিন্নকেশরঃ।

সংবর্দ্ধয়তি = আদ্রিয়তে, সম্ভাবয়তি।

প্রাপ্তঃ = আক্রান্তঃ।

উপযোগাভাবাৎ = উপকারিতাবিরহাৎ, প্রয়োজনাভাবাৎ। মূষিকো হতঃ কিমনেন ধৃতেনেতি বিবিচ্যেত্যর্থঃ।

মন্দাদরঃ = মন্দঃ শিথিলঃ আদরো যস্য সঃ, হতাদরঃ, শিথিলপ্রযত্নঃ।

সাটোপং = সগর্বং।

অপসর = অন্যত্র গচ্ছ।

বিরুদ্ধং ফলং = বিপরীতং ফলং অনিষ্টমিত্যর্থঃ।

বিধাস্যতি = করিষ্যতি। অনিষ্টং ঘটয়িষ্যতীত্যর্থঃ।

দেশব্যবহারানভিজ্ঞঃ = দেশস্য ব্যবহারঃ আচারঃ তস্মিন্ অনভিজ্ঞঃ, অবিদিতদেশাচারঃ।

উপসৃত্য = সমীপং গত্বা (উপ + সৃ + যপ্)

সশঙ্কং = শঙ্কয়া সহ বর্ত্তমানং, সভয়ং।

দেবপাদারবিন্দং = প্রভুচরণকমলং।

অভয়বাচং = অভয়ায় বাক্ তাং। মাভৈষীরিত্যেবং বাক্যমিত্যর্থঃ।

প্রযচ্ছ = দেহি (প্র + দা + লোট্ হি)

বলীবর্দ্দ = বৃষভ।

অলমনয়া শঙ্কয়া = অনয়া শঙ্কয়া, প্রাণবিনাশশঙ্কয়া অলং। স্বামী ত্বাং ন ব্যাপাদয়িষ্যতীত্যর্থঃ।

(২৭ তৃণানীতি। প্রভঞ্জনঃ প্রবলো বায়ুঃ মৃদূনি কোমলানি নীচৈঃ ক্ষুদ্রাণি সর্বতঃ সর্বতোভাবেন প্রণতানি নম্রাণি তৃণানি দূর্বাদীনি ন উন্মূলয়তি উৎপাটয়তি। প্রণতে বিক্রমদর্শনং নোচিতমিতিভাবঃ। সমুচ্ছ্রিতান্ সমুন্নতান্ উচ্চৈঃ শিরস ইত্যর্থঃ। তরূন্ ন্যগ্রোধাদীন্ এব প্রবাধতে উন্মূলয়তি মহান্ জনঃ মহতি জনে এব বিক্রমং করোতি প্রদর্শয়তি। মহতাং মহদ্ভি র্বিরোধঃ সংভবেৎ নতু ক্ষুদ্রেণেতিভাবঃ।

উপবিশ্যতাং = আস্যতাং (উপ + বিশ্ লোট্ তাম্ ভাববাচ্যে ত্বয়েতি কর্ত্তৃপদ মূহ্যং)

ভেতব্যং = শঙ্কিতব্যং (ত্বয়েতি কর্ত্তৃপদমূহ্যং)

(২৮) শব্দমাত্রাদিতি। শব্দস্য কারণং শব্দকারণং অজ্ঞাত্বা অবিদিত্বা

অনিশ্চিত্যেত্যর্থঃ। শব্দমাত্রাৎ শব্দমাত্রং শ্রুত্বা ন ভেতব্যং শঙ্কিতব্যং বুদ্ধিমদ্ভিরিতি শেষঃ। কুত ইত্যাহ করালা তন্নাম্নী কাচিৎ বৃদ্ধা স্ত্রী শব্দহেতুং শব্দকারণং পরিজ্ঞায় নিরূপ্য গৌরবং গতা প্রাপ্তা।

জনপ্রবাদঃ = কিংবদন্তী, জনশ্রুতিঃ।

তৎপাণিপতিতা = চৌরহস্তবিগলিতা।

অনুক্ষণং = প্রতিক্ষণং (often time)

ঘণ্টারাবঃ = ঘণ্টাশব্দঃ।

ধনোপক্ষয়ঃ = ধনব্যয়ঃ।

সাধয়ামি = নির্যাতয়ামি, মন্ত্রবলেন বশীকরোমীত্যর্থঃ।

গণেশাদিগৌরবং = গণেশাদিদেবতাপূজাং।

আকীর্ণানি = সমন্তাৎ বিক্ষিপ্তানি (আ + কৄ + ক্ত ১।৩)

ফলাসক্তাঃ = ফলগ্রহণতৎপরাঃ।

চিরং = বহুকালং, বহুদিনং যাবৎ।

অতিপ্রিয়েণ = মহতা স্নেহেন।

অত্রান্তরে = ইত্যবসরে। যদা পিঙ্গলকঃ পশুং হন্তুং চলিত ইত্যর্থঃ।

এতাবৎ = ইয়ৎপরিমাণকং, প্রচুরমিত্যর্থঃ।

ব্যয়িতং = অন্যোভ্যো দত্তং।

অবধীরিতং = অনুপাদেয়মিতি বিক্ষিপ্তং, পরিত্যক্তং।

ক্রমঃ = নিয়মঃ।

(২৯) ক্ষিপ্রমিতি। আয়ং অনালোচ্য অবিবিচ্য স্ববাঞ্ছয়া স্বেচ্ছয়া ব্যয়মানঃ ব্যয়শীলঃ অমিতব্যয়ীত্যর্থঃ (বি + অয়্ + তাচ্ছীল্যে শানচ্) অসৌ বিশ্রবণস্য অপত্যং পুমান্ বৈশ্রবণঃ কুবেরঃ তেন উপমা যস্য সঃ তথোক্তঃ, কুবেরতুল্যোঽপীত্যর্থঃ ধনী ধনবান্ জনঃ ক্ষিপ্রং শীঘ্রং শ্রমণো ভিক্ষুকঃ স ইব আচরতীতি শ্রমণায়তে (শ্রমণ + ক্যঙ্ + লট্ তে) দরিদ্রাতি, ভিক্ষুকোভবতীতি যাবৎ।

সন্ধিবিগ্রহকার্য্যাধিকারিণৌ = সন্ধিবিগ্রহকার্য্যে নিযুক্তৌ। এতয়োঃ সন্ধিবিগ্রহয়োর্ভারঃ অর্পিত ইত্যর্থঃ।

এতদ্বচনাৎ = এতস্য বচনং তস্মাৎ, স্তব্ধকর্ণবচনমনুস্মৃত্য।

✗ সর্ববন্ধুপরিত্যাগেন=সর্বেষাং বন্ধূনাং পরিত্যাগঃ যস্মিন্ তেন, (স্নেহেনেতি পদস্য বিশেষণং) এতয়োরীদৃশঃ স্নেহোজাতঃ যদন্যে বন্ধবঃ ঈর্ষয়া পরিতপ্তা বভূবুঃ।

অন্যোঽন্যং=পরস্পরম্।

বিধেয়ং=কর্ত্তব্যম্।

আত্মকৃতোঽয়ং দোষঃ=আত্মনা কৃতঃ আত্মকৃতঃ, স্বকৃতঃ অয়ং দোষঃ পিঙ্গলকেন সহ সঞ্জীবকস্য মিলনরূপঃ অনিষ্টাপাতঃ। নোচেদনয়োঃ পরস্পরালাপোঽভবিষ্যৎ নকদাচিদস্মাকমনিষ্ট মঘটিষ্যতেতিভাবঃ।

পরিদেবনং=বিলপনং, অনুতাপঃ।

বিমৃশ্য=বিচিন্ত্য (বি+মৃশ্+যপ্)

(৩০) অতথ্যানীতি। পেশলাঃ চতুরাঃ জনাঃ চিত্রস্য কর্ম্ম তৎ বিদন্তি যে তে তথোক্তাঃ চিত্রকার্য্যনিপুণাঃ নিপুণচিত্রকরাঃ সমে সমতলে আলেখ্যে নিম্নানি উন্নতানি চ তানি অসমানানি কূপপর্বতাদীনি ইব অতথ্যানি অসত্যানি তথ্যানি সত্যানীব দর্শয়ন্তি প্রত্যায়য়ন্তি। যথা নৈপুণ্যেন চিত্রার্পিতাঃ আরম্ভাঃ প্রকৃতত্বেন প্রতীয়ন্তে তদ্বৎ চতুরাণাং বাক্‌প্রয়োগকৌশলেন মিথ্যাঽপি সত্যবৎ প্রতিভাতীত্যর্থঃ।

নৈসর্গিকঃ=স্বাভাবিকঃ (নিসর্গ+ষ্ণিকঃ)

পরশ্চিন্তনীয়ঃ=পরঃ অন্যঃ উপায়ঃ চিন্তনীয়ঃ উদ্ভাবনীয়ঃ। উপায়ান্তর মুদ্ভাব্য অনয়োর্ভেদঃ কার্য্য ইত্যর্থঃ।

(৩১) উপায়েনেতি। যৎ উপায়েন কৌশলেন শক্যং সাধ্যং তৎ পরাক্রমৈঃ পরাক্রমপ্রদর্শনেন ন শক্যং ন সাধ্যং। পরাক্রম মপেক্ষ্য কৌশলেন সাধ্যসিদ্ধিরনায়াসেন ভবতীত্যর্থঃ। তদেব প্রদর্শয়ন্ আহ—কাকীতি। কাকী কাকপত্নী কনকসূত্রেণ সুবর্ণসূত্রেণোপায়েন সুবর্ণসূত্রং সর্পবিবরে রক্ষিত্বেত্যর্থঃ। কৃষ্ণসর্পং কালসর্পং অঘাতয়ৎ ঘাতয়ামাস (হন্+ণিচ্+লঙ্ৎ)

বায়সদম্পতী=জায়াচ পতিশ্চ দম্পতী (পতিশব্দে পরে জায়াশব্দস্য দমাদেশঃ) কাকমিথুনম্।

তরুকোটরাবস্থিতকৃষ্ণসর্পেণ=তরোঃ কোটরং তস্মিন্ অবস্থিতঃ কৃষ্ণসর্পঃ

তেন। কোটরাভ্যন্তরবর্ত্তিনা কৃষ্ণসর্পেণ।

(৩২) দুষ্টেতি। দুষ্টা ব্যভিচারিণী ভার্য্যা স্ত্রী শঠং কপটান্তঃকরণং মিত্রং বন্ধুঃ উত্তরদায়কঃ স্বামিবচনমুপেক্ষমাণঃ অনাজ্ঞাবহ ইত্যর্থঃ। ভৃত্যঃ সেবকঃ সর্পেণ সহ বর্ত্তমানং সসর্পং তস্মিন্ গৃহে বাসঃ অবস্থানঞ্চ মৃত্যুরেব (এব নিশ্চয়ে) প্রাণহন্তৈব। সংশয়ঃ সন্দেহঃ ন অস্তীতি শেষঃ। দুষ্টভার্য্যাদিবতঃ অচিরেণৈব মৃত্যু র্ভবতীত্যর্থঃ।

মহাপরাধঃ = মহান্ অপরাধঃ মহাপরাধঃ। অপত্যবিনাশরূপং মহদনিষ্টং।

সোঢ়ঃ = উপেক্ষিতঃ (সহ্ + ক্তঃ)

সার্দ্ধং = সহ।

বিগ্রহীতুং = যোদ্ধুম্।

(৩৩) বুদ্ধিরিতি। যস্য বুদ্ধিঃ অস্তীতি শেষঃ। তস্য বলং (ল্যর্থে প্রথমা) তু কিন্তু নির্বুদ্ধেঃ বুদ্ধিহীনস্য বলং কুতঃ? নৈব তৎ সম্ভবতীত্যর্থঃ। মদেন উন্মত্তঃ মদোন্মত্তঃ মহাবল ইত্যর্থঃ সিংহঃ শশকেন দুর্বলেনাপীতি ভাবঃ নিপাতিতঃ (নি + পৎ + ণিচ + ক্তঃ) হতঃ পশ্য অবগচ্ছ ত্বমিতি শেষঃ।

বিদধানঃ = কুর্বন্ (বি + ধা + শানচ্)

মেলকং কৃত্বা = মিলিত্বা।

বিজ্ঞপ্তঃ = নিবেদিতঃ (বি + জ্ঞা + ণিচ + ক্তঃ)

উপঢৌকয়ামঃ = উপায়নং প্রেষয়ামঃ।

উপকল্পিতং = আহারার্থং প্রেরিতং।

বারঃ = দানোচিতদিবসঃ (পালা)

প্রাপ্তঃ = উপস্থিতঃ, সমায়াতঃ।

(৩৪) ত্রাসহেতোরিতি। জীবিতস্য আশা তয়া প্রাণরক্ষণার্থং ত্রাসহেতোঃ প্রাণবিনাশে উদ্যতস্য জিঘাংসোরিত্যর্থঃ। বিনীতিঃ অনুনয়ঃ ক্রিয়তে ত্রাসিতেনেতি শেষঃ। অহং পঞ্চত্বং মৃত্যুং গমিষ্যামি প্রাপ্স্যামি চেৎ যদি মৃত্যৌ নিয়তে সতীত্যর্থঃ। তদা মে মম সিংহানুনয়েন কিং কিং প্রয়োজনং

নাহমিমমনুনেষ্যামি প্রত্যুত অস্য বধোপায়মুদ্ভাব্য আত্মরক্ষণায় চেষ্টিষ্যে ইতি ভাবঃ।

অপরাদ্ধঃ = কৃতাপরাধঃ।

দর্পাধ্মাতঃ = দর্পেণ আধ্মাতঃ পূর্ণঃ, দর্পপূর্ণঃ দর্পোদ্ধত ইতি যাবৎ।

আসন্নে = সন্নিহিতে, সমীপবর্ত্তিনি (আ + সদ্ + ক্তঃ)

অবতারিতং = উন্মোচিতং, অঙ্গাদুন্মুচ্য পাষাণে রক্ষিতং।

দৃষদি = প্রস্তরে।

কনকসূত্রানুসরণপ্রবৃত্তৈঃ = সুবর্ণসূত্রান্বেষণে নিযুক্তৈঃ।

নিরূপ্যমাণঃ = দৃশ্যমানঃ।

ব্যাপাদিতঃ = হতঃ, বিনাশিতঃ (বি + আ + পদ্ + ণিচ্ + ক্তঃ)

পন্থানঃ······ ··শিবাঃ = তব পথি অশুভং মাস্তু ইত্যর্থঃ।

দেব = স্বামিন্।

অত্যাহিতং = মহদনিষ্টং।

মন্যমানঃ = জানন্ (মন্ + শানচ্)

(৩৫) ভোগস্যেতি। রাজা ভোগস্য সুশাসিতাৎ রাজ্যাৎ উৎপন্নস্য সুখস্য ভাজনং পাত্রং অধিকারীতি যাবৎ। রাজ্যভোগসুখং রাজৈবানুভবতীত্যর্থঃ। মন্ত্রী কার্য্যসহায়ঃ কার্য্যস্য রাজকার্য্যপর্য্যবেক্ষণস্য ভাজনং পাত্রং। মন্ত্রিণি রাজকার্য্যপর্য্যালোচনায়াঃ ভারোঽর্পিত ইত্যর্থঃ। অতঃ রাজ্ঞঃ কার্য্যং প্রজা-রঞ্জনাদিকং পরিধ্বংসতে যঃ সঃ তথোক্তঃ। রাজকার্য্যব্যাঘাতকঃ মন্ত্রাভাবেন রাজ্যে উচ্ছৃঙ্খলতামুৎপাদয়ন্নিতি যাবৎ। মন্ত্রী দোষেণ লিপ্যতে স্পৃশ্যতে (লিপ্ + লট্ তে কর্ম্মণি বাচ্যে) রাজকার্য্যধ্বংসে মন্ত্রী এব দোষভাক্ নতু রাজেত্যর্থঃ।

ক্রমঃ = নিয়মঃ।

(৩৬) বরমিতি। প্রাণত্যাগঃ মৃত্যুরপি বরং শ্রেয়ান্ শিরসঃ মস্তকস্য কর্ত্তনং ছেদনং অপি বরমিত্যনেনান্বয়ঃ। স্বামিনঃ পদং তস্য অবাপ্তিঃ প্রাপ্তিঃ তদেব পাতকং পাপং তস্য ইচ্ছুঃ তস্য তথোক্তস্য প্রভুরাজ্যপ্রাপ্তিরূপ-মহাপাপং চিকীর্ষতঃ ভৃত্যস্য উপেক্ষণং অশাসনং নতু বর মিত্যন্বয়ঃ। প্রভু-

পদাকাঙ্ক্ষী ভৃত্যঃ অবশ্যমেৰ বধার্হ ইতিভাবঃ।

অসদৃশব্যবহারী = অসদৃশং অনুচিতং ব্যবহরতি যঃ সঃ তথোক্তঃ। বিরুদ্ধাচারী, ভৃত্যধর্ম্মলঙ্ঘনোদ্যত ইতিযাবৎ।

লক্ষ্যতে = দৃশ্যতে।

X শক্তিত্রয়নিন্দাং = শক্তীনাং প্রভাবোৎসাহমন্ত্রজানাং ত্রয়ং তস্য নিন্দা তাম্।

(৩৭) যইতি। যঃ রাজা শ্রিয়ং রাজলক্ষ্মীং সচিবায়ত্তাং মন্ত্রিহস্তগতাং কুর্য্যাৎ তস্য (সচিবস্য) ব্যসনং বিপৎ মরণাদি তস্মিন্ সতি সঃ জগতীপালঃ মহীপালঃ সঞ্চারকৈঃ পথপ্রদর্শকৈঃ অন্যত্র উপদেশকৈঃ কার্য্যসহায়ৈশ্চ বিনা অন্ধেন তুল্যং অন্ধবৎ (তেনতুল্যংক্রিয়াচেদ্বতি রিতি বতিঃ) দৃষ্টিহীন ইব সীদেৎ (সদ্ + বিধিলিঙ্ যাৎ) অবসন্নোভবেৎ। যথা পথপ্রদর্শকেন বিনা অন্ধঃ পদমেকমপি চলিতুং ন শক্নুয়াৎ তথা রাজাঽপি তাদৃশেন মন্ত্রিণা বিনা রাজ্যকার্য্যং সম্পাদয়িতুমিত্যর্থঃ।

স্বামী প্রমাণং = যথা স্বামিনে রোচতে তথা কুরু ইত্যর্থঃ।

(৩৮) কুর্বন্নিতি। যঃ জনঃ ব্যলীকানি অপ্রিয়াণি কুর্বন্ অহিতমাচরন্নপি প্রিয়ঃ অভিমতঃ স এব প্রিয়ঃ অকৃত্রিমো বন্ধুঃ। এতদেব সমর্থয়ন্নুদাহরতি অশেষাঃ বহবঃ দোষাঃ কুষ্ঠাদিরোগাঃ তৈঃ দুষ্টঃ অন্যৈরস্পৃষ্টোঽপি কায়ঃ স্বদেহঃ কস্য জনস্য ন বল্লভঃ প্রিয়ঃ অপিতু সর্বস্যৈব। কুষ্ঠাদিরোগযুক্তং কায়মিব মহানর্থকরমপি অকৃত্রিমং বন্ধুং ন কোঽপি পরিত্যজেদিত্যর্থঃ।

মূলভৃত্যান্ = প্রাচীনামাত্যান্।

অপাস্য = বিহায়, ত্যক্ত্বা (অপ + অস্ + যপ্)

আগন্তুকঃ = নবাগতঃ, অজ্ঞাতকুলশীল ইত্যর্থঃ।

পুরস্কৃতঃ = সর্বকার্য্যাধিকারে নিযুজ্য আদৃতঃ।

দ্রুহ্যতি = বিরুণদ্ধি (দ্রুহ্ + লট্ তি)

(৩৯) বর্দ্ধনমিতি। খলানাং নিসর্গতঃ ক্রূরপ্রকৃতীনাং বর্দ্ধনং অন্নবস্ত্রাদিনা পোষণং অথ অনন্তরং সম্মানং অমাত্যপদবীপ্রদানাদিনা গৌরবঞ্চ প্রীতয়ে সন্তোষায় কুতঃ ন কুতোঽপীত্যর্থঃ। দুর্জন উপকারিণমপি

হিনস্তীতি ভাবঃ। অত্রোদাহরণমাহ বিষদ্রুমাঃ বিষবৃক্ষাঃ অমৃতসেকেঽপি (ভাবে সপ্তমী) অমৃতাভিষেকেণ পরিবর্দ্ধিতাঃ অপি পথ্যানি সুফলানি ন ফলন্তি ন উৎপাদয়ন্তি। যস্য যাদৃশঃ স্বভাবঃ ন কেনাপি তদ্বৈপরীত্যং জায়তে ইতিভাবঃ।

সঞ্জীবকব্যসনার্দ্দিতঃ = সঞ্জীবকে ব্যসনং আসক্তিঃ তেন অর্দ্দিতঃ পীড়িতঃ মুগ্ধইতি যাবৎ। সঞ্জীবকং প্রতি জাতেন অনুরাগেণ বিমোহিতঃ ইত্যর্থঃ।

নিবর্ত্ততে = বিরমতি, সঞ্জীবকেন সহ সৌহার্দ্দাদিতি শেষঃ।

(৪০) নেতি। পরস্য অন্যস্য অপবাদেন দোষোদ্‌ঘাটনেন পরেষাং অন্যেষাং দণ্ডং শাসনং ন আচরেৎ ন বিদধ্যাৎ রাজেতি শেষঃ। একস্য দোষোদ্‌ঘাটনমাত্রেণাপরঃ ন দণ্ডার্হো ভবতীত্যর্থঃ। আত্মনা স্বয়ং (প্রকৃত্যাদিভ্যশ্চেতি তৃতীয়া) অবগমং পরীক্ষণং কৃত্বা দুষ্টমদুষ্টং বেতি পরিজ্ঞায়েত্যর্থঃ। বধ্নীয়াৎ (বন্ধ্ + বিধিলিঙ্ যাৎ) হন্যাৎ দুষ্টমিতি শেষঃ। বা অথবা পূজয়েত সম্মানয়েৎঅদুষ্টমিতি শেষঃ। দোষগুণাববিচার্য্য ন কস্যাপি দণ্ডবিধানং কর্ত্তব্যমিত্যর্থঃ।

প্রত্যাদিশ্যতাং = পরিত্যজ্যতাং (প্রতি + আ + দিশ্ + লোট্ তাম্ কর্ম্মণি বাচ্যে) ময়েতি শেষঃ।

সসম্ভ্রমং = সচকিতং (আহেতি ক্রিয়ায়া বিশেষণং) দমনকেন সঞ্জীবকস্য বধোপায় শ্চিন্তিতঃ তস্য পরিত্যাগেতু তৎসম্ভাবনাবিরহঃ সম্ভ্রমকারণং।

মন্ত্রভেদঃ = রহস্যপ্রকাশনং। সহসা পরিত্যাগে অয়ং গৃহচ্ছিদ্রং প্রকাশ্য রাষ্ট্রবিপ্লবং ঘটয়িষ্যতীতি ভাবঃ।

সমারব্ধং = সঞ্জীবকস্য নিরাকরণরূপমভীষ্টং (সম্ + আ + রভ্ কর্ম্মণি ক্তঃ)

মহতা প্রযত্নেন = অতীব সাবধানেন। যথা সঞ্জীবকোঽপি নিরাকৃতোভবতি মন্ত্রভেদশ্চ ন জায়তে ইত্যর্থঃ।

সম্পাদনীয়ং = করণীয়ং, সমাপনীয় মিতি যাবৎ।

দৃষ্টদোষঃ = দৃষ্টঃ দোষঃ যস্য সঃ। প্রমাণীকৃতাপরাধঃ।

দোষান্নিবর্ত্ত্য = কৃতমপরাধং ক্ষমিত্বা।

সন্ধাতব্যঃ = তেন সহ মৈত্রী কর্ত্তব্যেত্যর্থঃ।

(৪১) সকৃদিতি। যঃ জনঃ সকৃৎ একবারং দুষ্টং অহিতকরং মিত্রং পুনঃ সন্ধাতুং তেন সহ মিলনং কর্ত্তুং ইচ্ছতি সঃ অশ্বতরঃ সর্পবিশেষঃ তস্য পত্নী অশ্বতরী গর্ভং যথা গর্ভমিব মৃত্যুমেব গৃহ্লাতি সমাহ্বয়তি। যথা অশ্বতরীণামাপাতপ্রীতিকরং গর্ভধারণং পরিণামে গর্ভিণ্যা জীবিতাপহং ভবতি তদ্বৎ তাদৃশেন মিত্রেণ মৈত্রী পরিণামে অনিষ্টং ঘটয়তীত্যর্থঃ। ভগ্নস্নেহে চ যা মৈত্রী ন সা কল্যাণদায়িনীতি ভাবঃ।

(৪২) অঙ্গাঙ্গিভাবমিতি। অঙ্গাঙ্গিভাবং অন্যোন্যসম্পর্কং অজ্ঞাত্বা অবিদিত্বা কথং কেন প্রকারেণ সামর্থ্যনির্ণয়ঃ অয়ং মহাবলঃ হীনবলোবেতি নিশ্চয়ঃ ভবেদিতি শেষঃ। টিট্টিভমাত্রেণ তদাখ্যেন একেনৈব ক্ষুদ্রকায়-পক্ষিবিশেষেণ (টিটারি) সমুদ্রঃ ব্যাকুলীকৃতঃ পরিভূতঃ পশ্য অবগচ্ছ।

আসন্নপ্রসবা = আসন্নঃ সন্নিহিতঃ প্রসবঃ যস্যাঃ সা পূর্ণগর্ভা।

অন্বিষ্যতাং = নিরূপ্যতাং (অনু + ইষ্ + লোট্ তাম্)

সমুদ্রবেলয়া = সমুদ্রজলোচ্ছ্বাসেন।

প্লাব্যতে = উচ্ছ্বাস্যতে (প্লু + ণিচ্ + লট্ তে কর্ম্মণি বাচ্যে) কর্ত্তৃপদং সমুদ্রবেলয়া কর্ম্মপদঞ্চ স্থানং।

মহদন্তরং = মহান্ প্রভেদঃ। উভয়োঃ সাদৃশ্যং ন সঙ্গচ্ছতে ইত্যর্থঃ।

(৪৩) অনুচিতকর্ম্মারম্ভ ইতি। অনুচিতং শক্ত্যতিরিক্তং কর্ম্ম তস্মিন্ আরম্ভঃ প্রবর্ত্তনং স্বজনৈঃ আত্মীয়ৈঃ বিরোধঃ বন্ধুবিচ্ছেদঃ বলীয়সা বলবত্তরেণ স্পর্দ্ধা প্রতিদ্বন্দ্বিতা প্রমদাজনবিশ্বাসঃ নারীষু প্রত্যয়ঃ এতানি পূর্বোক্তানি চত্বারি মৃত্যোঃ দ্বারাণি এষামেকৈকমপি মৃত্যুসাধন মিত্যর্থঃ।

তচ্ছক্তিজ্ঞানার্থিনা = তস্য টিট্টিভস্য শক্তিঃ তস্যাঃ জ্ঞানং তদর্থয়তে যঃ সঃ তেন, টিট্টিভসামর্থ্যং জিজ্ঞাসমানেন কীদৃশোঽয়ং বলবানিতি নিশ্চেতুকামেনেতি যাবৎ।

আপতিতং = ঘটিতং, উপস্থিতং।

গরুত্মতা = গরুৎ পক্ষঃ বিদ্যতে অস্য তেন, গরুড়েন।

বিজ্ঞপ্তঃ = নিবেদিতঃ (বি + জ্ঞা + ণিচ্ + ক্তঃ কর্ম্মণি বাচ্যে)

মৌলৌ = শিরসি।

নিধায়=ধারয়িত্বা (নি+ধা+যপ্)

দ্রোহবুদ্ধিঃ=দ্রোহে বিদ্রোহে বুদ্ধির্যস্য সঃ। বিগ্রহীতুকামঃ।

শৃঙ্গাগ্রপ্রহরণাভিমুখঃ=শৃঙ্গয়োরগ্রং তেন প্রহরণং তস্মিন্ অভিমুখঃ। শৃঙ্গাগ্রেণ ত্বাং প্রহর্ত্তুমুদ্যতঃ।

চকিতঃ=সসম্ভ্রমঃ।

উপসর্পন্=সমীপং গচ্ছন্ (উপ+সৃপ্+শতৃ ১।১)

বিস্মিতং=বিস্ময়াবিষ্টং, বিস্ময়াপন্নং।

কুশলং তে=তে তুভ্যং কুশলং (কুশলশব্দযোগে চতুর্থী)

(৪৪) সম্পত্তয়ইতি। যে নরাঃ রাজা সংশ্রয়ো যেষাং তে তথোক্তাঃ রাজসেবকাঃ রাজপ্রসাদজীবিন ইত্যর্থঃ। তেষাং নরাণাং সম্পত্তয়ঃ ধনানি পরাধীনাঃ চিত্তং মনঃ সদা সততং অনির্বৃতং অনিশ্চিন্তং কদা রাজা কিমাজ্ঞাপয়তীতি চিন্তয়া ব্যাকুলং। স্বস্য জীবনং তস্মিন্ অপি অবিশ্বাসঃ অপ্রত্যয়ঃ প্রাণাত্যয়েঽপি রাজাজ্ঞায়াঃ প্রতিপালিতত্বাদিতিভাবঃ।

কিমেতৎ=কথং ত্বং বিষণ্ণ ইব লক্ষ্যসে ইত্যর্থঃ।

(৪৫) যথেতি। যথা যেন প্রকারেণ সমুদ্রে জলধৌ নিমগ্নঃ (নি+মস্জ+ক্তঃ) নিপতিতঃ জনঃ সর্প এব অবলম্বনং তথোক্তং লব্ধা (লভ্+ক্ত্বা) প্রাপ্য ন মুঞ্চতি ন ত্যজতি ন চ আধত্তে (আ+ধা+লট্ তে) গৃহ্লাতি তথা তেন প্রকারেণ সম্প্রতি ইদানীং পিঙ্গলকাভিপ্রায়পরিজ্ঞানাদিত্যর্থঃ। মুগ্ধঃ (মুহ্+ক্তঃ) বিস্মিতঃ কিংকর্ত্তব্যবিমূঢ় ইতি যাবৎ অস্মি ভবামি।

(৪৬) একেত্রেতি। একত্র একস্মিন্ পক্ষে রাজবিশ্বাসঃ রাজ্ঞা রহস্যজ্ঞাপনেন ময়ি কৃতঃ প্রত্যয়ঃ অন্যত্র অন্যস্মিন্ পক্ষে বান্ধবঃ ভবাদৃশং মিত্রং নশ্যতি। ভবৎসন্নিধৌ প্রকাশে মন্ত্রভেদো জায়েত অপ্রকাশনেতু ভবতঃ প্রাণসংশয় ইত্যর্থঃ। অতএব অহং কিং করোমি ক কুত্র বা গচ্ছামি দুঃখমেব সাগরঃ তস্মিন্ দুস্তরে দুঃখে পতিতঃ নিমগ্নঃ অস্মীতি শেষঃ। এতদ্ দ্বয়মপ্যপ্রিয়ং মমেতি ভাবঃ।

সুবিস্তরং=আনুপূর্ব্বিকং, আদ্যোপান্তং।

মনোগতং = হৃদ্গতং ভাবং।

সুনিভৃতং = রহসি।

অস্মদীয়প্রত্যয়াৎ = অস্মাকময়ং অস্মদীয়ঃ অস্মৎসকাশাৎ লব্ধঃ প্রত্যয়ঃ বিশ্বাসঃ তৃণানি নোন্মূলয়তীত্যাদিনা জনিতো বিশ্বাস স্তস্মাৎ।

পরলোকার্থিনা = পরলোকং অর্থয়তে যঃ স তেন, পাপভীরুণা মদ্বচনাদাগতস্য তে অনিষ্টে জাতে অহমেব বিশ্বাসঘাতকতাদোষদূষিতোভবামীতিভাবঃ।

আখ্যেয়ং = বক্তব্যং (আ + খ্যা + কর্ম্মণি যঃ)

বিকৃতবুদ্ধিঃ = বিকৃতা বিদ্বেষভাবমাপন্না বুদ্ধির্যস্য সঃ। বিদ্বেষমতিঃ ত্বাং হন্তুকাম ইত্যর্থঃ।

রহসি = একান্তে, অন্যেষামসন্নিধৌ।

তর্পয়ামি = প্রচুরমাংসাহারদানেন প্রীণয়ামি।

প্রাপ্তকালকার্য্যং = সময়োচিতং কার্য্যং। বিক্রমপ্রদর্শনং বিনা নাস্তি তে নিষ্কৃতি রিতিভাবঃ।

(৪৭) আরাধ্যমানইতি। নৃণাং পতিঃ নৃপতিঃ রাজা প্রযত্নাৎ মহতা যত্নেন আরাধ্যমানঃ সেব্যমানোঽপি তোষং তুষ্টিং প্রসন্নতামিতি যাবৎ ন আয়াতি প্রাপ্নোতি। অত্র বিষয়ে কিং চিত্রং বিস্ময়করং। নৃপতীনাময়মেব স্বভাবইতিভাবঃ। তু কিন্তু অয়ং (নৃপতিঃ) অপূর্ব্বঃ অন্যৈরবিদিতস্বরূপঃ প্রতিমাবিশেষঃ দেবস্য মূর্ত্তিবিশেষঃ। যঃ সেব্যমানঃ সবিশেষমারাধ্যমানোঽপি রিপুতাং শত্রুতাং উপৈতি (উপ + ই + লট্ তি) প্রাপ্নোতি। অনুরক্তস্য সেবকস্যাপি অনিষ্টং কর্ত্তুং ন সঙ্কুচিতোভবতীত্যর্থঃ।

অশক্যার্থঃ = অশক্যঃ অসম্পাদনীয়ঃ অর্থঃ প্রয়োজনং যস্য সঃ। নিষ্ফল ইত্যর্থঃ।

(৪৮) নিমিত্তমিতি। যঃ জনঃ নিমিত্তং কোপস্য কারণং উদ্দিশ্য (উৎ + দিশ্ + যপ্) অবলম্ব্য ক্রোধকারণে বিদ্যমানে সতীত্যর্থঃ। প্রকুপ্যতি ক্রুধ্যতি (হি পাদপূরণে) সঃ জনঃ ধ্রুবং নিশ্চিতং তস্য নিমিত্তস্য অপগমে নাশে তস্মিন্ অবিদ্যমানে সতীত্যর্থঃ। প্রসীদতি ক্ষমতে। তু কিন্তু যস্য মনঃ চিত্তং অকারণাৎ নিমিত্তাভাবেন দ্বেষ্টি যৎ তৎ তথোক্তং স্বভাবতঃ বিদ্বেষ

ভাবাপন্নং তং নির্নিমিত্তক্রোধিনং জনঃ কথং কেন প্রকারেণ পরিতোষয়িষ্যতি প্রসাদয়িষ্যতি! প্রকৃত্যা পরদ্বেষী দুষ্প্রসাদ ইত্যর্থঃ।

নির্নিমিত্তাপকারিণঃ=নির্নিমিত্তং অকারণং অপকুর্বন্তি যে তে তথোক্তাঃ। অকারণদ্বেষিণঃ।

বাঙ্ মধুরঃ=বাচা মধুরঃ প্রত্যক্ষপ্রিয়বাদী।

বিষহৃদয়ঃ=বিষং বিষপূর্ণং বিদ্বেষভাবাপন্নমিতিযাবৎ হৃদয়ং যস্য সঃ; খলান্তঃকরণঃ।

ভেদমুপগতাৎ=ভগ্নস্নেহাৎ।

তদাজ্ঞানুবর্ত্তনং=তস্য রাজ্ঞঃ আজ্ঞা আদেশঃ তস্যাঃ অনুবর্ত্তনং অনুসরণম্।

জিঘাংসুঃ=হন্তুমিচ্ছুঃ (হন্+সন্+উঃ)

স্তব্ধকর্ণঃ=স্তিমিতকর্ণঃ উন্নমিতকর্ণ ইতিযাবৎ।

সমুদ্ধতলাঙ্গূলঃ=সমুদ্ধতং উৎক্ষিপ্তং লাঙ্গূলং যেন সঃ উৎক্ষিপ্তলাঙ্গূলঃ।

বিবৃতাস্যঃ=বিবৃতং (বি+বৃ+ক্তঃ) ব্যাদত্তং আস্যং মুখং যেন সঃ। কৃতমুখব্যাদানঃ।

(৪৯) বলবানিতি। নির্নাস্তি তেজো যস্য সঃ পরাক্রমশূন্যঃ বলবান্ অপি প্রভূতবলশালী অপি জনঃ কস্য জনস্য ন অভিভবস্য আস্পদং স্থানং অপিতু সর্বস্যৈবেত্যর্থঃ। অত্র দৃষ্টান্তমাহ লোকৈঃ ভস্মচয়ে ভস্মরাশৌ নিঃশঙ্কং নির্ভয়ং পদং দীয়তে নিধীয়তে পশ্য জানীহি। নিস্তেজাঃ ভস্মবৎ পাদাবমর্দ্দিতো-ভবতীত্যর্থঃ। অতঃ সর্বথা সংগ্রামে পরাক্রমপ্রদর্শনমেব শ্রেয় ইতিভাবঃ।

সুগুপ্তং=রহসি, সাবধানমিতিযাবৎ।

অনুষ্ঠাতব্যং=সম্পাদনীয়ং।

নো চে ন্ন ত্বং নাহং=প্রকাশেতু কার্য্যব্যাঘাতঃ উভয়োরপ্যাবয়োঃ প্রাণসংশয়শ্চ ভবেদিতিভাবঃ।

নিষ্পন্নং=সম্পন্নং, বৃত্তং (নিঃ+পদ্+ক্তঃ)

(৫০) বন্ধুরিতি। দুষ্টানাং খলানাং বন্ধুঃ কঃ নাম ন কোঽপীত্যর্থঃ।

অতিযাচিতঃ সন্ কঃ জনঃ ন কুপ্যেৎ ক্রোধপরবশোভবেৎ (কুপ্+

বিধিলিঙ্ যাৎ) বিত্তেন সম্পদা সম্পদংপ্রাপ্যেত্যর্থঃ (ফলরূপহেতৌ তৃতীয়া) কঃ জনঃ ন দৃপ্যতি গর্বিতো ভবতি। কুৎসিতং লোকবিগর্হিতং কৃত্যং (কৃত্+ক্যপ্) কার্য্যং তস্মিন্ বন্ধুবিশ্লেষণাদিনিন্দনীয়কর্ম্মণি কঃ জনঃ ন পণ্ডিতঃ কুশলঃ। সম্মিলনাৎ ভেদঃ অনায়াসসাধ্য ইতিভাবঃ।

পাপাশয়ঃ=পাপঃ আশয়ঃ মতির্যস্য সঃ, পাপমতিঃ।

বিকৃতাকারং=বিকৃতঃ দুর্দ্দর্শঃ আকারঃ যস্য সঃ। মুখব্যাদানেন ভীষণ-মূর্ত্তিং।

স্বানুরূপং=স্বস্য অনুরূপং স্বজাতিসদৃশং।

মহাহবে=মহাযুদ্ধে, মহান্ আহবঃ তস্মিন্।

আসীনঃ=উপবিষ্টঃ (আস্+শানচ্)

(৫১) পরৈরিতি। পরৈঃ অন্যৈঃ অনুজীবিভিরিত্যর্থঃ রাজ্যং সংভুজ্যতে রাজ্যভোগসুখং অনুভূয়তে। রাজা ধর্ম্মস্য অতিক্রমতঃ উল্লঙ্ঘনাৎ অহিংসা-দিধর্ম্মোল্লঙ্ঘনাৎ স্বয়ং হস্তিবধাৎ সিংহ ইব পাপস্য ভাজনং ভাগী। যথা সিংহঃ হস্তিনং ব্যাপাদ্য শৃগালাদীনামাহারং করোতি তেন ন কিমপি তস্য স্বোপকারোজায়তে তদ্বৎ রাজাপি পরেষামুপকারায় প্রাণিবধাদিপাপং কৃত্বা রাজ্যং প্রশাস্তীত্যর্থঃ।

ন্যায়ঃ=নিয়মঃ।

অরাতিং=শত্রুং।

সন্তাপঃ=বিলাপঃ, পরিদেবনং।

(৫২) ধর্ম্মার্থকামতত্ত্বজ্ঞইতি। কাম্যতে ইতি কামঃ বিষয়ভোগঃ ধর্ম্মশ্চ অর্থশ্চ কামশ্চ তে তেষাং তত্ত্বস্য জ্ঞঃ তথোক্তঃ ধর্ম্মাদিত্রিবর্গস্য যাথার্থ্যবিৎ জনঃ একান্তকরুণঃ নিতরাং দয়ার্দ্রচিত্তঃ ন ভবেৎ। তথাত্বে তু ত্রিবর্গসাধনং ন স্যাদিতি ভাবঃ। হি যতঃ ক্ষমাবান্ অত্যন্তক্ষমাশীলঃ হস্তস্থং করগতমপি অর্থং রক্ষিতুং ন ক্ষমঃ সমর্থঃ। অত্যন্তক্ষমাশীলস্য করগতোঽপ্যর্থঃ অন্যৈ-রাচ্ছিদ্যতে কিমুত রাজ্য মিতিভাবঃ।

(৫৩) ক্ষমেতি। শত্রৌ মিত্রেচ ক্ষমা শত্রুষু মিত্রেষু চাভেদজ্ঞানং যতীনাং তপস্বিনাং বীতস্পৃহাণামেবেতিযাবৎ ভূষণং শোভনং। যতীনা-

মেবায়ং ধর্ম্মঃ যত্তে শত্রৌ মিত্রেচ সম মাচরন্তি। অপরাধিষু কৃতাপরাধেষু দণ্ডার্হেষু ইতিযাবৎ সত্ত্বেষু প্রাণিষু সৈব ক্ষমা এব নৃপাণাং রাজ্ঞাং দূষণং অযশস্করং। এষ এব রাজ্ঞাং ধর্ম্মঃ যত্তে দণ্ডার্হেষু দণ্ডং বিদধতি। এবং সতি সঞ্জীবকং হত্বা রাজধর্ম্মে অনুষ্ঠিতে ক্ষোভং মা কার্ষীরিতি ভাবঃ।

কপটবচনেন = খলবাক্যেন, কৃতকবচনেন।

স্বাংপ্রকৃতিমাপন্নঃ = নৈসর্গিকং চিত্তস্থৈর্য্যমাপন্নঃ প্রাপ্তঃ দমনকস্য প্রবোধবচনেন প্রকৃতিস্থঃ সন্নিত্যর্থঃ।

(৫৪) সুহৃদ্ভেদ ইতি। ভবতাং শক্রনিলয়ে শত্রুগৃহে সুহৃদ্ভেদঃ ভবতু নতু যুষ্মাকং গৃহে ইত্যাশীরুক্তিঃ। খলঃ ক্রূরপ্রকৃতির্জনঃ কালেন মৃত্যুনা আকৃষ্টঃ ধৃতঃসন্ অহরহঃ প্রতিদিনং প্রলয়ং নাশং উপসর্পতু প্রাপ্নোতু। জগদিদং খলানামাবাসো মা ভূয়াদিত্যর্থঃ। জনঃ লোকঃ নিত্যং সততং সকলসুখসম্পত্তিবসতিঃ সর্বসুখসম্পন্নঃ ভূয়াৎ (ভূ+আশীর্লিঙ্ যাৎ) ইহ অস্মিন্ রম্যে রমণীয়ে কথা কাককূর্ম্মাদীনামুপন্যাসচ্ছলেন নীতিকথা সএব আরামঃ উপবনং তস্মিন্ তথোক্তে বালোঽপি সুকুমারমতিরপীত্যর্থঃ সততং নিত্যং রমতাং প্রীতি মনুভবতু। (রম্+লোট্ তাম্)

ইতি হিতোপদেশটীকায়াং দীপিকাসমাখ্যায়াং দ্বিতীয়ঃ কথাসংগ্রহঃ॥ ০॥

বিগ্রহঃ।

কুতূহলং = ঔৎসুক্যং।

ভবদ্ভ্যঃ = যুষ্মভ্যং (রুচ্যর্থানাং প্রীয়মাণইতি সম্প্রদানত্বাচ্চতুর্থী)

(১) হংসৈরিতি। ময়ূরাণাং তুল্যঃ বিক্রমঃ যস্মিন্ তস্মিন্ তথোক্তে তুল্যপ্রতিদ্বন্দ্বিতাব্যঞ্জকে হংসৈঃ সহ বিগ্রহে যুদ্ধে কাকৈঃ বিশ্বাস্য হংসানিতি শেষঃ। অরিমন্দিরে শক্রগৃহে হংসানামাবাসে ইত্যর্থঃ। স্থিত্বা অবস্থায়

হংসাঃ বঞ্চিতাঃ প্রতারিতাঃ।

পদ্মকেলিনামধেয়ং = পদ্মকেলীতি নাম্না প্রসিদ্ধম্।

(২) যদীতি। যদি ইহ জগতি সম্যক্ সুবিচক্ষণ ইতি যাবৎ নেতা (নী + তৃণ্ ১।১) নায়কঃ শাসিতেতি যাবৎ নরপতিঃ রাজা ন স্যাৎ ন বিদ্যেত ততঃ তর্হি প্রজা লোকঃ জলধৌ সমুদ্রে নাস্তি কর্ণধারঃ নাবিকঃ যস্যাঃ সা নৌঃ নৌকা ইব বিপ্লবেত নিমজ্জেৎ বিনশ্যেদিত্যর্থঃ। অরাজকে জনপদে প্রজাসংরক্ষণং ন ভবেদিত্যর্থঃ ।

সুবিস্তীর্ণকমলপর্য্যঙ্কে = সুবিস্তীর্ণং সম্যক্ বিকসিতং যৎ কমলং তদেব পর্য্যঙ্ক স্তস্মিন্। বিকসিতপদ্মরূপে আসনে।

সুখাসীনঃ = সুখেন আসীনঃ (আস্ + শানচ্) উপবিষ্টঃ ।

পরিবারপরিবৃতঃ = অনুচরবর্গসমেতঃ ।

দেশান্তরাৎ = অন্যো দেশঃ দেশান্তরং তস্মাৎ অপরস্মাৎ রাজ্যাৎ ।

আখ্যাতুকামঃ = আখ্যাতুং বক্তুং কামো যস্য সঃ (তুমঃ কামমনসোরিতি মলোপঃ ।

চরন্ = ইতস্ততো ভ্রাম্যন্ ।

কৌতুকাৎ = কুতূহলাৎ ।

মহদন্তরং = মহান্ প্রভেদঃ উভয়োঃ রাজ্যয়োরিতি শেষঃ ।

স্বর্গৈকদেশঃ = স্বর্গৈকভাগঃ দ্বিতীয়ঃ স্বর্গ ইবেত্যর্থঃ ।

মরুস্থলে = তরুগুল্মাদিরহিতে প্রদেশে। সুখবিহারাযোগ্যে ইত্যর্থঃ ।

(৩) পয়ঃপানমিতি। ভুজাঙ্গানাং সর্পাণাং পয়ঃপানং দুগ্ধপানং কেবলং অনন্যফলকমিত্যর্থঃ বিষবর্দ্ধনং বিষস্য বৃদ্ধিকরং (বৃধ্ + অনট্ কর্ত্তরি) হি নিশ্চিতং মূর্খাণাং হিতাহিতবিবেকশূন্যানাং উপদেশঃ হিতবচনং প্রকোপায় ক্রোধবৃদ্ধয়ে ন শান্তয়ে ন দুঃখনিবৃত্তয়ে ভবতীতি শেষঃ (ক্রিয়াগ্রহণাচ্চতুর্থী) মূর্খাঃ পয়ঃপানেন সর্পা ইব ন শাম্যন্তি প্রত্যুত অধিকতরং ক্রোধপরবশা ভবন্তীত্যর্থঃ ।

(৪) বিদ্বানিতি। বিদ্বান্ (বিদ্ + শতৃ) পণ্ডিতঃ বিবেকধীসম্পন্ন ইতি যাবৎ এব উপদেষ্টব্যঃ উপদেশভাজনমিত্যর্থঃ অবিদ্বান্ মূর্খঃ হিতাহিত-

বিবেকশূন্যঃ কদাচন কদাচিদপি ন উপদেষ্টব্য ইতি শেষঃ। অত্র প্রমাণ মাহ অজ্ঞান্ মূর্খান্ বানরান্ উপদিশ্য খগাঃ পক্ষিণঃ স্থানভ্রষ্টাঃ ভগ্ননীড়াঃ সন্তঃ যযুঃ অন্যত্র জগ্মুঃ।

পর্ব্বতোপত্যকায়াং = পর্ব্বতস্যাসন্নভূমৌ। উপত্যকাদ্রেরাসন্না ভূমিরূর্দ্ধ মধিত্যকেত্যমরঃ।

নীলপটৈরিব = নীলবর্ণচন্দ্রাতপৈরিবেত্যর্থঃ।

জলধরপটলৈঃ = মেঘসমূহৈঃ।

ধারাসারৈঃ = নিরন্তরাভির্ধারাভিঃ।

(৫) অস্মাভিরিতি। চঞ্চুভিরেবেতি চঞ্চুমাত্রং তেন আহৃতানি সংগৃহীতানি তৈঃ তৃণৈঃ করণৈঃ অস্মাভিঃ নীড়াঃ আবাসাঃ নির্ম্মিতাঃ কৃতাঃ। যূয়ং হস্তাশ্চ পাদাশ্চ হস্তপাদং তদাদি যেষাং তৈঃ হস্তপাদাদিভি রঙ্গৈঃ সংযুক্তাঃ সম্পন্নাঃ সন্তঃ কিং কেন হেতুনা অবসীদথ ক্লিশ্যথ। হস্তপাদাদীনামঙ্গানাং সাহায্যেন তৃণপত্রাদিক মাহৃত্য আবাসং নির্ম্মায় চ ন কথং সুখেন তিষ্ঠতেত্যর্থঃ।

জাতামর্ষৈঃ = জাতঃ অমর্ষঃ ক্রোধঃ যেষাং তৈঃ ক্রোধাভিভূতৈঃ।

নির্ব্বাতনীড়গর্ভাবস্থিতাঃ = নির্নাস্তি বাতো বায়ু র্যেষু তে তথোক্তাঃ নীড়াস্তেষাং গর্ভেষু অবস্থিতাঃ কৃতনিবাসাঃ।

উপশমঃ = নিবৃত্তিঃ বিরামঃ।

(৬) আত্মন ইতি। যঃ জনঃ আত্মনঃ স্বস্য পরেষাং অন্যেষাং চ বলাবলং বলশালিত্বং দুর্ব্বলত্বঞ্চ সমীক্ষ্য সমালোচ্য পরীক্ষ্যেতি যাবৎ অন্তরং বিশেষং স্বপরয়োর্বৈলক্ষণ্যং নৈব জানাতি বেত্তি সঃ জনঃ (কর্ম্ম) অরিভিঃ শত্রুভিঃ তিবস্ক্রিয়তে অবজ্ঞায়তে অভিভূয়তে ইত্যর্থঃ।

(৭) সুচিরমিতি। অবুদ্ধিমান্ নির্ব্বোধঃ গর্দ্দভঃ দ্বীপিচর্ম্মপরিচ্ছন্নঃ ব্যাঘ্রচর্ম্মাবৃতঃ সন্ ক্ষেত্রে শস্যক্ষেত্রে সুচিরং বহুদিনং যাবৎ শস্যং চরন্ ভক্ষয়ন্ বাচোদোষঃ বাগ্‌দোষ স্তস্মাৎ শব্দং কৃত্বা ইত্যর্থঃ হতঃ ব্যাপাদিতঃ।

মুমূর্ষুঃ = ম্রিয়মাণঃ (মৃ + সন্ + উঃ)

ব্যাঘ্রবুদ্ধ্যা = ব্যাঘ্রোঽয়মিতি মত্বা।

ধূসরকম্বলকৃততনুত্রাণেন = ধূসরং কম্বলং তেন কৃতং তনুত্রাণং গাত্রাবরণং

যেন তেন তথোক্তেন। কম্বলেন গাত্রমাচ্ছাদ্যেত্যর্থঃ।

ধনুষ্কাণ্ডং = ধনুর্ব্বাণং।

অধিক্ষিপসি = নিন্দসি।

ন ক্ষন্তব্যং = অস্মাভিরিতিশেষঃ। স্বামিনিন্দাপরাধস্য সমুচিতাং শাস্তিং লভস্বেত্যর্থঃ।

কূপমণ্ডূকঃ = অদূরদর্শী অনভিজ্ঞ ইতি যাবৎ।

(৮) সেবিতব্যইতি। ফলঞ্চ ছায়া চ তাভ্যাং অন্বিতঃ যুক্তঃ মহান্ বৃক্ষঃ মহাবৃক্ষঃ বিশালস্তরুঃ সেবিতব্যঃ আশ্রিতব্যঃ জনেনেতি শেষঃ। কুত ইত্যাহ যদি দৈবাৎ বিধিনিগ্রহবশাৎ ফলং নাস্তি ন বিদ্যতে ফলভক্ষণেন ক্ষুধোপশমো ন সম্ভবেদিত্যর্থঃ তর্হি ছায়া কেন জনেন নিবার্য্যতে প্রত্যাদিশ্যতে ন কেনাপীত্যর্থঃ। ফলাভাবেঽপি ছায়ায়ামুপবিশ্য শ্রমাপনোদনং সম্ভাবনীয়মিতি ভাবঃ।

(৯) হীনসেবেতি। হীনসেবা নীচপুরুষাশ্রয়ণং ন কর্ত্তব্যঃ বিধেয়ঃ মহত আশ্রয়ঃ মহদাশ্রয়ঃ সাধুজনসংসর্গঃ কর্ত্তব্যঃ। অত্র হেতুমাহ শৌণ্ডিকী শৌণ্ডিকপত্নী মদ্যাজীবেতি যাবৎ তস্যাঃ হস্তে করে পয়ঃ দুগ্ধমপি বারুণী সুরা ইতি অভিধীয়তে কথ্যতে লোকৈরিতি শেষঃ। অসৎসংসর্গেণ সাধুরপি অসাধুত্বেন শঙ্ক্যতে ইত্যর্থঃ।

(১০) ব্যপদেশ ইতি। নরাধিপে রাজনি অতিশক্তে মহাপ্রতাপশালিনি সতি ব্যপদেশে ব্যাজে রাজ্ঞো নাম্নেতি যাবৎ অপি কিমুত তৎসাহায্যেনেত্যর্থঃ সিদ্ধিঃ কার্য্যসিদ্ধিঃ স্যাৎ ভবেৎ। শশিনঃ চন্দ্রস্য ব্যপদেশেন ছলেন তদাদেশোঽয়মিতি কথয়িত্বেত্যর্থঃ শশকাঃ সুখং নিরুপদ্রবং বসন্তি নিবসন্তি।

ক্ষুদ্রজন্তূনাং নিমজ্জনস্থানং = ক্ষুদ্রজন্তূনামপীতি শেষঃ নিমজ্জনস্থানং অবগাহনস্থানং নাস্তীত্যনুষঙ্গঃ।

গজযূথপাদাহতিভিশ্চূর্ণিতাঃ = গজানাং যূথং তস্য পাদাঃ তৈরাহতয়ঃ আঘাতাঃ তাভিঃ চূর্ণিতাঃ দলিতাঃ ভগ্নহস্তপাদা ইতি যাবৎ। সঞ্চরতাং গজানাং পাদাবমর্দ্দনেন নিপাতিতা ইত্যর্থঃ।

পিপাসাকুলিতেন = পাতুমিচ্ছা পিপাসা (পা + সন্ অ, স্ত্রী) তৃষ্ণা তয়া

আকুলিতঃ কাতরস্তেন সত্তেত্যর্থঃ।

বিষীদত=বিষণ্ণা ভবত (বি+সদ্+লোট্ ত) যূয়মিতি শেষঃ।

গজযূথপনিকটে=গজানাং যূথং তৎ পাতি যঃ সঃ তস্য নিকটং তস্মিন্ গজযূথপতিসকাশে।

কথং·········বক্তব্যম্=ক্ষুদ্রকায়েন ময়া কথং মহাকায়ো গজযূথপতিরূপ-গন্তব্য ইতি ভাবঃ।

পর্ব্বতশিখরং=গিরিশৃঙ্গং।

(১১) উদ্যতেম্বিতি। উদ্যতেষু হননার্থমুৎক্ষিপ্তেষু অপি শস্ত্রেষু ভীতোত্যর্থঃ দূতঃ অন্যথা প্রভুসন্দেশাদন্যদিত্যর্থঃ ন বদেৎ অপিতু সত্যং বদেৎ এবং সতি তস্য ভীতিনিবারণং কুতঃ স্যাদিত্যপেক্ষায়ামাহ অবধ্যভাবেন বধা-নর্হত্বেন সদৈব নিত্যকালং হি নিশ্চিতং যথার্থস্য সত্যস্য বাচকঃ (বচ্+ণকঃ) সত্যবাদী ভবতীতি শেষঃ।

নিঃসারিতাঃ=তাড়িতাঃ বিদলিতা ইতি যাবৎ।

চন্দ্রপ্রতিবিম্বং=চন্দ্রচ্ছায়াং সরসি প্রতিফলিতং চন্দ্রমণ্ডলং।

অজ্ঞানেন=অজ্ঞানতঃ ভবদাশ্রিতা বয়মিতি অবিদিত্বেত্যর্থঃ।

মহাপ্রতাপঃ=মহান্ প্রতাপঃ যস্য সঃ। প্রভূতবলবিক্রমশালী।

অবধীয়তাম্=সাভিনিবেশং শৃণু (অব+ধা+লোট্ তাম্) ত্বয়েতি শেষঃ।

মুখ্যঃ=প্রধানং।

সর্ব্বশাস্ত্রার্থপারগঃ=সর্বাণি শাস্ত্রাণি তেষাং অর্থঃ তস্য পারং সীমানং গচ্ছতি যঃ স তথোক্তঃ। সকলনীতিশাস্ত্রবিশারদঃ।

স্বদেশজঃ=একদেশোৎপন্নঃ।

(১২) স্বদেশজমিতি। নৃপঃ রাজা স্বদেশজং একদেশোৎপন্নং কুলঞ্চ আচারশ্চ তয়োঃ সমাহারঃ তস্মিন্ বংশে ব্যবহারে চেত্যর্থঃ বিশুদ্ধং নির্ম্মলবংশ-সম্ভূতং সদাচাররতঞ্চেত্যর্থঃ। উপধয়া ধর্ম্মাদিভিঃ পরীক্ষণেন (উপধাধর্ম্মাদ্যৈর্যৎ পরীক্ষণমিত্যমরঃ) শুচিঃ শুদ্ধস্তম্। শাস্ত্রজ্ঞং বিদ্বাংসং অব্যসনিনং দ্যূতপানা-দ্যাসঙ্গরহিতং ব্যভিচারবিবর্জিতং উৎকোচাদিবিমুখং অধীতব্যবহারং ব্যবহার শাস্ত্রবিশারদং খ্যাতং কীর্ত্তিমন্তং মৌলং মূলাদাগতং কুলক্রমাগতমিত্যর্থঃ।

বিপশ্চিতং পণ্ডিতং অর্থস্য উৎপাদকং আয়বৃদ্ধেরুপায়জ্ঞং মন্ত্রিণং সচিবং সম্যক্ সাধু যথা তথা নিদধ্যাৎ নিযোজয়েৎ (নি+ধা+বিধিলিঙ্ যাৎ)।

প্রস্থাপ্যতাম্ = প্রেষ্যতাম্ (প্র+স্থা+ণিচ্+লোট্ তাম্)।

দৌত্যেন = দূতস্য কর্ম্ম তেন দূতকর্ম্মণা ।

(১৩) নেতি। ক্বচিৎ কুত্রচিদপি দুর্জ্জনেন সমং সহ ন স্থাতব্যং ন গন্তব্যং। কাকস্য (দুর্জনস্যেতিভাবঃ) সঙ্গাৎ কাকেন সহেত্যর্থঃ তিষ্ঠন্ হংসঃ গচ্ছন্ বর্ত্তকঃ তদাখ্যয়া প্রসিদ্ধঃ পক্ষিবিশেষঃ (ভারুই) হতঃ বিনাশিতঃ।

প্রান্তরে = অরণ্যে ।

ক্ষণান্তরে = মুহূর্ত্তমধ্যে।

মুখব্যাদানং = জৃম্ভনার্থং মুখবিস্তারং।

স্বভাবদৌর্জন্যেন = নিসর্গধূর্ত্ততয়া।

অসহিষ্ণুঃ = অসহমানঃ (সহ্ + ইষ্ণুঃ) ।

পুরীষোৎসর্গং = মলত্যাগং।

(১৪) ত্যজেতি। দুর্জ্জনসংসর্গং ত্যজ সাধুসমাগমং সজ্জনসঙ্গতিং ভজ প্রার্থয়স্ব। অহোরাত্রং রাত্রিন্দিবং ব্যাপ্য পুণ্যং কুরু অনিত্যতাং অসারতাং জীবনস্যেতি শেষঃ স্মর চিন্তয় গৃহীত ইব কেশেষু মৃত্যুনা ধর্ম্ম মাচরে-দিত্যুক্তেঃ সততং পুণ্যসঞ্চয়ং কুরু ইত্যর্থঃ।

একাকথা……কথা = স্থিতেঃ দুর্জনেন সহবাসস্য একা কথা উদাহরণকথা গমনস্য দুর্জনেন সহ গমনস্য কথা উদাহরণকথা দ্বিতীয়া।

যাত্রাপ্রসঙ্গেন = উৎসবব্যাপারক্রমেণ।

মন্দগতিঃ = মন্দা মন্থরা গতির্যস্য সঃ মন্থরগতিঃ।

(১৫) দুর্জনৈরিতি। সস্মিতানি স্মিতপূর্ব্বাণি প্রিয়াণি মধুরাণি অপি দুর্জ্জনৈঃ খলৈঃ উচ্যমানানি কথ্যমানানি বচনানীতি শেষঃ অকালকুসুমানি অসময়জাতানি পুষ্পাণীব মে ভয়ং সঞ্জনয়ন্তি উৎপাদয়ন্তি। অকালকুসুমো-দ্গমেন বৃক্ষাণামুৎপাদিকাশক্তি র্ব্যাহন্যতে ইতি প্রসিদ্ধিঃ।

বাগ্ব্যাপারাৎ = বচনরীত্যৈব।

নিদানং = মূলং।

যথাব্যবহারং = যথাযোগ্যং।

অনুসন্ধীয়তাম্ = নিরূপ্যতাম্ (অনু + সম্ + ধা + লোট্ তাম্ ভাবে)

(১৬) শতমিতি। শতং বহুসংখ্যকমপ্যাত্মন ইষ্টমিত্যর্থঃ দদ্যাৎ উপেক্ষেত ন বিবদেৎ বিবাদং কুর্য্যাৎ জন ইতি শেষঃ ইতি এতৎ বিজ্ঞস্য বিদুষঃ মতং। হেতুং কারণং বিবাদস্যেতি শেষঃ বিনাঽপি দ্বন্দ্বং বিবাদঃ মূর্খস্য লক্ষণং চিহ্নং। মূর্খাঃ কারণমন্তরেণাঽপি বিবাদং ঘটয়ন্তীত্যর্থঃ।

অতীতোপালম্ভেন = অতীতকার্য্যনিন্দয়া।

প্রস্তুতমনুসন্ধীয়তাম্ = প্রকৃত মনুসর্য্যতাম্।

অস্মন্নিযোগিনঃ প্রেরণয়া = অস্মাক মধিকৃতস্য কস্যচিৎ মন্ত্রণয়া।

(১৭) বৈদ্যানামিতি। আতুরঃ রুগ্নো জনঃ বৈদ্যানাং চিকিৎসকানাং শ্রেয়ান্ শ্রেয়স্করঃ যো নৃপঃ ব্যসনী দ্যূতপানাদ্যসক্তঃ স নিয়োগিনাং ভৃত্যানাং শ্রেয়ানিতি শেষঃ। মূর্খঃ কার্য্যসন্দিগ্ধঃ বিদুষাং জীবনং সদুপদেশগ্রহণেন জীবিকালাভহেতুঃ। সদ্বন্দ্বঃ বিরোধযুক্তো জনঃ প্রজা নৃপতেঃ জীবনমিত্যনুষঙ্গঃ।

প্রণিধিঃ = গূঢ়চরঃ।

(১৮) ভবেদিতি। মহীভর্ত্তুঃ রাজ্ঞঃ স্বপররাষ্ট্রাণাং কার্য্যাকার্য্যাবলোকনে কর্ত্তব্যাকর্ত্তব্যাবধারণে চারঃ চরঃ প্রণিধিরিতি যাবৎ সএব চক্ষুঃ চারচক্ষুঃ ভবেৎ। রাজানোহি দূতমুখাদুপশ্রুত্য কর্ত্তব্যমবধারয়ন্তীত্যর্থঃ। যস্য রাজ্ঞঃ নাস্তি চারচক্ষুরিতি শেষঃ স এব অন্ধঃ কর্ত্তব্যাবধারণাসমর্থ ইত্যর্থঃ।

(১৯) ষট্‌কর্ণ ইতি। মন্ত্রঃ ষট্ কর্ণাঃ শ্রবণসাধনানি যস্য সঃ ত্রিভিঃ শ্রুত ইত্যর্থঃ তথা বার্ত্তয়া কথাপ্রসঙ্গেন প্রাপ্তঃ অন্যেন অবগতশ্চ সন্নিত্যর্থঃ ভিদ্যতে (ভিদ্ + লট্‌তে কর্ম্মকর্ত্তরি) প্রকাশ্যতে ইতি হেতোঃ মহীভৃতা রাজ্ঞা আত্মনা আপ্তেন দ্বিতীয়েন কার্য্যসহায়েন সহ মন্ত্রঃ কার্য্যঃ কর্ত্তব্যঃ।

কৃতাবাসে = কৃতঃ আবাসঃ বাসস্থানং তস্মিন্।

বিধিঃ = বিধেয়ঃ। বিধীয়তে ইতি (বি + ধা + কিঃ কর্ম্মণি)

(২০) সাম্নেতি। সাম্না সন্ধিনা দানেন বিষয়াদিত্যাগেন ভেদেন তদনুযায়িনাং রাজ্যার্থিনাং সন্ধিভঙ্গেন এতৈঃ সমস্তৈঃ যুগপৎ প্রযুক্তৈঃ অথবা পৃথক্

ব্যস্তৈঃ ত্রিভিরুপায়ৈঃ অরীন্ শত্রূন্ সাধিতুং বশীকর্ত্তুং বিজেতুমিতি যাবৎ প্রযতেত চেষ্টেত যুদ্ধেন উপায়েন কদাচন ন প্রযতেতেতি শেষঃ।

(২১) সর্ব ইতি। হি যতঃ অনাসাদিতঃ অপ্রাপ্তঃ বিগ্রহঃ যেন স তথোক্তঃ সর্ব্ব এব জনঃ শূরঃ শূরম্মন্যঃ ভবতীতি শেষঃ। অদৃষ্টং অজ্ঞাতং অপরীক্ষিতমিতি যাবৎ পরস্য সামর্থ্যং বলং যেন স তথোক্তঃ কো জনঃ সদর্পঃ সগর্বিতঃ ন ভবেৎ অপিতু সর্বএব।

(২২) কৌর্ম্মমিতি। নীতিজ্ঞঃ নীতিবিৎ জনঃ কৌর্ম্মং কূর্ম্মসম্বন্ধিনং কূর্ম্মস্য মুখসঙ্কোচমিবেত্যর্থঃ সঙ্কোচং অন্তশ্চেষ্টতামিত্যর্থঃ। আস্থায় অবলম্ব্য প্রহার মপি মর্ষয়েৎ সহেত তু কিন্তু প্রাপ্তঃ কালঃ বৈরনির্যাতনাবসরঃ যেন স তথাভূতঃ সন্ ক্রূরসর্পঃ তীক্ষ্ণবিষঃ সর্প ইব উত্তিষ্ঠেৎ আচরেৎ তেজ উৎসৃজেদিত্যর্থঃ।

দুর্গানুসন্ধানে = দুর্গনির্ম্মাণস্থাননিরাকরণে।

(২৩) য ইতি। যো জনঃ যত্র যস্মিন্ কার্য্যে কর্ম্মণি কুশলঃ নিপুণঃ তং জনং তত্র কার্য্যে বিনিযোজয়েৎ। যঃ কার্য্যে অদৃষ্টকর্ম্মা অকুশলঃ সঃ শাস্ত্রজ্ঞঃ বিদ্বান্ অপি বিমুহ্যতি প্রমাদ্যতি (বি + মুহ + লট্ তি)

বহুদৃশ্বা = বহুদর্শী (বহু + দৃশ্ + ক্বনিপ্)

সংগ্রাহ্যঃ = সংগ্রহণীয়ঃ।

(২৪) আত্মপক্ষেতি। যঃ আত্মনঃ পক্ষঃ তস্য পরিত্যাগ স্তস্মাৎ স্বপক্ষং বিহায় (যবর্থে পঞ্চমী) পরপক্ষে শত্রুপক্ষে রতঃ ভবতীতি শেষঃ স মূঢ়ঃ মন্দ মতি র্জনঃ নীলবর্ণশৃগালবৎ পরৈঃ শত্রুভিঃ হন্যতে বধ্যতে।

নীলসন্ধানভাণ্ডে = নীলরসস্থাপনপাত্রে।

উৎকর্ষং = শ্রেষ্ঠতাং প্রাধান্যমিতি যাবৎ।

সাধয়ামি = সম্পাদয়ামি।

সর্ব্বৌষধিরসেন = সর্ব্বৌষধিঃ অভিষেকদ্রব্যবিশেষঃ তস্য রসঃ জলং তেন।

ব্যবহারঃ = ঋণাদ্যষ্টাদশবিবাদপদানাং বিচারঃ।

অনীতিজ্ঞেন = নীতিশাস্ত্রানভিজ্ঞেন অপরিণামদর্শিনেতি যাবৎ।

মর্ম্মজ্ঞাঃ = গৃহচ্ছিদ্রস্য পরিজ্ঞাতারঃ।

পরিভূতাঃ = অবমানিতাঃ।

বর্ণমাত্রবিপ্রলব্ধাঃ = নীলবর্ণমাত্রেণ প্রতারিতাঃ। নীলবর্ণং দৃষ্ট্বা শৃগালোঽয়মিতি ন বুবুধিরে ইত্যর্থঃ।

পরিচীয়তে = প্রত্যভিজ্ঞায়তে শৃগালোঽয়মিতি নিশ্চীয়তে ইত্যর্থঃ (পরি + চি + লট্ তে কর্ম্মণি)

মহারাবম্ = মহান্ রাবঃ (রু + ঘ্ঞ) তম্ মহাশব্দম্।

(২৫) ছিদ্রমিতি। নিজঃ আত্মীয়ঃ সন্নিত্যর্থঃ রিপুঃ শত্রুঃ ছিদ্রং রন্ধ্রং মর্ম্ম রহস্যং বীর্য্যং পরাক্রমং চ এতৎ সর্ব্বং বেত্তি অন্তর্গতঃ অন্তর্লীনঃ অনলঃ অগ্নিঃ শুষ্কবৃক্ষমিব দহতি চ।

স্থানান্তরং পরিচিন্তয় = অন্যৎ স্থানং নিরূপয়।

গলহস্তয়তি = গলহস্তং করোতি গ্রীবায়াং হস্তং দত্ত্বা নিঃসারয়তি।

(২৬) নেতি যত্র যস্যাং সভায়াং বৃদ্ধাঃ বিদ্যয়া বয়সা চ প্রবীণাঃ জনাঃ ন সন্তি ন বিদ্যন্তে সা ন সভা বিজ্ঞসভাসু পরিগণনীয়া। যে চ বৃদ্ধাঃ ধর্ম্মং নীতিং ন বদন্তি ন উপদিশন্তি তে ন বৃদ্ধাঃ বৃদ্ধত্বেন পরিগণিতাঃ। যত্র যস্মিন্ ধর্ম্মে সত্যং নাস্তি স নো ন ধর্ম্মঃ যচ্চ ভয়ং অভ্যুপৈতি (অভি + উপ + ই + লট্ তি) প্রাপ্নোতি তৎ ন সত্যং।

দুর্গশোধনং = দুর্গপরীক্ষণং কশ্চিদ্বিপক্ষো দুর্গে গূঢ়মাতিষ্ঠতে ন বেতি পর্য্যবেক্ষণম্।

(২৭) স্বাপকর্ষমিতি। কো জনঃ দূতোক্তৈঃ দূতবচনৈঃ স্বস্য অপকর্ষন্তং আত্মলাঘবং পরোৎকর্ষং পরস্য গৌরবঞ্চ মন্যতে ন কোঽপীত্যর্থঃ। দূতঃ সদৈব নিত্যকালং অবধ্যভাবেন বধানর্হত্বাৎ হি নিশ্চিতং সর্ব্বং জল্পতি প্রলপতি অকুতোভয়েন সর্ব্বং বক্তুং ক্ষম ইত্যর্থঃ।

প্রকৃতি মাপন্নঃ = শান্তিং প্রাপ্তঃ।

সংপ্রেষিতঃ = প্রেরিতঃ।

শিষ্টান্ = সভ্যান্ বিদুষো মন্ত্রসহায়ানিত্যর্থঃ।

ব্যসনিতয়া = অত্যারূঢ়েনাসঙ্গেন।

(২৮) ভূমিরিতি। ভূমিঃ স্থানলাভঃ মিত্রং সহায়লাভঃ হিরণ্যং সুবর্ণং

অর্থাগমইত্যর্থঃ ইতি ত্রয়ং বিগ্রহস্য ফলং। এবং সতি যদা যস্মিন্ কালে এতৎ ত্রয়ং নিশ্চিতং স্থিরং ভাবি (ভূ+ণিন্) ভবিষ্যতি তদা বিগ্রহঃ কর্ত্তব্যঃ কার্য্যঃ।

উপযোগঃ = যোগ্যত্বং কার্য্যক্ষমত্বমিতি যাবৎ।

মৌহূর্ত্তিকঃ = দৈবজ্ঞঃ শুভাশুভলগ্নজ্ঞ ইতিযাবৎ। মুহূর্ত্তং বেত্তীতি (মুহূর্ত্ত + ষ্ণিকঃ)

বিদধাতু = নিরূপয়তু ।

মা কৃথাঃ = মা কুরু (মাযোগেলুঙ্)

বিজিগীষঃ = বিজেতুমিচ্ছুঃ বিজয়াকাঙ্ক্ষী (বি+জি+সন্+উঃ)

পরভূমিং = পরকীয়ং রাজ্যং ।

(২৯) কিমিতি। অননুষ্ঠানে অসম্পাদনে সতি শাস্ত্রেণেবেতি শাস্ত্রবৎ শাস্ত্রজ্ঞানেনেবেত্যর্থঃ পৃথিবীপতেঃ রাজ্ঞঃ মন্ত্রেণ কিং কিং ফলং ন কিমপীত্যর্থঃ। অত্রোদাহরণমাহ ঔষধপরিজ্ঞানাৎ অনেনৌষধেনায়ং রোগঃ প্রতিক্রিয়তে ইত্যেতাবন্মাত্রজ্ঞানাদেব কিং ব্যাধেঃ রোগস্য শান্তিঃ উপশমঃ প্রতীকার ইতি যাবৎ ভবেৎ ন কদাচিদপীতি ভাবঃ। যথা ঔষধপরিজ্ঞানমাত্রেণ ন রোগোপশমো ভবেৎ তদ্বৎ মন্ত্রমাত্রেণ ন কার্য্যসিদ্ধিঃ সম্ভবেদিত্যর্থঃ।

অনতিক্রমণীয়ঃ = অনুল্লঙ্ঘনীয়ঃ সর্বথা অনুসরণীয় ইত্যর্থঃ।

(৩০) নদ্যদ্রীতি। হে নৃপ রাজন্ নদ্যদ্রিবনদুর্গেষু যত্র যত্র যেষু যেষু স্থানেষু ভয়ং বিদ্যতে তত্র তত্র তেষু তেষু স্থানেষু সেনাং নয়তীতি সেনানীঃ সেনাপতিঃ ব্যূহীকৃতৈঃ বিন্যস্তৈঃ যথাস্থানং স্থাপিতৈরিতি যাবৎ বলৈঃ সহ যায়াৎ গচ্ছেৎ।

মৌহূর্ত্তিকাবেদিতলগ্নে = মৌহূর্ত্তিকেন দৈবজ্ঞেন আবেদিতঃ নিরূপ্য উক্তঃ লগ্নঃ তস্মিন্। যাত্রায়ৈ শুভে লগ্নে ইত্যর্থঃ।

প্রণিধিপ্রহিতঃ = প্রণিধিনা গূঢ়চরেণ প্রেরিতঃ।

সমাবাসিতকটকঃ = সমাবাসিতঃ সন্নিবেশিতঃ কটকঃ শিবিরঃ যেন স তথোক্তঃ কৃতশিবিরসন্নিবেশঃ।

বিশ্বাসকথাপ্রসঙ্গেন = বিশ্রম্ভালাপক্রমেণ ।

ঈঙ্গিতং= মনোগতং রহস্যং।

অভিভবায়=পরাজয়ায় শাসনায়েতি যাবৎ।

(৩১) পরইতি। হিতবান্ হিতকারী পরঃ শত্রুরপি বন্ধুঃ মিত্রং অহিতঃ অনিষ্টকারী বন্ধুঃ সন্নপি পরঃ শত্রুঃ ভবতীতি শেষঃ। অত্র দৃষ্টান্তমাহ দেহজঃ শরীরজঃ ব্যাধিঃ পীড়া অহিতঃ অনিষ্টকারী প্রাণনাশক ইতি যাবৎ। আরণ্যং অরণ্যজাতং ঔষধং ভেষজং হিতং হিতকরং রোগপ্রতীকারকমিত্যর্থঃ।

(৩২) আসীদিতি। শূদ্রকস্য মহীপতেঃ রাজ্ঞঃ বীরবরো নাম সেবক আসীৎ স স্বল্পকালেন অচিরেণ স্বল্পদিনং যাবৎ নিযুক্তঃ সন্নিত্যর্থঃ আত্মনঃ সুতং পুত্রং দদৌ স্বামিহিতার্থং দেব্যৈ উপহারং দদৌ।

বর্ত্তনার্থী=বর্ত্তনং ভৃতিং বেতন মিতি যাবৎ অর্থয়তে যঃ সঃ তথোক্তঃ। জীবিকার্থং রাজকর্ম্মণি প্রবেষ্টুকামঃ।

সুবর্ণশতচতুষ্টয়ং=সুবর্ণমুদ্রাশতচতুষ্টয়ম্।

সামগ্রী=উপযোগিতা যোগ্যতেতি যাবৎ।

স্বরূপং=উপযুক্তত্বং।

তাম্বূলং দত্ত্বা=রাজকর্তৃকতাম্বূলদানং নিয়োগলক্ষণং প্রসিদ্ধং।

বর্ত্তনবিনিয়োগঃ=বর্ত্তনস্য জীবিকার্থং লব্ধস্য দ্রব্যস্য বিনিয়োগঃ যথাযথং বিভাগেনার্পণম্।

ক্রন্দনানুসরণং=শব্দানুসারেণ গত্বা ক্রন্দনকারণনিরূপণমিত্যর্থঃ।

সূচীভেদ্যে তমসি=সূচীভেদ্যে অতিনিবিড়ে অতিগাঢ়ে ইতি যাবৎ। তমসি অন্ধকারে।

দেব্যাঃ=মহিষ্যাঃ দেবী কৃতাভিষেকায়া মিত্যমরঃ।

দ্বাত্রিংশল্লক্ষণোপেতস্য=মহাপুরুষলক্ষণোপেতস্য তদুক্তং সামুদ্রিকে পঞ্চ সূক্ষ্মঃ পঞ্চ দীর্ঘঃ সপ্ত রক্তঃ ষড়ুন্নতঃ। ত্রিহ্রস্বপৃথুগম্ভীরো দ্বাত্রিংশল্লক্ষণো মহান্।

শতায়ুঃ=শতং শতবর্ষং আয়ুঃজীবনকালঃ যস্য সঃ দীর্ঘজীবী।

বিনিয়োগঃ=সমর্পণং।

সর্বমঙ্গলায়তনং=সর্বমঙ্গলায়া মন্দিরং।

বিড়ম্বনং = নিষ্ফলং বৃথা।

তদনুষ্ঠিতং = স্বশির শ্চিচ্ছেদেত্যর্থঃ।

(৩৩) জীবন্তীতি। মমেব বিধা প্রকারো যেষাং তে মদ্বিধাঃ মাদৃশাঃ ক্ষুদ্রজন্তবঃ লঘুচিত্তাঃ প্রাণিনঃ জীবন্তি প্রাণান্ ধারয়ন্তি ম্রিয়ন্তে চ পঞ্চত্বং যান্তি চ। লোকে জগতি অনেন সদৃশঃ বীরবরেণ তুল্যঃ জনঃ ন ভূতঃ ন জাতঃ ন ভবিষ্যতি ন উৎপৎস্যতে।

এতৎপরিত্যক্তেন = বীরবরসদৃশমহাপুরুষশূন্যেন।

উল্লসিতঃ = স্বশিরশ্ছেদনায় উদ্ধৃতঃ।

সাহসেন = অসমীক্ষ্যকারিতয়া ক্ষিপ্রকারিত্বেনেতি যাবৎ।

যথাপ্রাপ্তাংগতিং = যথোপস্থিতাং শিরশ্ছেদনরূপাং অবলম্বিতামিতি যাবৎ গতিং উপায়ম্।

সত্ত্বোৎকর্ষেণ = মহত্ত্বাতিশযোন।

কথং ……মহাসত্ত্বঃ = মহাসত্ত্বঃ শুদ্ধান্তঃকরণঃ কথং কেন প্রকারেণ শ্লাঘ্যতাং প্রশস্যতাং। যদেবাহং প্রশংসামি ততোঽপ্যধিকমস্মিন্ যুজ্যতে ইতি ভাবঃ।

(৩৪) প্রিয়মিতি। অকৃপণঃ দানশীলঃ প্রিয়ং প্রীতিপ্রদং বচনং ব্রূয়াৎ মধুরসম্ভাষণপূর্ব্বকং দদ্যাদিত্যর্থঃ। শূরঃ প্রভূতবলবিক্রমসম্পন্নঃ সন্নপীত্যর্থঃ অবিকত্থনঃ অনাত্মশ্লাঘাপরঃ স্যাৎ ভবেৎ দাতা সন্ সৎপাত্রবর্ষী গুণশালিনি জনে দানশীলঃ স্যাৎ প্রগল্ভঃ সাহসী স্পষ্টবক্তা বা সন্নপি অনিষ্ঠুরঃ হিংসা-বিরতঃ অনিষ্ঠুরভাষী বা স্যাৎ। ন ব্রূয়াৎ সত্যমপ্রিয়মিতি ভাবঃ।

শিষ্টসভাং = পণ্ডিতসভাম্।

প্রস্তুত্য = বিজ্ঞাপ্য (প্র + স্তু + যপ্)

(৩৫) পুণ্যাদিতি। যৎ বস্তু একেন জনেন পুণ্যাৎ শুভাদৃষ্টবশেন লব্ধং প্রাপ্তং মম অপি তৎ বস্তু ভবিষ্যতি লব্ধং ভবিষ্যতীত্যর্থঃ ইত্যবধারণং ন কর্ত্তব্যমিতি শেষঃ। যতঃ মোহাৎ লোভান্ধতয়া নিধিং ধনং অর্থয়তে যঃ সঃ তথোক্তঃ ধনতৃষ্ণাতুরঃ নাপিতঃ কশ্চিৎ ক্ষৌরকারঃ ভিক্ষুং হত্বা মৃতঃ পঞ্চত্বং-গতঃ।

ক্ষীণপাপঃ=ক্ষীণং পাপং যস্য সঃ তথোক্তঃ। তপোবলেন নিষ্পাপঃ।

যক্ষেশ্বরেণ=ত্র্যম্বকসখেন ধনপতিনা কুবেরেণ।

(৩৬)লুব্ধইতি। লুব্ধঃ লোভপরবশঃ ক্রূরঃ খলঃ অবশঃ অজিতেন্দ্রিয়ঃ অসত্যঃ বঞ্চনাপরঃ প্রমাদী কার্য্যেষু অনবহিতঃ ভীরুঃ সাহসহীনঃ অস্থিরঃ চপলঃ মূঢ়ঃ মন্দমতিঃ যোধানাং সৈনিকানাং অবমন্তা (অব+মন্+তৃণ্) অবজ্ঞাকারী রিপুঃ শত্রুঃ সুখেন ছেদ্যঃ সুখচ্ছেদ্যঃ অনায়াসেনোন্মূলয়িতুং শক্যঃ স্মৃতঃ কথিতঃ পণ্ডিতৈরিতি শেষঃ।

দুর্গাবরোধং=দুর্গাক্রমণং।

(৩৭)। দক্ষইতি। দক্ষঃ কার্য্যকুশলঃ শ্রিয়ং লক্ষ্মীং সম্পদমিতি যাবৎ অধিগচ্ছতি প্রাপ্নোতি পথ্যং পুষ্টিকরং ভোজ্যং অশ্নাতি যঃ সঃ তথোক্তঃ মিতাহারী কল্যতাং নিরাময়ত্বং নীরোগিত্ব মিতি যাবৎ অধিগচ্ছতি ইত্যনেনান্বয়ঃ এবং উত্তরত্রাঽপি যোজ্যং। অরোগী নীরুজঃ সুখং উদ্যোগী উৎসাহবান্ বিদ্যান্তং বিদ্যাসু পারদর্শিতাং বিনীতঃ বিনয়সম্পন্নঃ অনুদ্ধত ইতি যাবৎ ধর্ম্মার্থযশাংসি চ।

সাহসৈকরসিকেন=সাহসমাত্রাবলম্বিনা সতেত্যর্থঃ।

উপন্যস্তেষু=প্রস্তুতেষু কথিতেষু।

নীতিশাস্ত্রকথাকৌমুদীং=নীতিশাস্ত্রস্য কথা সৈব কৌমুদী জ্যোৎস্না তাম্। সংশয়ান্ধকারনিরাসকত্বাৎ নীতিশাস্ত্রকথায়াঃ কৌমুদীত্বমুক্তং।

বাগুল্কাভিস্তিমিরয়তি=বাচ উল্কাঃ অগ্নিশিখা ইব তাভিঃ। তিমিরয়তি আচ্ছাদয়তি।

(৩৮) যস্যেতি। যস্য জনস্য স্বয়ং আত্মনঃ প্রজ্ঞা বুদ্ধিঃ নাস্তি ন বিদ্যতে তস্য জনস্য শাস্ত্রং কিং করোতি তস্মৈ উপদেশো বিফল এবেত্যর্থঃ। লোচনাভ্যাং নেত্রাভ্যাং বিহীনস্য (বি+হা+ক্তঃ) শূন্যস্য অন্ধস্যেত্যর্থঃ দর্পণঃ কিং করিষ্যতি ন কিমপীত্যর্থঃ।

(৩৯) মন্ত্রিণামিতি। ভিন্নস্য পরস্য সন্ধানে চেষ্টাদিনা ভাবজ্ঞানে মন্ত্রিণাং কার্য্যসহায়ানাং সন্নিপাতকে বাতপিত্তশ্লেষ্মণাং বৈষম্যোৎপাদকে বিকারে ভিষজাং বৈদ্যানাং চ চিকিৎসকানামিতি যাবৎ প্রজ্ঞা বুদ্ধিঃ কর্ম্মণা যথাযথং সামাদিকর্ত্তব্যোপদেশেন যথৌষধিপ্রয়োগেন চ ব্যজ্যতে প্রকাশ্যতে

ইতরগতবুদ্ধে স্তদনু গুণপ্রয়োগেনৈব অনুমীয়তে নান্যথেত্যর্থঃ সুস্থে ব্যাপার-শূন্যে বিষয়ে কঃ জনঃ ন পণ্ডিতঃ অপিতু সৰ্ব্বএব পণ্ডিতম্মন্যোভবতীত্যর্থঃ।

বিজিগীষোঃ = বিজেতুমিচ্ছুঃ বিজিগীষুঃ (বি + জি + সন্ + উঃ) তস্য বিজেতুকামস্য অদীর্ঘসূত্রতা অচিরক্রিয়তা ক্ষিপ্রকারিতেতি যাবৎ বিজয়সিদ্ধেঃ বিজয়লাভস্য অবশ্যম্ভাবঃ মুখ্যোপায়ঃ।

বচনোপষ্টম্ভাৎ = বচনাবলম্বনাৎ বচনমনুস্থত্যেত্যর্থঃ।

সারাসারবিচারঃ = বলাবলনিরূপণং কে বা মহাবলাঃ কে বা হীনবলা ইতি নিরাকরণ মিত্যর্থঃ।

প্রসাদদানং = পুরস্কারপ্রদানং।

কার্পণ্যং = কৃপণতাং।

স্বভটাঃ = স্বস্য আত্মনঃ ভটাঃ যোদ্ধৃপুরুষাঃ।

আনৃণ্যং = অনৃণস্য ভাবঃ আনৃণ্যং ঋণমুক্তিং।

মহাহবং = মহান্ আহবঃ যুদ্ধং মহাহবং তুমুলসংগ্রামং।

পরেদ্যুঃ = পরস্মিন্ অহনি (পর + এদ্যুঃ)

অহংদেব........প্রবিশতু শক্রঃ = মাংসঞ্চ অসৃক্ চ মাংসাসৃজী তাভ্যাং লিপ্তং মিশ্রিতং তেন। যাবদ্দেহে প্রাণা ধরিষ্যন্তি তাবৎ যোৎস্যে ইতি ভাবঃ।

(৪০) যদীতি। যদি সমরং যুদ্ধং অপাস্য (অপ + অস্ + যপ্) বিহায় যুদ্ধাৎ বিরতস্যেত্যর্থঃ। মৃত্যো র্ভয়ং নাস্তি ন বিদ্যতে ইতি এতাবান্ নিশ্চয় ইতিশেষঃ তর্হি ইতঃ দুর্গাৎ অন্যত্র অন্যস্মিন্ স্থানে প্রয়াতুং গন্তুং যুক্তং উচিতং। অথ যদি জন্তোঃ প্রাণিনঃ মরণং অবশ্যমেব নিশ্চিতমেব মৃত্যো নিয়তে সতীত্যর্থঃ কিমিতি কথং মুধা বৃথা যশঃ মলিনং ক্রিয়েত নৈতদুচিতং বীরাণামিতি ভাবঃ।

খরতরনখাঘাতঃ = তীক্ষ্ণনখপ্রহারঃ।

জর্জরীকৃতেন = ক্ষতবিক্ষতেন।

সম্ভূয় = মিলিত্বা।

(৪১) জনয়ন্তীতি। গাবঃ সৰ্ব্বানেব গবাকৃতীন্ সুতান্ জনয়ন্তি উৎ-পাদয়ন্তি কিন্তু তেষু ইতি শেষঃ বিষাণোল্লিখিতস্কন্ধং বিষাণেন সমুন্নতেন

শৃঙ্গেণ উল্লিখিতঃ স্পৃষ্টঃ স্কন্ধঃ অংশঃ যস্য স তথোক্তং গবাং পতিং মহোক্ষং কঞ্চিদেব বহুষু একমেব জনয়ন্তীত্যনেনান্বয়ঃ।

সত্ত্বক্রীতান্=সত্ত্বেন বলেন ক্রীতান্।

বিদ্যাধরীপরিজনঃ=বিদ্যাধরাঙ্গনাভির্বেষ্টিতঃ।

(৪২) বিগ্রহ ইতি। মহীভৃতাং রাজ্ঞাং করিতুরঙ্গপত্তিভিঃ হস্ত্যশ্বপাদাতৈঃ বিগ্রহঃ যুদ্ধং কদাহপি নো ভবতাং ন ভবতু (আত্মনেপদ মিচ্ছন্তি পরস্মৈপদিনাং কৃচিদিত্যাত্মনেপদং) তর্হি কথং শত্রবো নিরসনীয়া ভবেয়ুরিত্যত আহ দ্বিষঃ শত্রবঃ নীতীনাং রাজনীতীনাং মন্ত্রা এব পবনা বায়বঃ তৈঃ সমাহতাঃ অভিভূতাঃ সন্তঃ গিরিগহ্বরং গিরিগুহাং আশ্রয়ন্ত মন্ত্রপ্রভাবাৎ সামাদ্যুপায়বলেনৈব শত্রবঃ পরিভূতাঃ পলায়িষ্যন্তে ইত্যর্থঃ।

ইতি হিতোপদেশটীকায়াং দীপিকাসমাখ্যায়াং তৃতীয়ঃ কথাসংগ্রহঃ।

সন্ধিঃ।

বৃত্তে ইতি। রাজ্ঞোঃ হিরণ্যগর্ভচিত্রবর্ণয়োঃ মহতি তুমুলে সংগ্রামে যুদ্ধে বৃত্তে জাতে সতি স্থেয়াভ্যাং বিবাদনির্ণেতৃভ্যাং (স্থেয়ো বিবাদস্থানস্য নির্ণেতরীতি মেদিনী) গৃধ্রচক্রাভ্যাং গৃধ্রচক্রবাকাভ্যাং মন্ত্রিভ্যাং বাচা করণেন সন্ধিঃ কৃতঃ ঘটিতঃ।

পারকোণ=পরকীয়েণ কেনচিজ্জনেন দেশান্তরাদাগতেন কেনচিৎ বিপক্ষপ্রেরিতেনেতি যাবৎ।

(২) অপরাধইতি। সঃ অপরাধঃ বিপক্ষপ্রেরিতে মেঘবর্ণে বিশ্বাসরূপঃ দোষঃ দৈবস্য বিধেঃ। বিধিনিগ্রহবশাদেব ময়া মেঘবর্ণে বিশ্বাসঃ কৃত ইত্যর্থঃ। পুনঃ কিন্তু মন্ত্রিণাং সচিবানাং ন অপরাধ ইতি শেষঃ। যত্নাৎ মহতা যত্নেন সুঘটিতং সুসম্পাদিত মপীত্যর্থঃ কার্য্যং দৈবযোগাৎ দৈবদুর্বিপাকবশতঃ বিনশ্যতি ধ্বংসতে।

(৩) বিষমামিতি। অপণ্ডিতঃ অবিবেকী নরঃ বিষমাং সঙ্কটপূর্ণাং দশাং অবস্থাং প্রাপ্য সঙ্কটে পতিত্বা দৈবং বিধিং ভাগ্যমিতি যাবৎ গর্হয়তে নিন্দতি। তু কিন্তু আত্মনঃ স্বস্য কর্ম্মদোষান্ কর্ম্মণঃ কার্য্যস্য দোষাঃ অবিমৃষ্যকারিতাদয়ঃ তান্ নৈব জানাতি মন্যতে।

(৪) সুহৃদামিতি। হিতং কাময়ন্তে যে তে তেষাং হিতৈষিণাং সুহৃদাং বন্ধূনাং বাক্যং বচনং যঃ জনঃ ন অভিনন্দতি ন আদ্রিয়তে ন অনুসরতীতি যাবৎ স দুর্বুদ্ধির্জনঃ কাষ্ঠাৎ ভ্রষ্টঃ পতিতঃ কূর্ম্ম ইব বিনশ্যতি মৃত্যুং প্রাপ্স্যতি।

দৃষ্টব্যতিকরোঽহমত্র = অত্র অস্মিন্ সরসি। দৃষ্টঃ প্রত্যক্ষীকৃতঃ ব্যতিকরঃ ব্যসনং যেন স তথোক্তঃ। অত্রাবস্থায় কশ্চিদ্দীর্ঘসূত্রী ব্যসনং গতঃ তন্ময়া দৃষ্টমিত্যর্থঃ।

(৫) অনাগত ইতি। অনাগতস্য অনুপস্থিতস্য ব্যসনস্য বিধাতা প্রতিবিধানকর্ত্তা বিপৎপাতাৎ পূর্বং তৎপ্রতিকর্ত্তেত্যর্থঃ। প্রত্যুৎপন্না কার্য্যকালে উপস্থিতা মতিঃ বুদ্ধির্যস্য সঃ তথোক্তঃ এতৌ দ্বৌ মৎস্যৌ সুখং এধেতে বর্দ্ধেতে সুখেন কালং অতিবাহয়ত ইত্যর্থঃ। যদ্ভবিষ্যঃ যৎ ভবিষ্যতি তদ্ভবিষ্যত্যেব ইতি জ্ঞানং যস্য সঃ দৈবপরায়ণঃ কশ্চিৎ মৎস্যঃ বিনশ্যতি মৃতঃ।

(৬) যদিতি। যৎ অভাবি অবশ্যমঘটনীয়ং তৎ ন ভাবি (ভূ+ণিন্) ন ঘটিষ্যতে এব ভাবি চেৎ ঘটনীয়ং চেৎ যদি তদন্যথা ন ভবেদিতিশেষঃ। কোহি দৈবস্য দ্বারাণি পিধাতুমিষ্টে ইতি ভাবঃ। ইতি এতৎ মন্ত্বেত্যর্থঃ চিন্তা বিষমিব তৎ হন্তীতি চিন্তাবিষঘ্নঃ চিন্তানাশকঃ নাস্তি গদো যস্মাৎ স অগদঃ ঔষধং কিং ন পীয়তে সেব্যতে।

(৭) উপায়মিতি। তু কিন্তু প্রাজ্ঞঃ বুদ্ধিমান্ জনঃ উপায়ং চিন্তয়ন্ সন্ অপায়ং অনিষ্টং চিন্তয়েৎ। পশ্যতঃ সাক্ষাদবলোকয়তঃ বকমূর্খস্য মূর্খস্য বকস্য সমক্ষমেবেত্যর্থঃ নকুলৈঃ সুতাঃ শাবকাঃ ভক্ষিতাঃ।

ন্যগ্রোধপাদপে = পাদৈ মূলৈঃ রসান্ পিবতীতি পাদপঃ ন্যগ্রোধঃ পাদপঃ তস্মিন্। বটতরৌ।

গোরক্ষাঃ = গোপালাঃ।

পরুষবচনং = কর্কশবাক্যং।

বিস্মৃতসংস্কারঃ = বিস্মৃতঃ স্মৃতিপথাদপগতঃ সংস্কারঃ ন ময়া কিঞ্চিদ্বক্তব্য মিতি জ্ঞানং যস্য স তথাভূতঃ সন্নিত্যর্থঃ।

(৮) প্রণয়াদিতি। যো জনঃ প্রণয়াৎ সৌহার্দ্দাৎ বা অথবা উপকারাৎ হেতোঃ শত্রুষু বিশ্বসিতি স সুপ্তঃ নিদ্রিতো জনঃ বৃক্ষাৎ পতিত ইব বিপন্নঃ সন্ ইত্যর্থঃ। প্রবুধ্যতে জাগর্ত্তি প্রবোধং প্রাপ্নোতীত্যর্থঃ।

প্রসাদিতেন = প্রীতিমাপাদিতেন সতা।

মহতাং........কর্ত্তব্যঃ = মহতামাস্পদে মহতামুচিতে স্থানে।

(৯) নীচ ইতি। নীচঃ ক্ষুদ্রোজনঃ শ্লাঘ্যপদং উচ্চৈঃপদবীং প্রাপ্য লব্ধা স্বামিনং লোপ্তুং অপদস্থং কর্ত্তুমিচ্ছতি অভিলষতি। মূষিকঃ ব্যাঘ্রতাং ব্যাঘ্রাকৃতিং প্রাপ্য মুনিং ব্যাঘ্রতা মাপাদয়িতারং মহাতপসং হন্তুং উদ্যতঃ যথা উদ্যত ইব।

নীবারকণৈঃ = তৃণধান্যকণৈঃ।

খাদিতুমনুধাবন্ = ভক্ষিতুং কৃতপ্রয়াসঃ।

মূষিকনির্ব্বিশেষং = মূষিকবৎ।

স্বরূপাখ্যানং = মূষিকঃ সন্ ব্যাঘ্রতা মাপাদিত ইত্যেবং সত্যবৃত্তান্তং।

ন পলায়িষ্যতে = ন যাস্যতি ন বিলীনং ভবিষ্যতীত্যর্থঃ।

সব্যথঃ = ব্যথিতান্তঃকরণঃ।

চিকীর্ষিতং = কর্ত্তুমিষ্টং (কৃ+সন্+ক্তঃ) অভীষ্টমিতি যাবৎ।

সুকরং = অনায়াসসাধ্যং।

(১০) ভক্ষয়িত্বেতি। উত্তমাধমমধ্যমান্ বহূন্ মৎস্যান্ ভক্ষয়িত্বা অতিলৌল্যাৎ উৎকটলোভাৎ মূর্গঃ বকঃ কর্কটসংগ্রহাৎ কুলীরকসঙ্গাৎ মৃতঃ মৃত্যুং প্রাপ্তঃ।

মালববিষয়ে = মালবদেশে।

কৈবর্ত্তৈঃ = ধীবরৈঃ।

বর্ত্তনাভাবাৎ = জীবনোপায়াভাবাৎ।

উপলক্ষ্যতে = দৃশ্যতে।

অপূর্ব্বকুলীরকমাংসার্থী = অপূর্ব্বং অনাস্বাদিতপূর্ব্বং যৎ কুলীরকস্য মাংসং

তদর্থয়তে যঃ সঃ তথোক্তঃ।

(১১) অনাগতবতীমিতি। যস্তু জনঃ অনাগতবতীং ভবিষ্যদ্বিষয়িণীং চিন্তাং কৃত্বা প্রহৃষ্যতি প্রীতি মনুভবতি সঃ ভগ্নানি ভাণ্ডানি যেন স তথোক্তঃ ভগ্নভাণ্ডঃ দ্বিজঃ ব্রাহ্মণঃ যথা ব্রাহ্মণ ইব তিরস্কারং অবমাননাং প্রাপ্নোতি লভতে।

বিষুবৎসংক্রান্ত্যাং = মহাবিষুবসংক্রান্ত্যাং চৈত্রসংক্রান্ত্যাম্।

পূগবস্ত্রাদিকং = গুবাকবস্ত্রাদিকং।

(১২) মদোদ্ধতস্যেতি। মদেন উদ্ধতঃ তস্য ঐশ্বর্য্যমত্তস্য অতএব উন্মার্গযাতস্য অসৎপথপ্রবৃত্তস্য অন্যত্র ভিন্নপথগামিনঃ নৃপতেঃ রাজ্ঞঃ প্রকীর্ণস্য মদস্রাবিণঃ দুর্বিনীতস্য উল্লঙ্ঘিতযন্তৃশাসনস্য দন্তিনঃ করিণ ইব নেতারঃ কার্য্যোপদেশকাঃ মন্ত্রিণঃ অন্যত্র হস্তিপকাঃ খলু নিশ্চিতং বাচ্যতাং নিন্দাস্পদত্বং গচ্ছন্তি প্রাপ্নুবন্তি।

বলদর্পাৎ = বিক্রমং প্রদর্শ্যেত্যর্থঃ।

প্রতাপাধিষ্ঠিতেনোপায়েন = সামাদ্যুপায়চতুষ্টয়েন।

পরভূমিষ্ঠানাং = অপররাজ্যস্থিতানাং।

সুখশোভার্থং = সুখার্থং রাজ্যশোভার্থঞ্চ। বিগ্রহে তু প্রজাক্ষয়ঃ রাজ্যঞ্চ হতশ্রীকং ভবেদিতি ভাবঃ।

(১৩) যুদ্ধইতি। যুদ্ধে বিগ্রহে সতি উভয়োঃ বিগ্রহপ্রবৃত্তয়োঃ দ্বয়োরপি বিনাশঃ কদাচিৎ ভবতি বিনাশসম্ভাবনা বিদ্যতে এব। সমবীর্য্যৌ সমপরাক্রমৌ কিমুত সবলেন দুর্বল ইতিভাবঃ সুন্দোপসুন্দৌ তন্নাম্না প্রসিদ্ধৌ দ্বৌ অসুরৌ অন্যোঽন্যং পরস্পরং কিং ন হতৌ বিনাশিতৌ।

সমধিষ্ঠিতয়া সরস্বত্যা = কণ্ঠগতয়া বাগ্‌দেব্যা।

জগদ্ঘাতিভ্যাং = জগতঃ অনিষ্টকর্তৃভ্যাং।

মনসোৎসুকাভ্যাং = মনসা হৃদয়েন উৎসুকাভ্যাং ইষ্টসাধনে উদ্যতাভ্যাং।

পাপতিমিরাভ্যাং = পাপান্ধাভ্যাং।

প্রমাণপুরুষঃ = মধ্যস্থপুরুষঃ।

সন্ধেয়গুণযুক্তঃ = সত্যার্য্যাদিগুণান্বিতঃ।

সন্ধানং = সন্ধানং সন্ধিঃ উপন্যস্তং প্রস্তুতং।

ভূতজয়দর্পান্ন মন্তব্যং = ভূতজয়দর্পাৎ বিজয়গর্বাৎ। ন মন্তব্যং নানুমোদিতব্যং সন্ধান মিতি শেষঃ।

সুগুপ্তলেখং = গূঢ়পত্রিকাং।

(১৪) বিশ্বাসেতি। বিশ্বাসপ্রতিপন্নানাং কৃতবিশ্বাসানাং বঞ্চনে প্রতারণায়াং কা বিদগ্ধতা কিং নৈপুণ্যং ন কিমপীত্যর্থঃ। অঙ্কং ক্রোড়ং আরুহ্য সুপ্তং ক্রোড়ে শয়ানং অতীব বিশ্বাসমুপগত মিত্যর্থঃ। জনং হত্বা কিং পৌরুষং পুরুষকারো নাম (নামেতি পাদপূরণে)

বিজ্ঞাতঃ = শক্রপক্ষত্বেন প্রত্যভিজ্ঞাতঃ।

(১৫) আত্মৌপম্যেনেতি। যঃ আত্মৌপম্যেন আত্মতুলনয়া দুর্জনং বঞ্চকং সত্যবাদিনং সজ্জনং বেত্তি স এব দুর্জনে কৃতবিশ্বাস এব তেন দুর্জনেন ছাগতঃ ছাগং প্রাপ্য ব্রাহ্মণঃ যথা ব্রহ্মণ ইব বঞ্চিতঃ ভবতীতি শেষঃ।

প্রস্তুতযজ্ঞঃ = সমারব্ধযজ্ঞঃ।

মতিপ্রকর্ষঃ = বুদ্ধেরুৎকর্ষঃ।

(১৬) মতিরিতি। সতাং মনস্বিনামপি খলোক্তিভিঃ খলবচনৈঃ মতিঃ বুদ্ধিঃ দোলায়তে দ্বিধা ভবতি সংশয়ারূঢ়া ভবতীতি যাবৎ। যঃ অসৌ সাধুঃ তাভিঃ খলোক্তিভিঃ বিশ্বাসিতঃ সন্ চিত্রকর্ণবৎ ম্রিয়তে মৃত্যুং প্রাপ।

কণ্টকভূজা = শস্যভক্ষকেণ।

(১৭) ত্যজেদিতি। ক্ষুধার্ত্তা ক্ষুধাপীড়িতা সতী মহিলা নারী পুত্রমপি ত্যজেৎ ক্ষুধার্ত্তা ভূজগী সর্পী স্বং স্বকীয়ং অণ্ডং সন্তানমপি খাদেৎ ভক্ষয়েৎ বুভুক্ষিতঃ নিতরাং ক্ষুধার্ত্তঃ জনঃ কিং পাপং ন করোতি ক্ষীণাঃ ক্ষুধাপীড়িতাঃ নরাঃ নিষ্করুণা নিষ্ঠুরা ভবন্তি।

সিংহান্তিকং = সিংহসমীপং।

স্বাধীনাহারপরিত্যাগাৎ = স্বাধীনঃ অযত্নসুলভঃ আহারঃ তস্য পরিত্যাগঃ তস্মাৎ।

কূটং = মায়াং কপটমিতি যাবৎ।

অনেকোপবাসক্লিষ্টঃ = বহুদিনং যাবৎ আহারাভাবেন অতীব পরিক্ষীণঃ।

জাতপ্রত্যয়ঃ = জাতবিশ্বাসঃ।

(১৮) **স্কন্ধেনাপীতি।** বুদ্ধিমান্ জনঃ কার্য্যং প্রয়োজনং আসাদ্য প্রাপ্য প্রয়োজনবশাদিত্যর্থঃ। স্কন্ধেনাপি শত্রূন্ বহেৎ আরোপ্য নয়েৎ। যথা যেন প্রকারেণ বৃদ্ধেন সর্পেণ সমূহ্যেতি শেষঃ মণ্ডূকাঃ বিনিপাতিতাঃ হতাঃ।

অতিজীর্ণয়া = বার্দ্ধক্যবশাৎ।

স্নাতকঃ = ব্রহ্মচর্য্যং সমাপ্য গৃহস্থাশ্রমং গতঃ।

(১৯) অনিত্যমিতি। যৌবনং রূপং জীবিতং প্রাণাঃ দ্রব্যসঞ্চয়ঃ আবশ্যকবস্তূনাং সংগ্রহঃ ঐশ্বর্য্যং সম্পৎ প্রিয়সংবাসঃ সুহৃৎসমাগমঃ এতৎ সর্ব্বং অনিত্যং অস্থিরং তত্র তেষু পণ্ডিতো জনঃ ন মুহ্যেৎ মোহমাপ্নুয়াৎ। এষা মনিত্যতাং স্মৃত্বা নৈতেষু তেষামাস্থা ভবতীত্যর্থঃ।

(২০) যথেতি। যথা যেন প্রকারেণ পথি কশ্চিৎ জনঃ ছায়াং আশ্রিত্য অবলম্ব্য তিষ্ঠতি ততঃ বিশ্রম্য শ্রমং বিনীয় চ পুনঃ গচ্ছেৎ তদ্বৎ তাদৃশং ভূতসমাগমঃ প্রাণিভিঃ সহ মিলনং।

(২১) সংযোগইতি। জন্ম (কর্ত্তা) অনতিক্রমস্য অবশ্যম্ভাবিনঃ মৃত্যোঃ আগমং উপস্থিতিমিব সংযোগঃ মিলনং বিয়োগস্য বিচ্ছেদস্য সম্ভবং অবশ্যম্ভাবং সংসূচয়তি জ্ঞাপয়তি।

(২২) আপাতেতি। প্রিয়ৈঃ সহ পুত্রাদিপ্রিয়জনৈঃ সহ আপাতরমণীয়ানাং প্রথমমধুরাণাং সংযোগানাং মিলনানাং পরিণামঃ চরমঃ অপথ্যানাং অনুপাদেয়ানাং অহিতানাং অন্নানাং ভক্ষ্যবস্তূনাং ইব দারুণঃ ভীষণঃ রোগোৎপাদকত্বাৎ ভয়াবহঃ।

আত্মানমনুসন্ধেহি = ব্রহ্মতত্ত্বং নিরূপয়।

(২৩) বনে ইতি। রাগিণাং বিষয়াসক্তানাং বনেঽপি দোষাঃ শোকজনিতাঃ চিত্তবিক্ষেপাঃ প্রভবন্তি প্রবর্ত্তন্তে গৃহেঽপি পঞ্চানাং চক্ষুঃকর্ণাদীনাং ইন্দ্রিয়াণাং নিগ্রহঃ সংযম এব তপঃ নিয়মঃ অকুৎসিতে পুণ্যে কর্ম্মণি যঃ প্রবর্ত্ততে তিষ্ঠতি নিবৃত্তরাগস্য বীতস্পৃহস্য গৃহং তপোবনং।

(২৪) আত্মেতি। সংযমঃ ইন্দ্রিয়নিগ্রহএব পুণ্যং তীর্থং অবগাহন-

সোপানং যস্যাঃ সা তথোক্তা সত্যমেব উদকং জলং যস্যাঃ সা শীলং সচ্চরিত্র মেব তটং যস্যাঃ সা দয়া পরদুঃখপ্রহরণৈচ্ছেব উর্ম্মিঃ তরঙ্গো যস্যাঃ সা তাদৃশী আত্মা আত্মরূপা নদী হে পাণ্ডুপুত্র যুধিষ্ঠির তত্র তস্যাং নদ্যাং অভিষেকং স্নানং কুরু অন্তরাত্মা বারিণা কেবলেন জলেন ন শুধ্যতি ন শুদ্ধিং ব্রজতি।

চিত্রপদক্রমং = চিত্রঃ বিচিত্রঃ অদ্ভুত ইতি যাবৎ পদক্রমঃ গতিঃ যস্মিন্ কর্ম্মণি তৎ যথা তথা বিচিত্রয়া গত্যেত্যর্থঃ।

মহাপ্রসাদঃ = মহান্ প্রসাদঃ মহাপ্রসাদঃ মৎস্যভক্ষণাদেশরূপঃ সবিশষানুগ্রহঃ।

(২৫) একদেতি। রাজা একদা যুগপৎ বহূন্ অনেকান্ বিবাদিনঃ কলহকারিণঃ ন বিগৃহ্ণীয়াৎ ন যোধয়েৎ তথাহি সদর্পঃ অপি উরগঃ সর্পঃ বহুভিঃ বহুসংখ্যকৈঃ কীটৈঃ ধ্রুবং নিশ্চিতং বিনাশিতঃ হতঃ।

(৩৬) যইতি। যোজনঃ অর্থতত্ত্বং ক্রোধবিষয়স্য স্বরূপং অবিজ্ঞায় অবিদিত্বা ক্রোধস্য কোপস্য বশং গতঃ ক্রোধাভিভূতঃ ভবতীতি শেষঃ স মূঢ়ঃ নকুলাৎ নকুলং হত্বা ব্রাহ্মণঃ যথা ব্রাহ্মণইব সবিশেষং তপ্যতে অনুতাপং ভজতে।

সুতনির্ব্বিশেষং = অপত্যবৎ স্নেহভাজনং।

উত্তরোত্তরেণ = উত্তরোত্তরবাক্‌প্রপঞ্চেন।

অভিসন্ধিনা = ব্যাজেন।

স্থিতিঃ = ধারণা নিশ্চয় ইতিযাবৎ।

(২৭) সরসীতি। নিশাসু রাত্রিষু কুমুদবিটপান্বেষী কুমুদদলং মৃগয়মানঃ বিচক্ষণঃ হংসঃ সরসি সরোবরে বহুশঃ অনেকবারং তারাচ্ছায়ে নক্ষত্রপ্রতিবিম্বে ক্ষণাৎ পরিবঞ্চিতঃ প্রতারিতঃ সন্ দিবাঽপি দিবসেঽপি পুনঃ তারাশঙ্কী নক্ষত্রভ্রান্ত্যা ইত্যর্থঃ সিতোৎপলং শ্বেতপদ্মং ন দশতি। কুহকচকিতঃ কপটবিস্মিতঃ লোকঃ সত্যেঽপি বিষয়ে অপায়ং অনিষ্টং অপেক্ষতে আশঙ্কতে।

(২৮) দুর্জনেতি। দুর্জনেন বঞ্চকেন দূষিতং মনঃ যস্য তস্য জনস্য সুজনেষু সজ্জনেষু অপীত্যর্থঃ বিশ্বাসঃ নাস্তি। পায়সেন দগ্ধঃ বালঃ শিশুঃ

দধি অপি ফুৎকৃতং সৎ ফুৎকৃত্বেত্যর্থঃ ভূঙ্‌ক্তে খাদতি।

রত্নোপহারসামগ্রী = রত্নোপঢৌকনোপযোগঃ।

যুষ্মদায়ত্তং = ভবদধীনং।

প্রপঞ্চনং = বাগ্‌বিস্তারঃ।

(২৯) লুব্ধমিতি। লুব্ধং ধনলোভিনং অর্থেন ধনদানেন গৃহ্লীয়াৎ বশীকুর্য্যাৎ স্তব্ধং গর্বিতং অঞ্জলিকর্ম্মণা বিনয়েন মূর্খং ছন্দানুবৃত্তেন তদভিপ্রেতেন আচরণেন পণ্ডিতং বিদ্বাংসং যাথাতথ্যেন স্বরূপাখ্যানেন সর্ব্বত্র গৃহ্নীয়াদিত্যনেনান্বয়ঃ।

সত্যাভিধানদিব্যপুরঃসরং = সত্যকথনশপথপূর্ব্বকং।

সমীহিতং = অভীষ্টং।

সকল রাজব্যবহারাঙ্গং = সন্ধিবিগ্রহাদিসমস্তরাজনীত্যঙ্গং।

(৩০) সন্ধিরিতি। বিজয়িনাং জয়শীলানাং সর্ব্বমহীভুজাং সর্ব্বনরপতীনাং সন্ধিঃ সদা প্রমোদঃ চিত্তরঞ্জকঃ অস্তু ভবতু সন্তঃ সাধবঃ নিরাপদঃ নির্বিঘ্নাঃ সন্তু সুকৃতীনাং সদাচাররতানাং কীর্ত্তিঃ যশঃ চিরং বর্দ্ধতাং নীতিঃ সততং বক্ষঃস্থলে -রাজতী সতী মন্ত্রিণাং মুখং চুম্বতু অহরহঃ প্রত্যহং মহান্নুৎসবঃ ভূয়াৎ ইত্যাশীরুক্তিঃ।

ইতি হিতোপদেশটীকায়াং দীপিকাসমাখ্যায়াং
সন্ধির্নাম চতুর্থঃ কথাসংগ্রহঃ।

সমাপ্তোঽয়ং গ্রন্থঃ॥

HITOPADESHA.

BY

VISNU SHARMA.

SELECTED AND COMPILED WITH ELABORATE NOTES.

BY

BARADA KANTA VIDYARATNA.

Late Scholar, Sanskrit College, and Head Pandit, South Suburban School.

হিতোপদেশঃ।

শ্রীবিষ্ণুশর্ম্মসঙ্কলিতঃ।

কলিকাতাসংস্কৃতবিদ্যালয়চ্ছাত্র

শ্রীবরদাকান্ত বিদ্যারত্নপ্রণীত

দীপিকাসমাখ্যয়া টীকয়া সমেতঃ।

CALCUTTA.

PRINTED AT THE SUBURBAN PRESS, BY P. N. MALLIK 28, JALLIAHPARRAH ROAD,

BHOWANIPORE.

1877.

বিজ্ঞাপন।

কোন ভাষা শিক্ষা করিতে হইলে সেই সেই ভাষায় গদ্য পদ্য উভয় পাঠ করা আবশ্যক। সংস্কৃত ভাষায় গদ্যপদ্যময় গ্রন্থ অতি বিরল। প্রথম-ভাগ ঋজুপাঠ পাঠ করিয়া প্রবেশিকাপরীক্ষার্থী বালকেরা তৃতীয়ভাগ ঋজু-পাঠের পূর্ব্বে পাঠ করিতে পারে, হিতোপদেশ ভিন্ন এমন গদ্য গ্রন্থ আর নাই। সুতরাং এই উদ্দেশ্য সাধনের নিমিত্ত হিতোপদেশ প্রকাশিত হইল। বিষ্ণুশর্ম্মা হিতোপদেশের প্রণেতা। তিনি গ্রন্থারম্ভে প্রতিজ্ঞা করিয়াছেন "গল্পচ্ছলে বালকদিগকে নীতি শিখাইবার জন্য এই পুস্তক প্রণয়ন করিলাম।" বাস্তবিক হিতোপদেশের প্রত্যেক শ্লোক ও উপাখ্যান নীতিগর্ভ। এই গ্রন্থ পাঠ করিলে নীতিশিক্ষা ও ভাষাশিক্ষা উভয়ই একেবারে সম্পাদিত হইতে পারে। কিন্তু গ্রন্থের মধ্যে মধ্যে আদিরসঘটিত এরূপ অশ্লীল শ্লোক ও উপখ্যান দেখাযায় যে তাহা কোন মতেই তরলমতি বালকদিগের পাঠো-পযোগী হইতে পারে না। সেই অশ্লীল ও অসম্বদ্ধ অংশ পরিত্যাগপূর্ব্বক হিতোপদেশ মুদ্রিত করিলাম। হিতোপদেশ চারি অংশে বিভক্ত; মিত্রলাভ সুহৃদভেদ, বিগ্রহ, সন্ধি। বালক গণের সুবিধার নিমিত্ত এই চারি অংশেরই সরল সংস্কৃতভাষায় টীকা প্রণয়ন করিয়া পুস্তকের পশ্চাদ্ভাগে বিন্যস্ত করি-লাম। টীকা আশানুরূপ হইয়াছে কি না বলিতে পারি না। তবে ইহাদ্বারা বালকগণের কিঞ্চিৎ সাহায্য হইলেও পরিশ্রম সার্থক বোধ করিব। আমার প্রিয়সুহৃৎ পণ্ডিত নকুলেশ্বর বিদ্যাভূষণ পরিশ্রম স্বীকার করিয়া সংস্কৃত টীকা আদ্যোপান্ত দেখিয়া দিয়াছেন। এবং তাঁহারই উৎসাহে মুদ্রাঙ্কনে প্রবৃত্ত হইয়াছিলাম।

অবশেষে কৃতজ্ঞতার সহিত স্বীকার করিতেছি যে বরিসাল জেলার অন্তঃ-পাতি সাহাজাদপুর পরগণার জমীদার আমড়াজুড়ীনিবাসী শ্রীলশ্রীযুক্ত বাবু হরনাথ দত্ত চৌধুরী ও শ্রীল শ্রীযুক্ত বাবু ঈশানচন্দ্র দত্ত চৌধুরীমহাশয়দ্বয়ের উৎসাহে ও অর্থানুকূল্যের উপর নির্ভর করিয়া এই বহুব্যয়সাধ্য মুদ্রাঙ্কনে সমর্থ হইলাম।

সাউথ সুবরবন স্কুল
ভবানীপুর; কলিকাতা

শ্রীবরদাকান্ত শর্ম্মা।

মিত্রলাভ।

অশুদ্ধ	শুদ্ধ	পৃষ্ঠা	পংক্তি
(বি + ক + যপ)	(বি + কৃ + যপ্)	৪	২৬
(বি + স্তৃ + যপ্)	(বি + স্তৃ + যপ্)	ঐ	২২
যড্	যঞ্	৫	২১
কর্ত্তরি	কর্ম্মকর্ত্তরি	৮	১২
ঈর্ষী	ঈর্ষা	৯	২০
মথারা + কঃ	মথ + রা + কঃ	১০	১৪
প্রাপ্যান্তি	প্রাপ্যান্তি	১২	২২
এষাং ময়া সহ সাম্যং একরূপং	ময়া সহ সাম্যং একরূপতা	১৩	৮
লব্ধস্য ধনস্য ব্যয়ে	বিনাশে লব্ধস্য ধনস্য ব্যয়ে	ঐ	১৮
(যুজ্ + ণিচ্ + বিধিলিঙ্ + যাৎ)	বুধঃ পণ্ডিতঃ জনঃ তৎবস্তু তেন বস্তুনা সহ যোজয়েৎ (যুজ্ + ণিচ্ বিধিলিঙ্ + যাৎ)	১৬	২৭
ক্রমাঃ বৃক্ষাঃ	ক্রমঃ বৃক্ষঃ	২০	২১
হিতং	সঃ হিতং	২৪	২৪
হর্ষোৎকল্ল	হর্ষোৎফুল্ল	২৫	৪
উপাদি	উৎপাদি	৩২	৬

সুহৃদ্ভেদ।

অশুদ্ধ	শুদ্ধ	পৃষ্ঠা	পংক্তি
প্রচূরে	প্রচুরে	১	১৬
তুষ্ণীং	তূষ্ণীং	৪	১৯
মবমতিং	মবনতিং	৭	১৪
ভীতিস্তস্মাৎ	ভীতি স্তস্যাঃ	৮	৮
তস্য ইচ্ছুঃ	তৎ ইচ্ছুঃ	১৬	২৬

বিগ্রহ।

অশুদ্ধ	শুদ্ধ	পৃষ্ঠা	পংক্তি
কর্ত্তব্যঃ বিধেয়ঃ	কর্ত্তব্যা বিধেয়া	২৭	১৩
সগর্বিতঃ	গর্বিতঃ	৩১	৩

সন্ধি।

অশুদ্ধ	শুদ্ধ	পৃষ্ঠা	পংক্তি
বিজিগীষঃ	বিজিগীষুঃ	৩১	৯